मुखं हृदुदरं गुह्यं पुच्छं मस्तकमेव च॥ २२॥ मुखे कंठे हृदये
सप्त ७ षट् ऋक्षाणि तथोदरे ६॥ ऋक्षैकं गुह्यके तस्य १ ष
ट् ६ पुच्छे सप्त ७ मस्तके॥ २३॥ राहुकालमिलं चक्रमवलो
क्यं॥ अथवा सर्पचक्रं॥ मुखाद्यं तस्य नामानि फलं च वा
विवदाम्यहं॥ यथोत्तरक्रमेणैव चंद्रार्कभ्रमणेन च॥ २४॥ यत्र धिष्ण्ये स्थितो राहुस्तस्य धि
ष्ण्य प्रकीर्तितं॥ गलितं कर्तरी जिह्वा चंद्रांगं वदनं तथा॥ २५॥ राहुऋक्षाग्रतः सप्तभानि भुक्ता
यथाक्रमं

निपानि च ॥ तानि संपुटसंज्ञानि कर्मांगहृदयं मतं ॥ २६ ॥ हृदयाग्रे स्थिता याश्च तारकास सं
ख्यया ॥ कामार्गे जाठरे जीवे संपुटोदरसंज्ञकं ॥ २७ ॥ उदराच्चैकनक्षत्रं मुखाख्यं च दशास्फुट
 गुमुद्रिलितकं गुल्यं केतु चंद्रार्ककर्तरी ॥ २८ ॥ शेषाणि सप्तभान्यत्र मध्यस्थान्यस्य पुच्छयोः ॥
कपालं मस्तकं शीर्षं रुद्रांगं भोग्यमंडलं ॥ ३० ॥ गुदऋक्षाग्रतो यानि धिष्ण्यानि ऋतुसंख्यया ॥
पुच्छं सूर्यांगकं ज्ञांगं पृष्ठिमत्स्यस्तथैव च ॥ २९ ॥ स्थिररूपस्थितो भानुश्चररूपस्थ चंद्रमाः ॥
क्रमेणैकैकशोंगानां योगषट्कं वदाम्यहं ॥ ३१ ॥ राहुवक्त्रस्थिते सूर्ये चंद्रे हृदयसंस्थिते ॥ यायि
नो विजयस्तत्र स्थायिनो भंगमाहवे ॥ ३२ ॥ मुखांगसंस्थिते सूर्ये चंद्रे चोदरगे रणे ॥ अग्रयायी
जयेद्युद्धे हेलया नात्र संशयः ॥ ३३ ॥ भास्करे गिलितांगस्थे चंद्रे रुद्रांगसंस्थिते ॥ स्थायी भंग
समायाति यायी जयति सक्षतः ॥ ३४ ॥ राहुऋक्षस्थितो भानुश्चंद्रे पुच्छांगसंस्थिते ॥ स्थायि

नो विजयं युद्धे यायिनो मृत्युमादिशेत् ॥ ३५ ॥ राहुजिह्वागते सूर्ये चंद्रे रुद्रांगसंस्थिते ॥ बलाव
नौ भवेतां तत्र सैन्ययोरुभयोरपि ॥ ३६ ॥ राहुऋक्षस्थितो भानुश्चंद्रस्तत्रैव संस्थितः ॥ न कश्चि
ज्जयमाप्नोति सैन्ययोरुभयोरपि ॥ ३७ ॥ ॥ इति मुखादियोगषट्कं ॥ ॥ हृदयस्थे दिवाना
थे जठरस्थे निशाकरे ॥ निर्दिष्टः स्थायिनो मृत्युर्यायी भवति निर्व्रणः ॥ ३८ ॥ हृदयस्थो य
दा भानुः शशांको गुदमाश्रितः ॥ हेलया जयते यायी स्थायी च म्रियते रणे ॥ ३९ ॥ मासांग
स्थे दिवानाथे पुच्छषट्के निशाकरे ॥ स्थायिनो विजयस्तत्र यायिनश्च पराभवः ॥ ४० ॥
संपुटस्थो यदादित्यो रुद्रांगे चंद्रमाश्रितः ॥ यायी च भंगमाप्नोति किंचित् स्थायी जयी रणे ॥ ४१
का मांगे जायते भानुश्चंद्रे राहुमुखस्थिते ॥ संग्रामे विजयी स्थायी यायिनो भंगमादिशेत् ॥

यी

 ॥४२॥ हृदयांगे यदा युक्तौ चंद्रादित्यौ व्यवस्थितौ॥ देवानपि जये यायी किं पुनः प्रतिमंडलं॥
४३॥ ॥इति हृदयादियोगषट्कं॥ ॥उदरस्थे दिवानाथे निशानाथे गुदस्थिते॥ समंयु
५१ द्धं भवेत्तत्र किंचिद्यायी जयी रणे॥४४॥ संपुटस्थो यदा भानुः पृष्ठे भवति चंद्रमाः॥ यायी भंगं
जयी स्थायी तत्र काले न संशयः॥४५॥ कामांगस्थः सहस्रांशुर्मस्तकस्थो निशाकरः॥ राम
यातो भंगमवाप्नोति स्थानवासी जयी रणे॥४६॥ भानावुदरयोगे यत्र निशेशो राहुवक्त्रगः॥ ५१
अग्रयायी क्षयी तत्र स्थायी तो जयति नान्यथा॥४७॥ स्वर्भानूदरगो भानुर्हृदये तारकाधिपः
अनायासेन संग्रामे यायिनो जयमादिशेत्॥४८॥ उदरांगे यदा युक्तौ चंद्रादित्यौ व्यवस्थितौ
तदा संधिर्न संदेहः सैन्ययोरुभयोरपि॥४९॥ ॥इत्युदरादियोगषट्कं॥ ॥केतुऋक्ष
स्थिते सूर्ये चंद्रे वक्त्रांगसंस्थिते॥ यायी भंगो जयी स्थायी भाषितं ब्रह्मयामले॥५०॥ गुदे तीक्ष्णां

शुसंयुक्ते कपालस्थे निशाकरे॥ यायी च भज्यते तत्र स्थायी जयति नान्यथा॥५१॥ गुद
ऋक्षस्थिते सूर्ये राहुऋक्षस्थितः शशी॥ महाहवो भवेद्घोरः किंचित्स्थायी जयी रणे॥५२
भानुरुद्धिलिते ऋक्षे शशभृत्संपुटे नया॥ यायीनो विजयस्तत्र स्थायिनो भंगमादिशेत्॥५३
गुह्यांगे वर्तते भानुर्जठरे रोहिणीपतिः॥ द्वयोः पित्वारियोः सैन्ये याताभ्येति सुतालयं॥५४॥
गुह्ये दिवाकरो यत्र तत्रैव यामिनीकरः॥ समं युद्धं भवेत्तत्र किंचिदागंतुके जयः॥५५॥ ॥
इति गुदादियोगषट्कं॥ ॥सूर्यांगस्थः सहस्रांशुर्जिह्वायां शीतगुस्थितः॥ स्थायिनो वि
जयं विंद्यात् यायिनश्च पराभवः॥५६॥ पुच्छक्षेत्रस्थितो भानुरुद्रक्षेत्रेषु चंद्रमाः॥ यायिनो
मृत्युमायाति जयलाभश्च स्थायिनः॥५७॥ पुच्छषट्के यदा भानुः कामांगे चंद्रमा स्थितः॥ या

स्वरोदय· यीविजयतेतत्र शक्रतुल्योपिवैरिणा॥५८॥अंशुमालीभवेद्दक्षे जठरेचसुधाकरः॥अदंत्रे
रिश्चियंजित्वासर्वान्यायीरणांगणे॥५९॥भास्करेराहुपुछस्थेमगांकेगुदमाश्रिते॥समेयुद्धंभ
४२ वेतत्रकिंचिद्यायीजयीभवेत्॥६०॥सूर्याचंद्रमसौयत्रकंठांगेयदिसंस्थिते॥सैन्ययोरुभयोस्तत्र
वधोभवतिमिश्रितः॥६१॥ ॥इतिकंठांगषट्कं॥ ॥रुद्रांगस्थेनिशानाथेरुद्रजिह्वांगगः
शशी॥स्थायिनस्तुजयस्तत्रभंगोभवतियायिनः॥६२॥राहुशीर्षस्थितेमित्रेशशांकेलं राम
दिसंस्थिते॥विनायुद्धेनगृह्णातियायीकरमरीश्रियः॥६३॥कपालसंस्थितःसूर्यःसंपुट ४२
स्थोयदाशशी॥यायिनाजीयतेशत्रुःस्थायिनोभंगमादिशेत्॥६४॥मस्तकस्थेदिवाना
थेधिष्ण्यनाथेगुदस्थिते॥यायिनोविजयोयुद्धेस्थायिनस्तुपराजयः॥६५॥राहुशीर्षस्थि
तोभानुःपुछक्षेत्रेनिशाकरः॥अन्योन्यविग्रहंघोरंयुद्धंभवतिदारुणं॥६६॥दिनेशोरा

हुरुद्रांगेचंद्रस्तत्रैवसंस्थितः॥विनाशंकोशराष्ट्रस्ययायिनोमृत्युमादिशेत्॥६७॥ ॥
इतिकपालादियोगषट्कं॥ ॥इतियामलीयस्वरोदयेषडंगयोगचक्रं॥ ॥हृदयादीनिचां
गानिज्ञात्वानिक्रमेणच॥दशासंख्यान्यहंवक्ष्येराहुचक्रस्यमध्यतः॥६८॥पुष्पितंफलितंचैव
निष्फलंस्फुटितंगुदं॥राजसंतामसंरुद्धंमृतंजिह्वाक्रमेणच॥६९॥पुष्पितेत्रीं३चत्वारि४फलि
तेनिष्फलेत्रयं३॥स्फुटितेत्रीणिऋक्षाणि३गुदेचैकं१भवेत्तथा॥७०॥राजसेत्रीं३ऋक्षाणितम
सेचतथात्रयं३॥रुद्धेचतुष्टयंत्रीणिमृतेचैकंतथामुखे॥७१॥त्रीणिपुष्पितऋक्षाणिक्षेमलाभ
करणिच॥शत्रुभंगोभवेद्युद्धेयात्रामासेनलाभदा॥७२॥ततश्चत्वारिधिष्ण्यानिपक्षैकेनफ
लंतिच॥गजवाजिधनंदेशंयायीलभतेध्रुवं॥७३॥अफले पुचधीष्वेषु षण्मासेया

स्वरोदय॰ यिनंप्रति॥संधिसेवीतथादेशंस्थायीयछतिनिश्चितं॥७४॥फलंप्राप्नोतिवर्षेण स्फटितेश्चत्रि
तारगेः॥गोधनान्यदिवंदानियायीलुंठतिचध्रुवं॥७५॥गुरेकेनभशंलक्ष्मीःपद्मिनीप्रिय
४२ वादिनी॥रूपयौवनसंपन्नामासयुग्मेनलभ्यते॥७६॥विग्रहस्यभवेद्वृद्धियुद्धेभंगस्तथैव
च॥रोगपीडाभवेद्वर्षे॥०राजसाम्येस्त्रितारकेः॥७७॥हस्त्यश्वपुत्रमित्रादिदेशकोशप
रिग्रहाः॥पद्भिर्मासैर्विनश्यंतियायिनस्तामसत्रये॥७८॥तामसाग्रचतुष्केचतारकाबुद्धसं राम
ज्ञका॥सर्वनाशकराप्रोक्तामासेकेननसंशयः॥७९॥ततस्त्रिमत्स्यऋक्षाणिराजमत्स्यप्रदानि ४३
हि॥अर्शोवारश्चगुल्मश्चपक्षैकेनफलंस्मृतं॥८०॥युद्धेभंगंमहाभीतिद्रव्यनाशंकुलक्षयं
सद्योमत्स्यंलभेद्यायीराहुचक्रेस्फनिश्चितं॥८१॥ ॥इतिदशांगराहुकालानलंशुभाशु
भफलं॥ ॥युद्धकालेयदाशीघ्रंयात्रायोगोनलभ्यते॥उत्पायौतौतदाशीघ्रंतात्कालेनु

दिवाकरौ॥८२॥ईस्ननाडीहेलाधिष्ण्यैःषष्ठिभागाप्रशोधकैः॥अश्विन्यादिंदुभुक्तानियुक्तेतात्कालचंद्र
माः॥८३॥यथाचंद्रस्तथासूर्यःकर्तव्याश्चैककालिकः॥ततोहोरात्रमध्येतौविभ्रांतौधिष्ण्यमंड
ले॥८४॥स्थिरचक्रेपुराःप्रोक्तंचंद्रादित्यफलंमया॥चरचक्रेप्यनेनैवप्रकारेणफलंवदे॥८५
सर्वेषुशुभकार्येषुयात्राकालेविशेषतः॥सर्वकालेशुभश्चंद्रोस्तयोयदिगुदोदरे॥८६॥स्वदुरो
दरगेचंद्रेविवाहेनंदतिद्वयं॥नेस्त्वविद्वेषवेधन्यंमुखेपुछेचमस्तके॥८८॥पुछपद्भकपाकस्थेशशी
केराहुवक्रगे॥बंधनंहानिमत्स्यश्चसर्वकार्येषुजायते॥८७॥पुष्पितेफलितेगुल्येप्रश्नकालेश
शीशुभः॥अफलेस्फटितेमध्येमत्स्यशेषांगगेविधो॥८९॥ऊर्ध्वेचखेचरंवक्रंमध्योभूचरमुच्य
ते॥उभयोःसन्निपातेनराहुकालानलंमतं॥९०॥नलोभेनभयेस्नेहेर्नदेयंकार्यकारणैः॥का
लानलमिदंचक्रंगोपनीयंप्रयत्नतः॥९१॥चिरकालस्थितेभुक्तेसुपरिक्षेपुनःपुनः॥तस्मि

न्नशिष्येप्रदातव्यं राहुकालानलात्मकं॥ १२॥ ॥इति नरपतिजयचर्यायां स्वरोदये राहुकालानलचक्रं नवमं समाप्तं॥ ९॥ ॥अथ सूर्यकालानलं दशमं चक्रं॥ ऊर्ध्वगास्त्रिशूलाग्रास्तिस्त्रस्तिर्यक् च संस्थिताः॥ द्वेद्वेनाड्यौ स्थिते कोणे शृंगयुग्मं तथैकया॥ १॥ मध्यत्रिशूलदंडाध्योभानुभायं भमंडलं॥ साभिजितत्र दातव्यं सव्यमार्गेण सर्वदा॥ २॥ नामऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभं॥ अधोगे तैस्त्रिनक्षत्रै रुद्वेगो वधबंधनं॥ ३॥ कोणास्थके जयो लाभः कुक्षषद्के तथा पुनः॥ शृंगयुग्मे रुजा भंगो मृत्युः शूलत्रये स्फुटं॥ ४॥ विवाहे विग्रहे युद्धे रोगार्ते गमने तथा॥ सूर्यकालानलं चक्रं ज्ञातव्यं च प्रयत्नतः॥ ५॥ क्वचित् रोगच कुजनक्षत्रं दिन ऋक्षं तु युद्धके॥ प्रयाणे कृत्तिकाल्ले रव्यामन्यत्रार्कं प्रदीयते॥ ६॥ ॥इति नरपतिजयचर्यायां स्वरोदये सूर्यकालानलचक्रं दशमं समाप्तं॥ १०॥ ॥अथ चंद्रकालानल एकादशं चक्रं॥ चंद्रकालानलं चक्रं व्योमाकारं लिखेद्बुधः॥ चतुर्दिक्षु त्रिशूलानि मध्ये भिन्नानि कारयेत्॥ १॥ पूर्वत्रिशूलमध्यस्थं दिनऋक्षादि लिख्यते॥ त्रिशुले च बहिर्मध्ये मध्ये बहि त्रिशुलके॥ २॥ नामऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभं॥ त्रिशूले च क्रमात्स्ये च च क्रम ध्येन थैव च॥ ३॥ त्रिशूले पु भवेन्मृत्युर्मध्यमं बहिरष्टके॥ लाभः क्षेमो जयः प्रज्ञा चंद्रे गर्भे न संशयः॥ ४॥ वर्जनीयं प्रयत्नेन प्रथमाष्ट त्रिपंचकं॥ ऋक्षद्वाविंशकं चात्र कालरूपं न संशयः॥ लाभालाभं सुखं दुःखं जयं चैव पराजयः॥ चंद्रकालानले चक्रे ज्ञातव्यं न संशयवर्जितं॥ ६॥ क्वचित्॥ चंद्राष्टके जयो लाभो मध्यं शूर्पाष्टके मतः॥ राहुष्टके भवे द्व्याधि मृत्युः केतुचतुष्टये॥ ७॥ ॥इति चंद्रकालानले

एकादशं समाप्तं॥११॥

॥अथघोरकालानलंद्वादशंचक्रं॥शलाका[illegible]चक्रं
लिखित्वाचंद्रभादितः॥त्रिषुत्रिषुचऋक्षेषुनवसूर्याद
योग्रहाः॥१॥यदंगेनामनक्षत्रंदिनऋक्षाणिजायते॥
फलंतस्यप्रवक्ष्यामिएकैकस्ययथाक्रमं॥२॥भानुनाशो
कसंतापःशशांकेक्षेमलाभदः॥भूसुतेमृत्युमाप्नोतिबु
धेप्रज्ञाप्रजायते॥३॥जीवेलाभंशुभंशुक्रेसूर्यपुत्रेम
हद्भयं॥राहुणाघातपातंचकेतौमृत्युर्नसंशयः॥४॥
यात्राजन्मविवाहेषुसंग्रामेविग्रहेपिवा॥घोरकालानलं
ज्ञात्वाकर्मसमारभेत्॥५॥ ॥इतिघोरकालानलंद्वा

दशंचक्रंसमाप्तं॥१२॥

अथसप्तशलाकाचक्रंत्रयोदशं॥तिर्यगूर्ध्वगतारेखाःसप्तसं
ख्यालिखेद्बुधः॥कृत्तिकादीनिभान्यत्रसाभिजितिक्रमेण
वैच॥१॥भुक्तंक्रांतंतथाभोग्यं
विद्धंक्रूरग्रहेणभं॥शुभाशुभे
षुकार्येषुवर्जनीयंप्रयत्नतः॥२॥
यस्याभिधाननक्षत्रंविद्धंक्रूर
ग्रहेणच॥देशोग्रामपुरःसैन्यंन
रोनारीविनश्यति॥३॥इतिस्व
रोदयेसप्तशलाकाचक्रं॥१३॥

स्वरोदय अथपंचशलाकाचक्रं चतुर्दशं॥ तिर्यगूर्ध्वगताः पंच द्वे द्वे रेखे च कोणके॥ ईशकोणाद्दिरेखादौ कृत्तिकादि लिखेद्बुधः॥ १॥ विशाखाकृत्तिकावेधो भरणी मित्ररेवयोः॥ धनिष्ठासार्पयोर्वेधो म

४६ घाश्रवणयोस्तथा॥ २॥ शुभाशुभग्रहे विद्धं भं विवाहे विवर्जयेत्॥ शनिविद्धं महादुःखं रा

ड्रं तथैव च॥ ३॥ इति पंचशलाकाचक्रं॥ ॥अथ वक्रचंद्रचक्रं पंचदशं॥ वक्रेंदुसदृशं चक्रं त्रिशू

लसमन्वितं॥ मध्ये द्वादशभान्य

ग्रपट्टके नवशूलके॥ १॥ मध्ये

शूलस्य मध्यस्थे शशभृत्क्षमा

दितः॥ सव्येन गण्यते चंद्रं यावद्वे

धस्य नामकं॥ २॥ शृंगे मृत्युर्जे ४६

यो मध्ये पृष्ठे भंगो महाहवे॥ चतुरंगे कवौ कोटे द्वंद्वयुद्धे विशेषतः॥ ३॥ इति स्वरोदये वक्रचंद्रचक्रं पंचदशं॥

अथ मातृकाप्रथमचक्रं षोडशं ॥षोडशोर्ध्वगता रेखाः पंच रेखाश्च तिर्यगः॥ कोष्ठका

नां भवेत्षष्टिस्तत्रां काक्षरयोजना॥ १॥ पूर्णिमा

दिके सोमांकान् लिखेत्प्रतिपदांतकान्॥ तदधो

मातृका लिख्या ङञणांतस्वरोज्झितान्॥ २॥ सं

ग्रस्य नामवर्णांकान्मातृभेदेन संयुतान्॥ मुनि

भिस्तु हरेद्भागं शेषाज्ज्ञेयं बलाबलं॥ ३॥ मातृहीनो भवेद्भंगो जयो मात्राधिकं रणे॥ मातृकायाः

प्रभावेनैवं दोषं तस्माज्ज्ञेयः प्रयत्नतः॥ ४॥ ॥इति स्वरोदये प्रथममातृकाचक्रं षोडशं॥ १६॥

अथद्वितियमातृकाचक्रं सप्तदश॥१७॥ द्वादशोर्ध्वगतारेखा पंचरेखाश्चतीर्यगाः॥ मातृकोष्ट
स्तरेत्तत्र षंढांतस्वरवर्जितान्॥१॥ कोष्टकादौ
४७ लिखेदंकान् पंचयुग्मेत्रिकेत्रिकं॥ षट्‌द्वंद्वमष्टक
त्रीणि नवैकैकं तथैवच॥२॥ नामवर्णस्य यासं
ख्यामात्रासंख्यातथैवच॥ पिंडितानवभिर्भक्ता राम
जयोमात्राधिकेरणे॥३॥ इतिस्वरोदये द्वितियमातृका ४७
चक्रंसमाप्तं॥१७॥

अथतृतियमातृकाचक्रंअष्टादश॥१८॥ मनु मार्तंडदोर्बाण५ तिथ्ये१५श्व७रस६ द्विगजाः
नवांतास्तध्रुवः स्थाप्यपंचस्वरकरचादितः॥१॥ ऊ-नर्णोनहकारांतान् नवधाकोष्टकः क्रमैः॥ ना
ममात्रास्वरांकैक्यं सप्तशेषाधिकेजयः॥२॥ इतितृतियमातृकाचक्रं॥१८॥ ॥

अथचतुर्थमातृकाचक्रंऐकोनविंशतिः॥ भुवना१४
दित्य१२ दोर्बाण५ तिथि१५ वेद४ श्व७ दिक्१० र
सान्६ वसु८ नंदादिकान्लिख्य षंढांत्योज्झित
मातृकान्॥१॥ पुंन्नामवर्णमात्राणां स्वांकयोगेष्टशे
षिते॥ मात्राधिको जयी युद्धे मात्राहीनः पराजयी॥२
इतिचतुर्थमातृकाचक्रं एकोनविंशतिः समाप्तः॥१९॥
अथस्वरोदये विजयचक्रं विंशतिं॥ अथसारतरंव
क्ष्येत्तंपराचार्यभाषितं॥ जयः पराजयो येन नामोत्था

स्वरोदय· रणतस्फुटौ ॥१॥ लग्नालग्नविभेदेन शोषाघोषक्रमेण च ॥ प्रवेशे निर्गमाभ्यां च क्रमाज्जयपरा
जयौ ॥२॥ पवर्गाश्चाप्युकाराश्च लग्नाख्यानक्षरान्विदुः ॥ उक्तवर्णान्यवर्णास्तु रलग्नाः प
४८ रिकीर्तिताः ॥३॥ वर्गे त्रिचतुरा घोषाः पंचमाश्च स्वरास्तथा ॥ आद्या द्वितीया वर्गाणामघोषाः शष
सैः सह ॥४॥ वायुप्रवेशकालस्या प्रवेशश्वाससंनिर्गमः ॥ निर्गमाख्यस्ततो ज्ञेयो नामोच्चारणतो
जयः ॥ इति स्वरोदये विजयचक्रं विंशतितं समाप्तं ॥ २० ॥ ॥ अथ तोरणचक्रं एकविंश राम
नाडीचतुष्टयं चक्रं लिखित्वा तोरणाकृतिः ॥ न्यपक्षं क्षान्यसेद्वानि प्रवेशे निर्गमे तथा ॥१॥ स्तंभ ४८
मूले स्थितान्यंशे सिंहद्वारे तथा ष्टकं ॥ मालायामष्टकं तत्र चतुर्धिष्ण्यानि तोरणे ॥२॥ निर्गमे च य
दा चंद्रः प्रवेशे यदि भास्करः ॥ तत्र काले शुभा यात्रा प्रवेशे विघ्नकारका ॥३॥ चंद्रप्रवेशं क्रक्षस्थो
निर्गमस्थे दिवाकरः ॥ वधबंधन यात्रा च प्रवेशे तत्र शोभना ॥४॥ चंद्रादित्यौ प्रवेशर्क्षे अथवा नि

र्गमस्थितौ ॥ मिश्रं फलं भवेत्तत्र प्रवेशे चाथ नि
र्गमे ॥५॥ क्रूरग्रहयुतश्चंद्रः प्रवेशे चाथ नि
र्गमे ॥ तद्दिने भूभुजां चैव निषिद्धा राजपरिक्र
॥६॥ प्रवेशो द्विविधा तथ्यां भूभुजां राजपरि
का ॥ शुभग्रहयुते चंद्रे सिंहद्वारभसंस्थिते
॥७॥ साभ्रे सौरिर्नृपं हंति सिंहे सौरे च विग्र
हः ॥ मालास्थिते च लं राज्यं तोरणे सर्वसिद्धि
दः ॥८॥ ॥ इति स्वरोदये तोरणचक्रं एकविंशं समाप्तं ॥ २१ ॥ ॥

स्वरोदय अथशशिसूर्यकालानलचक्रं द्वाविंशं॥ द्वादशारं लिखेच्चक्रं मेषादिद्वादशान्वितं॥ क्षे
त्रयुग्मं च तत्रैव ज्ञेयं भास्करचंद्रयोः॥१॥ सिंहादिमकरांतं च भा
४९ नुक्षेत्रमुदाहृतं॥ कुंभादिकर्कपर्यंतं चंद्रक्षेत्रं न संशयः॥ २॥ चं
द्रक्षेत्रे गते सूर्ये चंद्रे तत्रैव संस्थिते॥ यायिनो विजयं युद्धे स्थायि
नो भंगमादिशेत्॥ ३॥ सूर्यक्षेत्रे गते चंद्रे सूर्ये तत्रैव संस्थिते॥ या राम
यि भंगं समायाति स्थायिनो विजयो भवेत्॥ ४॥ सूर्ये सूर्याग ४९
संयुक्ते चंद्रे चंद्रांगसंस्थिते॥ तदा कालं भवेत्संधिर्युधं तस्य वि
पर्यये॥ ५॥ कर्तर्यां यदि चंद्रार्कौ संहारः सैन्ययोर्द्वयोः॥ यात्रायां युद्धकाले च चक्रमेतद्विलोकये
त्॥ ६॥ ॥ इति स्वरोदये शशिसूर्यकालानलचक्रं द्वाविंशं॥ २२॥ ॥

अथ संघट्टकालानलचक्रं त्रयोविंशं॥ अश्विन्यादि लिखेच्चक्रं सप्तविंशतितारकाः॥ त्रिको
णं नवभिर्वेधः कर्तव्यास्तिर्यगाकृतिः॥१॥ अश्विनी रेवती वेधो वेधः स्वाश्विनि ज्येष्ठयोः॥ मूपौष्णे घा
मघाश्लेषा आश्लेषा मूलयोस्तथा॥ २॥ एवं संघट्टचक्रेस्मिन्कार्ये ऋक्षगता ग्रहाः॥ भूपनाम
र्क्षसंघट्टे युद्धं भवति नान्यथा॥ ३॥ निर्वेधं सौम्यवेधे च युद्धं नास्ति नराधिपे॥ क्रूरवेधे भवे
युद्धं तत्काले घोरदारुणं॥ ४॥ खराश्वगजमेषश्वजंबुकौ सिंहमयूरकाः॥ कंकहंस अमी
तत्र भवंति प्रायशो किल॥ ५॥ सूर्यभाद्देदभं गण्यं यत्र पातस्तु तत्र ते॥ शनि भौमार्क पातानां
शशिविद्धं तु यद्दिने॥ तद्दिने जायते युद्धं तत्काले घोरदर्शनं॥ १॥ ग्रहवेधयुते पाते पातोपग्रह
संयुते॥ पातपातसमायोगे संग्रामं दारुणं भवेत्॥ २॥ युद्धकांक्षी भवेद्राजा तस्य भंगं क्रूरवे

स्वरोदय· धितं॥ युद्धे द्वेषी भवेत्सौम्यैस्तथा वेधविवर्जिते॥ सौम्यक्रूरविभागेन मित्रामित्रक्रमेण च॥ वक्रा
तिचारगत्या च युद्धं स्वल्पाति नास्ति च॥ ६॥ ॥ इति संघट्टकालानलचक्रं त्रयोविंशं॥ २३॥
५० अथ कुलाकुलं चतुर्विंशं॥ द्वितीया दशमी षष्ठी कुलाकुल उदाहृताः॥ विषमा अकुलाः सर्वा शे
षाश्च तिथयः कुलाः॥ १॥ रविश्चंद्रो गुरुः शौरीश्चत्वारोऽथ कुला मताः॥ भौमशुक्रौ कुलाख्यौ च
बुधवारः कुलाकुलः॥ २॥ रौद्रं शतभिषा मूलमभिजिच्च कुलाः कुलं॥ मासनामाकुलाः सर्वे शेषाश्च राम
कुलसंज्ञकाः॥ ३॥ तिथिवारे च नक्षत्रे अकुले यायिनो जयं॥ कुलाख्ये स्थायिनो नूनं संधिश्चैव ५०
कुलाकुलं॥ ४॥ ॥ इति कुलाकुलं चतुर्विंशं॥ २४॥ ॥ अथ कुंभचक्रं पंचविंशं॥ कुंभाका
रं लिखेच्चक्रं तिर्यक्रेखैकभेदितं॥ तस्याश्चोर्द्धमधो ऋक्षाः एकैकांतरगाः क्रमात्॥ १॥ भानुभा
द्विन्यसेत्तत्र रिक्तपूर्णमिति क्रमात्॥ एवं राशिक्रमेणापि रिक्तपूर्ण इति द्विधाः॥ २॥ रिक्ते रिक्ता

भवेद्यात्रा पूर्णे यात्रा शुभावहा॥ इति यात्राफलं ज्ञेयं कुंभचक्रद्वयाश्रितं॥ ३॥ ॥ इति कुंभचक्रं
पंचविंशं॥ २५॥ ॥ अथ गूढकालानलचक्रं षष्ठविंशति॥ सप्तरेखोद्भवं चक्रं चंद्रभाद्यभ
मंडलं॥ लिखित्वा कल्पयेच्चक्रं षडंगं जयकारकं॥ १॥ दिनर्क्ष्याद्गण्यते चक्रे गूढसंपुटकर्त्तरी
दंडं कपालकं वज्रं ज्ञातव्यं स्वरवेदिभिः॥ २॥ यत्रर्क्षे स्थितश्चंद्रस्तदादि त्रीणि गूढकं॥ संपुटे च
भान्यत्र कर्त्तरी तु ततस्त्रिभिः॥ ३॥ दंडे धिष्ण्यानि च त्रीणि कपाले सप्तऋक्षकं॥ वज्रांगे त्रीणि धि
ष्ण्यानि षडंगेष्विति निर्णयः॥ ४॥ यदंगे नाम नक्षत्रं युद्धकालस्य जायते॥ वक्ष्ये शुभाशुभं तस्य
गूढकालानलस्थितः॥ ५॥ गूढस्थे विभ्रमो युद्धे जयो भवति संपुटे॥ कर्त्तर्यां सक्षतेः पुत्थं दंडे भ
गो न संशयः॥ ६॥ कपालस्थे भवेन्मृत्युर्वज्रे तस्य महद्भयं॥ गूढकालानलं चक्रं मुक्तं चैवादि

स्वरोदय यामले॥७॥ ॥इतिगूढकालानलचक्रं षडविंशं॥२६॥ ॥अथप्रस्तारचक्रं सप्तविंशं॥
त्रयोदशोर्द्धगारेखातिर्यक्रेखागतातथा॥युकोष्टकास्तत्रसंख्यया१४४शतं॥कवर्गेनवधा
५८ लिख्यकोष्टकेप्रथमेष्टमे॥द्वितीयेसप्तकेचाउ्या१४षान्यसाखिषष्टके॥२॥यस्यवर्गोचतुर्थे
चअवर्गेपंचमेतथा॥नवद्वादशकेतयाःशेषोपाद्याद्विकोष्टके॥३॥चतुरक्षरसंयोगेअश्वि
न्यादिक्रमेणच॥ज्ञेयानवांशगावर्णामेषादिराशिमंडले॥४॥भौमंशुक्रंबुधंचंद्रंभानुसौ राम
म्यंसितंकुजं॥गुरुसौरेंशनिजीवविदध्यात्कोष्टकोपरिः॥५॥तदाधीनं०बलंसर्वंत्काभाला ५९
भंजयादिकं॥कोष्टाक्षरगताज्ञेयाश्चंद्रस्तात्कालसंभवः॥६॥दिनऋक्षगतानाड्यःसप्तविंश
तिताडिताः॥षष्टिभक्तेभवेत्नृक्षांतत्कालेषुगतंस्फुटं॥७॥इष्टनाड्योहताधिष्ण्यै२७षष्टिभा
गाम६०शेषकैः॥अश्विन्यादिंदुभुक्तेनयुतेतात्कालचंद्रमाः॥१॥अपरश्लोकछइंक्रूरक्षेत्र
गतेचंद्रेघ्यशुभंसर्वकर्मसु॥शुभक्षेत्रेशुभंत्येवंप्रस्तारेचंद्रनिर्णयः॥९॥नाडिफलेपशो
वर्गोअवर्गोदिनफलोदयः॥कःपक्षेणचमा
सेनटऋतुतायनादयः॥१०॥प्रश्नकाले
विवाहेवाजानेजन्मनिशंकरे॥शशीक
स्यफलंश्रेष्टंस्वरशास्त्रेषुगोपिते॥११॥
इतिप्रस्तारचक्रंसप्तविंशं॥२७॥ ॥
अथतुंबरचक्रंअष्टविंशं॥प्रस्तारंद्वादशेच
ऋक्षाक्षरक्रमेणच॥नवांशराशिमार्गेणचक्रं

भवतितुवरं॥१॥यत्रमेषादिराशिस्थस्तत्काले
दुःखजायते॥ग्रहादृष्टिवशात्सर्वंज्ञेयंतस्मा
त्शुभाशुभं॥२॥त्रिदशेपंचमेधर्मेचतुर्थेऽ
ष्टमसप्तमे॥पादवृध्यानिरीक्ष्यंतेप्रयच्छंतिफ
लंतथा॥३॥ऊर्द्धदृष्टिचभौमार्कौतिर्यंचौ
क्षिसितौबुधः॥सम्यदृष्टिचजीवेंदुराहुमं
दावधामुखौ॥४॥मेषवृषमथाकन्याकर्क
मीनतुलास्तथा॥आदित्यादिग्रहैरुच्चानीच
पंचस्यसप्तमं॥५॥परमोच्चदिशोरामाअष्टा

विंशतिथौद्वयः॥अष्टाविंशतथाविंशसूर्यादीनांतथांशका॥६॥परमोच्चात्पदंनीचंअर्द्ध
चक्रांशसंख्यया॥नीचस्थानाक्रमेणोच्चमुक्तोयोयत्रखेचरः॥७॥उच्चानीचाद्वयंतु
र्यंसमस्थानंतदुच्यते॥उच्चनीचसमस्थानेचंद्रंज्ञात्वाफलंवदेत्॥८॥उच्चस्थाने
स्थितंचंद्रंभामादित्यौप्रपश्यतः॥समस्थानेचगुर्विंदुनीचस्थेराहुसूर्ययोः॥९॥बुध
शुक्रौत्रिकोणेनचंद्रंतात्कालसंभवं॥अन्यत्रस्थंनपश्यंतिजात्यंधाइवखेचराः॥१०॥
सौम्यदृष्टिस्थितेचंद्रेसर्वंभवतिशोभनं॥क्रूरदृष्टिगतेपुंसांमृत्युहानिर्महद्भयं॥११॥
एवंशुभयुतेचंद्रेसर्वंसौम्यंप्रजायते॥क्रूरंक्रूरफलंतत्रमिश्रेमिश्रंनसंशयः॥१२॥रक्तं
पीतंकृष्णंचचंद्रेवर्णेचंद्रंचतुष्टयं॥ज्ञातव्यंतुप्रयत्नेनप्रश्नकालेसदाबुधैः॥१३॥रविभौम

शुक्रसौम्यागुरुः शौरिः शशीतमः ॥
वर्गेशाय कवर्गादौ ग्रहाज्ञेयाविच
क्षणैः ॥ स्यांतारविकुजौरक्तौर्पथौ
जीवबुधौग्रहौ ॥ शशिशुक्रौ सितौ
वर्णैरक्तत्वं राहुमंदयोः ॥ १५ ॥ यस्य
वर्गाक्षरे चंद्रस्तस्यवर्गाधिपाग्रहः
ग्रहवर्णेन वर्णश्च शशांकस्य प्रजा
यते ॥ १६ ॥ रक्तचंद्रे भवेद्युद्धं कृष्णे
मृत्युर्नसंशयः ॥ पितेशुभं विजानिया

न्सितेशुभतरंफलं ॥ १७ ॥ ॥ इतितुंबरचक्रं अष्टविंशं समाप्तं ॥ २८ ॥ ॥
अथद्वादशारंतुंबरवेधचक्रं एकोनत्रिंशं ॥ छश्रेयः ॥ द्वादशारंलिखेचक्रं नाडिकैकात्रितं
पुनः ॥ पंचमे पंचमेस्थाने तिर्यग्वेधं तथा कुरु ॥ १ ॥ अष्टोत्तरशतं चैवं नाडिसंख्या प्रजायते
अंशाक्षराणि चक्रस्य नाडिकाग्रेषु विन्यसेत् ॥ क्रूरवेधाक्षरे चंद्रो यदा तत्कालसंभवः ॥ तदा
तस्य फलं वक्ष्ये विवाहादि शुभाशुभं ॥ ३ ॥ विवाहे क्रूरवेधे न वैधव्यं च विशालता ॥ यात्रायां च
भवेद्धानिर्मृत्युभंगो महाहवे ॥ ४ ॥ सर्वहानिकराक्रूराग्रहाः सौम्याः फलार्द्धदाः ॥ आदौवेधो
भवेद्यत्र मृत्युस्तस्य न संशयः ॥ ५ ॥ तत्कालेंदुफलं सर्वं यदुक्तं चादियामले ॥ गोपितं न्यशा
स्त्रेषु मयाचात्र प्रकाशितं ॥ इतिद्वादशारंतुंबरवेधचक्रं एकोनत्रिंशं समाप्तं ॥ २९ ॥ ॥

अथ भूचरखेचरचक्रं त्रिंशं ॥ अधस्थं भूचरं चक्रं ऊर्द्ध्वं चक्रं तु खेचरं ॥ स्थिरचक्रविभागेन स्थायी
यायीबलं क्रमात् ॥ १ ॥ मेषादि द्वादशारेव वाममार्गेण भूचरं ॥ तस्योर्द्ध्वे खेचरं चक्रं सव्यमार्गेण वि
न्यसेत् ॥ २ ॥ ये ग्रहा राहुमार्गस्था भूचक्रे ते व्यवस्थिता ॥ सूर्यमार्गेण ये लग्ना खेचरा खेचरस्थित
॥ ३ ॥ भूचक्रे संस्थिते पापैः खेचक्रे सौम्यखेचरैः ॥ स्थायियायिबलं ज्ञेयं क्रमात्स्वरविचक्षणैः ॥ ४
सौम्याश्च खेचरे चक्रेः क्रूराः खेचरगा यदा संहारो जायते तत्रः सेनयोरुभयोरपि ॥ ५ ॥ भूचरे खे
चराः सर्वे सौम्याः सौम्यगता नदाः ॥ स्थायिनो बलसंवर्तो यायी जयति सक्षतः ॥ ६ ॥ भूचर
स्था ग्रहा यत्र दृश्यंते च शुभाशुभाः ॥ यायी संहारमायाति स्थायी वार्द्धक्षये जयी ॥ ७ ॥ खेचरे
खेचरा सर्वे सौम्याः सौम्यगता नदा ॥ स्थायिनो बलसंवर्तो यायि जयति सक्षतः ॥ ८ ॥ भुचरे खेच
रे चक्रे यदा मिश्रा शुभाशुभाः ॥ तदा मिश्रफलं वाच्यं स्थायिनो यायिनापि वा ॥ ९ ॥ ॥ इति भूचर
खेचरस्चक्रं त्रिंशं ॥ ३० ॥

अथ पथचक्रं एकत्रिंशं ॥ अश्विन्यादीनि धिष्ण्या
नि पंक्ति मुक्तानि लिख्यते ॥ नाडीचतुष्टये वेधः
सर्पाकारं पथात्मके ॥ १ ॥ क्रूरवेधस्थिता नाडी
तधिष्ण्येन युतो दिने ॥ यात्रा युद्धं न कर्तव्यं पथच
क्रे लिदं फलं ॥ २ ॥ इति पथचक्रं एकत्रिंशं ॥ ३१ ॥
अथ नाडिचक्रं द्वात्रिंशं ॥ आर्द्रादिकं लिखे चक्रं मृगांत
चतुर्नाडिकं ॥ भुजंगसदृशाकारं मध्ये मूलं प्रतिष्ठितं ॥
१ ॥ यद्दिने एकनाडिस्था श्चंद्रनामार्क्षभास्कराः ॥
तद्दिनं वर्जयेत्तस्य विवाहे विग्रहे रणे ॥ २ ॥ इति नाडिच
क्रं ॥ ३२ ॥

स्वरोदय· अथद्विनाडिचक्रंत्रित्रिंशं॥अश्विनाद्यंलिखेच्चक्रंसर्पाकारंत्रिनाडिकं॥तत्रवेधवशाज्ज्ञेयंविव
ह्यादिशुभाशुभं॥१॥द्विनाडिवेधनक्षत्रंअश्विरौद्रःपुनोनरा॥हस्तोद्रमूलवारुण्यःपूर्वाभाद्रप
५५ दातथा॥२॥याम्यसौम्यगुरुर्येन्द्राचित्रामैत्रतथास्वातिविशाषकेः॥उत्ताचश्रवणंपूषाएकना
डिव्यवस्थिताः॥३॥अश्वादिनाडिवधर्क्षेष्वेकद्वितीयकंक्रमात्॥याम्यादितुर्यतुर्यंच
कृत्तिकादिद्विषट्कं॥४॥एवंनिरीक्षतेवेधंकन्यामित्रेगुरौसुरे॥पण्यास्त्रीस्वामिमि राम
त्रेषुदेशेग्रामेपुरेगृहे॥५॥एकंनाडिचक्रक्षाणियदास्युर्वरकन्ययोः॥तद्वेधंविजानी ५५
यात्गुर्वादिषुतथैवच॥६॥प्रकटंतस्यनामर्क्षंतस्यजन्मर्क्षतोव्यधः॥प्रनष्टंजन्मभंज
स्यतस्यनामर्क्षतोवदेत्॥७॥द्वयोर्जन्मभयोर्वेधोद्वयोर्नामभयोस्तथा॥जन्मनामर्क्ष
योर्वेधोनकर्तव्यकदाचन॥८॥एकनाडीस्थितादुष्टाभर्तुश्चैवकुलांगना॥तस्मान्नाडिव्यधो

वीक्ष्येद्विवाहेशुभमिच्छता॥९॥द्विनाडिवेधतोभर्तामध्यनाडीव्यधेद्वयो॥एकनाडिव्यधेकन्याम्रिय
तेनात्रसंशयः॥१०॥समासन्नव्यद्विशीघ्रंदूरवेधाच्चिरेणतु॥वेधांतरसमानेनवर्षैर्दुष्टंप्रजायते॥११॥
एकर्क्षेजायतेतत्रविवाहेवरकन्ययोः॥मूलवेधोभवेधोत्रमहद्दुष्टफलप्रदः॥१२॥एकनाडीस्थि
तायत्रगुरुमंत्राश्चदेवताः॥तत्रद्वेषंरुजंमृत्युक्रमेणफलमादिशेत्॥१३॥प्रभुःपण्यांगनामित्रं
देशंग्रामंपुरंगृहं॥एकनाडिगताभव्याविरुद्धावेधवर्जिताः॥१४॥क्रूरग्रहगतानाड्योयस्यजन्म
र्क्षसंभवा॥तस्यमृत्युर्नसंदेहोयात्रायुद्धेरुगुद्भवा॥१५॥द्यादिक्रूरव्यधोयस्यचक्रेचैकत्रनाडिके॥
हानिर्विघ्नंभयंक्लेशोजायतेवधबंधनं॥१६॥एवंसौम्यव्यधोयस्यजन्मऋक्षेप्रजायते॥जयंलाभंसुखं
तस्यजायतेनात्रसंशयः॥१७॥शुभाशुभैर्ग्रहैर्विद्धायस्यजन्मर्क्षनाडिका॥तस्यमिश्रफलंवाच्यंनाडिचक्रेस्व
रज्ञकैः॥१८॥

एतच्चक्रंसमालिख्यअश्विनाद्येद्विपंक्तितः॥वेधोह्यादत्रनाडिभिःकर्तव्यंपन्नगा
कृतिः॥२०॥आद्यंशेनचतुर्थांशंचतुर्थांशेनचादिमं॥द्वितीयेनतृतीयंतुतृतीये
नद्वितीयकं॥२१॥एवंभागांश्यधोएषां•जायतेवरकन्ययो॥तेषांमत्स्फनंसंदेहोशे
षांशास्वरमत्स्फदा॥२२॥गुरुमंत्राश्वदेवाश्चवेधांशास्थानशोभनाः॥अन्यांशक
गतोनव्याज्ञातव्यासर्वेराबुधे॥२३॥युभुपण्यांगनामित्रंदेशंग्रामंपुरंगृहं॥अंश
येधेस्थितंभयंविरुद्धंवेधवर्जितं॥२४॥एवंजानातिपश्चक्रेचक्रंराजित्रिनाडि
कं॥तस्यपाणिजलेज्ञानंसर्वदैवहितिष्टति॥२५॥इतिद्विनाडिचक्रं॥ छ ॥
नवोर्ध्वगानिधिष्ण्यानिनवतिर्यग्गतानिच॥अधोगतानिधिष्ण्यानिनवचैवविनि

स्वरोदय दिशेत् ॥१॥ चतुर्नाडिकृतो वेधो मध्ये नक्षत्रयोजितः ॥ सर्पाकारः स्वरक्षत्र कालचक्रे प्र
जायते ॥२॥ त्रिणि मध्यगऋक्षाणी तानि कालमुखानि च ॥ कोणस्थिते च एधिष्ण्ये नरवदं
५८ ष्ट्रा चयमतं ॥३॥ दिनर्क्षमादितः कृत्वा नामर्क्षं यत्र संस्थितः ॥ मुखदंष्ट्रागते मृत्युः शुभ
मन्यत्र संस्थिते ॥४॥ दृष्टे नष्टदुष्टस्य विवादे विग्रहे रणे ॥
देविग्रहे रणे ॥ कालदंष्ट्रस्यगं नाम यस्य तस्य राम
महद्भयं ॥५॥ इति कालचक्रं ॥ ५ ॥ ५८
सप्तविंशति भान्यत्र पंक्तियुक्त्या क्रमेण च ॥
अंतरं त्र्यंतरं विद्वान् फणिचक्रं त्रिनाडिकं ॥१॥
यत्र ऋक्षस्थितो भानुस्तदादी गणयेद्बुधः ॥ ना

मऋक्षं स्थितं यत्र ज्ञेयं तत्र शुभाशुभं ॥२॥ कुर्यान्मृत्युश्च रोगं च नाडिवेधगतारुणां ॥
वर्जयेत्सर्वकार्येषु युद्धकाले विशेषतः ॥३॥ निर्वेधऋक्षमध्यस्थं यस्य नाम प्रजाय
ते सिध्यंति तस्य कार्याणि संग्रामे विजयो भवेत् ॥४॥ सूर्यफणिस्वरचक्रं ॥ ६

सूर्यफणीस्वरं चक्रे यदुक्तं च शुभाशुभं ॥ चंद्रे रोतफलं सर्वं ज्ञेयं चंद्रफणीस्वरे ॥१॥
इति चंद्रफणीश्वरचक्रं ॥ ७ ॥ हीनसैन्यसदा स्थायी यायी सैन्याधिकः स

अबलस्यबलोपायं वक्ष्येहं कविसंगरे ॥१॥ प्रयाणे उत्थयाणे च निशीथे मृगयागमे शा-
काते व्यसने प्राप्ते दत्ते सैन्ये निनायके ॥२॥ अष्टधा कविकालस्तु कथितो दुर्बले नृपे ॥ इ-
ति कुर्वन्परान्युद्धे जयंतीह न संशयः ॥३॥ चतुरस्रं त्रिना । डीकं कविचक्रं लिखेद्बुधः ॥ प्र-
वेशे निर्गमे भानी स्थानधिष्ण्यादि विन्यसेत् ॥४॥ यत्र नामऋते स्थाने शत्रुसैन्यं व्यवस्थि-
तं ॥ तत्र चक्रं समालिख्य सनाध्यक्षभपूर्वकं ॥५॥ त्रिणि त्रीणि प्रवेशे च दिशादौ विलिखे-
त्क्रमात् ॥ निर्गमे तूर्यं तु येक पूर्वाशादिक्रमेण च ॥६॥ सौम्यक्रूरा ग्रहास्तत्र प्रवेशे निर्ग-
मे स्थिताः ॥ वक्रातिचारगास्तत्र ज्ञात्वा कविरणे वदेत् ॥७॥ जीवपक्षे स्थिते चंद्रे अकुभ-
र्क्षे प्रवेशकैः यानं कविरणं प्रोक्तं ज्ञात्वा प्रवेशनिर्गमे ॥८॥ उदयास्तौ वरो यस्य तस्य
जन्मेदु संभवः ॥ तद्दिने ते भये सर्वे वर्जनीयाः कवीरणे ॥९॥ क्रूरे सिद्धे प्रवेशे च यत्र तत्र वि-

शेद्रणे ॥ वक्रस्थे निर्गमे सौम्ये तद्दिशा निर्गमे कुरु ॥१०॥ प्रवेश भे प्रवेशं च निर्गमे निर्गमं
तथा ॥ भूबलं पृष्टतः कृत्वा प्रोक्तः कविरणे जयः ॥११॥ इति कविचक्रं ॥ छ ॥

चतुरस्रं चतुर्द्वारं खलचक्रं लिखेद्बुधः ॥ नंदाद्याः
स्तिथयो न्यस्य पूर्वद्वारक्रमेणं च ॥१॥ पूर्वाद्यादि
चतुष्केषु सप्त सप्त लिखेद्बुधः ॥ कृत्तिकादि लिखे-
न्मध्ये खले भान्यष्टविंशतिः ॥२॥ शनिचंद्रौ कु-
जः सौम्यो भानुश्शुक्रो बृहस्पतिः ॥ मध्ये बाह्ये
नाद्येया अपसव्ये दिशाक्रमे ॥३॥ यद्दिने यदि

स्वरोदय शिस्थुस्ते तिथिधिश्च आदिनाधिपाः॥प्रवेशः खलकद्वारे कर्तव्यस्तेन संशयः॥४॥
खलकाभ्यांतरे कालेः शनिसूर्यार्य मंडले॥बुधशुक्रेंदुभिर्बाह्ये स्थायीजायीक्र
५९ माजयी॥५॥खलके मध्यनक्षत्रे यो ग्रहो यत्र संस्थितः॥तत्र स्थान गते ज्ञेके
फलं वक्ष्ये शुभाशुभं॥६॥सूर्यस्थान स्थिते सोरी मृत्युश्चंद्र सभमाश्रिते॥
भौमस्थाने महाक्रोधी बुधस्थाने महद्भयं॥७॥गुरुस्थाने स्थितस्त्राणु भौ राम
मायोहि भार्गव॥शनिस्थे सक्षयं युद्धं राहुस्थे मरणं ध्रुवं॥८॥ यक्रस्थाने भ ५९
वेद्भंगः शीघ्रस्थाने च धावती॥समाचरगते स्थायी क्षणेन दुस्थे व गूहनं॥९॥क्रू
रे पृष्ठे जयो युद्धे सोम्य पृष्ठे पराजयः॥क्रूरे संमुखगे मृत्युर्जय सोम्य ग्रसं
स्थिते॥१०॥योधयो पृष्ठगः क्रूराः उभयो वेधकारकाः॥सोम्याः सधिप्रदा युद्धे

मिश्रामिश्रफलप्रदाः॥११॥इतिखलचक्रं॥५५॥ ६ ॥अथातः
संप्रवक्ष्यामी कोटयुद्धस्य निर्णयः॥स्त्राकारी कुरुते
यत्र भूरिसैन्यपराजयं॥१॥यस्याश्रयबलादेय
राज्यं कुर्वंति भूतले॥विग्रहे चतुराशास्तु शीमालेश
त्रुभिः सह॥२॥विषमं दुर्गमे घोरं वक्रभिरुभयो
र्हं॥ कपिशीर्षैश्च शोभाढ्यं रौद्रा द्दालकमंडि
तं॥३॥प्रतोली यस्य कालस्य परिषा कालरूपि
णी॥रणमंडकतारोपं दिकुली यंत्रयंत्रिकं॥४॥

स्वरोदय मुसलैर्मुद्गरैः पाशैः कुंतखड्गैर्धनुःशरैः॥ संयुक्तं स्कंभटैः शूरैः रितिदुर्गं विनिर्दि
शेत्॥५॥ दुर्गस्थे दुर्गमः शत्रुः रसाध्यो येन जायते॥ कोटचक्रं भणिष्यामी वि
६० शेषाद्दुष्टधात्मसा॥६॥ प्रथमं मृन्मयं कोटं जलकोटं द्वितीयकं॥ तृतीयं ग्राम
कोटं च चतुर्थं तत्र गह्वरं॥७॥ पंचमं गिरिकोटं च षष्ठं कोटं च डांबरं॥ सप्त
मं वक्रभूमिस्थं विषयाख्यं तथाष्टमं॥८॥ मृन्मये साधये खंडिं जलस्थे रम
मोक्षबंधनं॥ ग्रामदुर्गे भिदा घं च भवे शेग ह्वरस्य च॥९॥ पर्वते स्थानभे ६०
दं च भूबलं डांबरे रणे॥ वक्राख्ये कपियोगं च विषये स्थापियायीना॥१०॥
अतिदुर्गं फालकर्णं चक्रावार्तं चक्रावार्तं चडुंबरं॥ तालपर्त्तं च पद्माख्यं यक्षभेदं
च सर्वतः॥११॥ एतन्नामाष्टकं ज्ञेयं वर्गाष्टकक्रमेण च॥ यस्य वर्णस्य यो भक्षः सर्वगः तस्य

भंगदाः॥१२॥ अ गरुडः क मार्जारः च सिंहः ट श्वनिः त सर्पः प आखु विज्ञेयो य मृगः
श अजात्मजः॥१३॥ दुर्गवर्गस्य ये भक्षा वर्गास्ते नामगा नराः॥ न दुर्गेन रणे त्याज्या व
र्तव्या गडाधिपाः॥१४॥ खवर्गात्पंचमस्थाने खंडिभंगश्च जायते॥ अवर्गाद्यष्टकं
ज्ञेयं पूर्वाद्यष्टदिशाक्रमे॥१५॥ कोटचक्रं लिखेत्यादि चतुरस्रं त्रिनाडिकं॥ कृत्तिका
दिनी धिष्ण्यानी साभिजित्तत्र दापयेत्॥१६॥ बहिः कोटे च मध्ये च दुर्गे दुर्गे बहिर्बहिः
प्रवेशो निर्गमः स्तत्र ज्ञातव्यः स्वरवेदिभिः॥१७॥ बहिर्द्वादश भान्येवं प्रकारस्तारकाष्टकं
दुर्गमध्यं तथा चाष्टौ तन्मध्ये स्तंभतुर्यकं॥१८॥ कृत्तिका पुष्यसार्प्पेषु मघास्वातिविशा
खिके॥ अनुराधाभिजित्कर्णे धनिष्ठाश्च यमादिकं॥१९॥ आर्द्रा पुनर्वसुः पूर्वा चित्राज्ये

स्वरोदय ष्ठा तथोत्तरा॥ शतभं रेवतीचैव आकारे तारकाष्टकं॥२०॥ मृगरौद्रोत्तराहस्तमूलमा
षाढपूर्विका॥ पूर्वोत्तरा तथा भद्रामध्ये ऋक्षाष्टकं त्विदं॥२१॥ पूर्वे रौद्रं यमे हस्तं पू
६१ र्वाषाढा च वारुणी॥ उत्तरे उत्तराभद्रा एतत्तं भचतुष्टयं॥२२॥ कृत्तिकाद्यं मघाद्यं
च मैत्राद्यं वासवादिकं॥ त्रिणि त्रीणि प्रवेशे च द्वादशान्यानि निर्गमे॥२३॥ कृत्तिका
दिरयं न्यासः सुबोधार्थं प्रदर्शितः॥ दुर्गभादृण्यते चात्र ग्रहैर्वाच्यं ततः फलं॥२४ राम
चतुरस्रं वर्तुलं दीर्घं त्रिकोणे च दीर्घकं॥ अर्धचंद्रं तथा ज्ञेयं गोस्तनं धनुषाकृ ६१
तिं॥२५॥ चतुरस्रं जथान्यासो भूमिभाग क्रमेण च॥ प्रवेशनिर्गमे स्तंभा तथा
वत्यादि सप्तकं॥२६॥ दुर्गे भित्तिविभागो नीशान्यं धिष्ण्य मंडले॥ तत्रस्थ खेचरैः स
र्वैं फलं वाच्यं यथोदिकें॥२७॥ बाह्यभे मध्यभे चापी यत्रस्था क्रूरखेचरा॥ तत्रस्था

कृतं यत्नं भक्ति दुर्गं स सैन्यकं॥२८॥ बुधशुक्रेंदुजीवाश्च सदा सौम्या ग्रहा मताः॥
शन्यर्कराहु माहेया एते क्रूरा ग्रहा मताः॥२९॥ त्रिप्रकारो ग्रहेचारो वक्रः शीघ्र समो
मतः॥ उच्चानीचासमस्ते च त्रिधा चक्रे भ्रमंति च॥३०॥ ऊर्ध्वे चाधः समास्तिर्यक दृ
ष्टिभेदः श्चतुर्विधः॥ स्वर्क मित्रारि सत्कं च विधा प्रोक्तं ग्रहे ग्रहे॥३१॥ सूर्यमुक्तो
उदीयंते शीघ्रगाश्च द्वितीयभे॥ यस्मात्तृतीयभे यांति मंदगाश्च चतुर्थगे॥३२
वक्रा पंचमषष्टे कें अतिवक्रा ष्टसप्तके॥ नवमे दशमे भानो जायते सरलाग
तिः॥३३॥ शीघ्रगाश्च भयंत्येते द्वादशैकादशे तथा॥ राहुवक्र सदा ज्ञेयो
रविंदु शीघ्रगो सदा॥३४॥ शीघ्रो तिचारगत्वा च समश्च सममंदया॥ वक्रा

स्वरोदय

तिवक्रकौटिल्यगत्यावक्रग्रहोमतः॥३५॥ क्रूरोतिक्रूरतांयातिसौम्येयातिस्वसौम्यतां॥

वक्राचरेसमुत्पन्नेशीघ्रेप्येयंविपर्ययः॥३६॥ मेषोटषोम्टगंकन्याकर्कमीनतुलादयः॥

६२ आदित्यादिग्रहेरुच्चंनीचंयद्यस्यसप्तमं॥३७॥ उच्चानीचाच्चयत्तुर्यसमंस्थानंतदुच्यते॥

उच्चस्थंमध्यमंनीचंवक्रेयत्रव्यवस्थितं॥३८॥ ऊर्ध्वदृष्टीचभौमार्केकेकरोबुधभार्गवौ॥

समदृष्टीचजीवेंदूशनिराहूतलधोमुखौ॥३९॥ स्फुटदोर्केंदुभौमार्याएवंशुक्रज्ञभानुजाः॥ रम

अन्योन्यवैरिणोह्येनेराहोःसर्वेचशत्रवः॥४०॥ स्वक्षेत्रस्थेफलंसर्वंपादोनंमित्रभेग्रहे॥ ६२

शत्रुक्षेत्रेफलार्धंचज्ञात्वातेयंबलाबलं॥४१॥ क्रूरागर्भेपुरंघ्नंतिप्राकारेखंडिकारकाः॥

बहिस्थावेष्टकेसैन्येमत्स्यदानात्रसंशयः॥४२॥ आदित्येजलनाशनंहिमकरेभंगाःकु

जेवन्हिभिःसौम्येबुद्धिबलंगुरौतुटगतोमध्येस्फभिष्टंजलं॥स्यात्कुजेचलचिन्तना

रविस्कन्तेरोगोरणांवास्फतिराहोभेदभयंध्वजेतुविषमंदुर्गेथवावेष्टगे॥१॥ क्रूरैगर्भेशुभा रा

बाह्यग्रह्यतेनिश्चितंपुरं॥सौम्यामध्येबहिःक्रूराअसाध्यंदुर्गमुच्यते॥४३॥ क्रूरंच

तुष्टयंमध्येप्राकारेसौम्यखेचराः॥ भेदभंगोभवेत्तत्रविनायुद्धेनगृह्यते॥४४॥ प्राकारे

स्थिताःक्रूरामध्येसौम्याग्रहायदि॥दुर्गभंगेसमुत्पन्नेभंगमायातिवेष्टगः॥४५॥ मध्य

नाडीस्थिताःसौम्याःक्रूराबहिरवस्थिताः सैन्यावर्तोबहिःशत्रोविनायुद्धेनजायते ४६॥

प्राकारेपुरमध्येचयदाक्रूराअधिष्ठिताः॥सौम्याबाह्येनदादुर्गमयत्नेनाभिसिध्यति॥

॥४७॥ सौम्यामध्यपुरेचैवबाह्येपापग्रहायदि॥युद्धंप्राकारखंडिश्चपुरेभंगोनविद्य

तेदैवेब्रह्माधिभिर्दुर्गेसंग्रामेणनगृह्यते॥४८॥ प्राकारेबाह्यगाःक्रूराःसौम्यामध्य

स्वरोदय गेतायदि॥४९॥सौम्याबाह्येतथाकोटेमध्येक्रूराग्रहाःस्थिताः॥स्वयंदुर्गंसमर्पंनिवेद्य
कस्यगढाधिपाः॥५०॥बाह्याभ्यंतरगाःक्रूराबहिरंतःशुभास्थिताः॥रिपुद्वयंक्षयंया
६३ तिविनायुद्धेननिश्चितं॥५१॥प्राकारस्थाग्रहाःक्रूराबहिरंतःशुभास्थिताः॥समयु
द्धंभवेत्तत्रखडिपातोदिनेदिने॥५२॥क्रूराक्रूराग्रहाचाष्टौप्राकारेमध्यबाह्यगाः॥
एकस्थायत्रकुर्वंतिसंग्रामंतत्रदारुणं॥५३॥गजाश्वरजभूपालाःसामंतामंडलेश्व राम
राः॥तत्राध्यक्षभटामर्थमुभयोरपिसैन्ययोः॥५४॥वामकुंतगदापातैःखड्गहतैर्महा ६३
भटैः॥अभंगयोर्द्वयोराज्ञोःसैन्यावर्तःप्रजायते॥५५॥बाहिन्योरक्तवाहिन्योदुस्त
राःप्रेतसंकुलाः॥वसास्रक्पंकलिप्तांगाअंत्रमालावगुंठिताः॥५६॥गृध्रकाकशिवा
श्येनडाकिनीप्रेतराक्षसाः॥वेतालरेपलाभूताःपिशाचाश्वेछयाद्धता॥५७॥ईदृ

शंचमहायुद्धंतत्कालेजायतेध्रुवं॥नकश्चिद्विजयीयुद्धेद्वयंयातियमालयं॥५८॥
समसंख्याशुभाक्रूराबहिर्मध्येयमास्थिताः॥तदासंधिविजानीयात्सैन्ययोरुभयोर
पि॥५९॥क्रूरैःभंगैःजयःसौम्येमिश्रैमिश्रफलंमतः॥विचार्यंकुरुतेयुद्धंकोटयुद्धे
स्वरोदयं॥६०॥प्रवेशाधिष्ण्यगेचंद्रेजीवपक्षर्क्षसंस्थिते॥निशीथकविरणेदुर्गेकर्त
व्यंबाह्यसैनके॥६१॥निर्गमर्क्षस्थितेचंद्रेतदाभ्यंतरगेन्रपे॥कर्तव्यंकविशुद्धंतु
रात्रौसक्षत्रर्हिर्जने॥६२॥प्रवेशनिर्गमोयुक्तौसैन्ययोरुभयोरपि॥कविको
टजयस्तत्रविपरीतेपराजयः॥६३॥क्रूरोवक्रःप्रवेशर्क्षेपुरमध्यस्थितोयदा॥
तदाकोटिविनाशायकोटस्थोबाह्यभूपते॥६४॥प्रवेशबाह्यगेवक्रेक्रूरेस्व

सैन्यविग्रहः॥दुर्भिक्षंम्रत्कभंगोचवह्हिसंगस्यजायते॥६५॥निर्गमर्क्षेबहिस्छेचक्रूरेवक्रं
करोतिचेत्॥वक्रगाप्ररक्षेचकथंचिक्रूरखेचराः॥६६॥दुर्गमुक्तातदाकालेदुर्गेभंग्र
यलायते॥यथाक्रूरेस्तथासौम्येफलंग्राह्यंविपर्ययं॥६७॥मिश्रेमिश्रंविजानीयात्वक्रं
६४ टवक्रेनसंशयः॥दुर्गसैन्येतथाउच्चेप्राकारंमध्यभागकं॥६८॥नीचस्थेवेष्टकंसै
न्यंज्ञातव्यंस्वरवेदिभिः॥कोटंकोटाधिपंउच्चेनिघ्नतोभौमभास्करौ॥६९॥कोट
हृदोपुरंसर्वंमुच्चस्थोनिफलौयतो॥प्राकारेवेष्टकान्हंतिउच्चस्थोराहुसूर्ययो॥
७०॥प्राकारस्थोबहिःसैन्येनीचस्थौतोयनीफलो॥समदृष्टिगुरुःश्चंद्रपस्यतः
सर्वतोयदा॥७१॥तीर्यक्स्थानेबुधःशुक्रःफलदानात्रसंशयः॥ऊर्ध्वदृष्टिग्रहः
कूर्यात्द्दिकुलीयंत्रवाहने॥७२॥चंद्रेभंगेकुजेदाघोबुधेबुधिबलानगा॥वाक्पतौ

दुर्गमध्यस्थेस्फुभिक्षंप्रचुरंजलं॥७३॥समेचसाधयेत्तंडिरंघ्रंपातमधोमुखे॥दु
र्गमध्यगतेसूर्येजलशोषप्रजायते॥७३॥चलचित्तानराःशुक्रेम्रत्करोगोशा
नैस्वरे॥राहोमध्यगतेदुर्गेभेदनंगोमहद्भयं॥७४॥केतोमध्यगतेतत्रविष
दातंगराधिपे॥इदमुक्तंफलंमध्येएवंबाह्यगतेग्रहे॥७५॥उच्चग्रहसमायोगा
दुतातंप्राणसंशय॥अकारादिस्वराःपंचपूर्वाद्याशाचतुष्टये॥७६॥मध्यांतस
व्यमालिख्यअतस्छानेचखंडिका॥दुर्गनामस्वरोयत्रबालोवास्तमितोपिवा॥७७
तद्दिनेप्रारभेत्युद्धंदुर्गंसिध्यतिनान्यथा॥वज्रार्गलविधानंतुकर्तव्यंदुर्गलक्ष
णं॥भंजतेजयमाराख्यमित्युक्तंब्रह्मयामले॥असाध्यसाधनंवक्ष्येनथासा
॥७८॥

शम ६४

स्वरोदय ध्यस्य लक्षणं ॥ ८० ॥ मंत्र यंत्र प्रभावेन यदुक्तं चाग्नियामले ॥ असाध्यसाधनं चैव तथे
थासाध्यस्य लक्षणं ॥ ८१ ॥ लेख्यमुच्चाटनं भंगो मोहनं चैव भेदने ॥ ८२ ॥ मारणे मारणं
६५ लेख्यं यंत्रे यामा गले स्फुटं ॥ शांतिकं निजनाथस्य कर्तव्यं च यथोदितं ॥ ८३ ॥ एवमेव विप
र्यस्तं कर्तव्यं दुर्गे रक्षणे ॥ द्वादशारं लिखे चक्रं रत्नत्रयविभूषितं ॥ ८३ ॥ उ ष्ट्रीं मंत्रं च न
द्वाह्ये यमश्लोकं च मध्यतः ॥ यमराज सदामेयः यमदारुणयोदयः ॥ ८४ ॥ यदयो निरयो राम
क्षयेः यक्षयो च निरामयः ॥ इदं उ ष्ट्रीं मंत्रं दशसहस्राणि जपेत् ॥ ८५ ॥ पूर्वं मधिना घृतम ६५
धुना रक्तपुष्पैः ॥ सहस्रमेकं च होमयेत् ॥ तथा यमश्लोकं द्वादशाक्षरं द्वादशसहस्राणि प्रज
येत् ॥ पूर्वविधिना सप्तशतानि होमयेत् ॥ स्तंभन मारणोच्चाटन भेद राक्षसकर्म चतु
ष्टयं करोति ॥ ॐ ह्रीं ष्ट्रीं विकृतदंष्ट्रानने ह्रीं फुट स्वाहा ॥ इति मंत्राक्षराणी ॥ ८६ ॥

चिंतागारं विषं रक्तं कृष्णोमन्नरसस्तथ॥ एतेनैराशिस्थे लेखित्यायं प्रेतपटे लि
खेत्॥ इति कोटचक्रं॥ ❀ ॥ अतःपरं प्रवक्ष्यामी चक्रं मातंगना
ज्ञानं॥ येन विज्ञानमंत्रेण यात्रायुद्धे जयो भवेत्॥ १॥ गजाकारं लिखेच्चक्रं सर्वा
वयवसंयुतं॥ अष्टाविंशति भान्यत्र देया निसृष्टिमार्गतः॥ २॥ मुखे शुंडाग्रनेत्रे च क
र्णशीर्षांहिपुच्छके॥ द्विकं द्विकं चदातव्यं पृष्ठोदरे चतुष्टयं तु॥ ३॥ द्विरदं नाम भान्यादौ
रदनाद्गण्यते बुधैः॥ यत्र ऋक्ष स्थितः सौरी ज्ञेयं तत्र शुभाशुभं॥ ४॥ मुखे शुंडाग्रने
त्रे च सौरि भं मस्तकोदरे॥ युद्धकाले गजे यस्य जयस्तस्य न संशयः॥ ५॥ पृष्ठे पादे
च पुच्छे च कर्णस्थे च शनैश्चरे॥ मस्तकं भंगो रणे तस्य ऐरावण्यसमो यदि॥ ६॥ ए
तेषां दृष्ट्वा अंगानां यकाले संस्थितः शनिः॥ तत्काले पट्टबंधोपि वर्जनीयाः स यत्नतः

पृथिव्या भूषणं मेरुः शर्वर्या भूषणं शशी ॥ नराणां भूषणं विद्या सेन्यानां भूषणं गजः ॥८॥
शरतोरणचक्राद्येगजस्कंधेहतान रः ॥ नक्षणात्स्वर्गमायांतितस्मात्स्वर्गोपमागजः ॥९॥
नास्तिहस्तिसमोयोद्धा नास्तिहस्तिसमः सखा ॥ नास्तिहस्तिसमोबंधुनास्तिहस्ति
समोरिपुः ॥१०॥ इतिगजचक्रं ॥ ॥अथस्तोतरंगचक्रं ॥
कथयामिस्फुरेस्वरे ॥ इंगितंनिपुणंज्ञात्वाहयानांराजवाहिनां ॥११॥ अश्वाका

रंलिखेचक्रं कथयामिस्फुरेश्वरे ॥ इंगितंनिपुणंज्ञात्वाहयानांराजवाहिनां ॥१२॥ अश्वाकारं
लिखेच्चक्रं अश्वधिष्ण्यादितारकाः ॥ वदनात्सक्षिगादेयाअष्टाविंशतिसंख्यया ॥१३॥ मुखा
क्षीकर्णशीर्षेषुपुछे ऽ ङ्घ्रौयुग्मसंख्यया ॥ पंचपंचोदरेपृष्टेशौरीयंत्रफलंततः ॥१४॥ मुखाक्षु
दर । शीर्षेषुयंदासौरिस्तुरंगमे ॥ तदारिभंगमायातिरणेहेषारवेरणे ॥१५॥ कर्णाद्रिपुछपृष्ठस्थे

अश्वस्यांगेर्केनंदने ॥ विभ्रमंभंगहानिश्च करोत्यश्वोमहामृधे ॥१६॥ एतत्स्थानस्थितशौरीयं
दाकालेहयस्यच ॥ पट्टबंधगतेयुद्धेवर्जयेतंहयंनृप ॥
॥१७॥ देशांतरस्थितायस्यरीषवस्तस्यशंकिताः ॥ तुरं
गायस्यभूपस्यविस्तारंतिमहीतले ॥१८॥ मेदिनीतस्य
पस्याश्वइतिवाक्यंविपश्चितां ॥ सर्वाश्रीर्नविनाखे
स्कःशोभतेजगतीभुजां ॥१९॥ इतिअश्वचक्रं

॥अथरथचक्रं ॥

आदौचक्रंसमालिख्यंरथाकारंसुशोभनं ॥ रथा

रथचक्र

व्यूहचक्र

अग्रे त्रिशूलानि चतुःश्चक्रं त्रिदंडिका ॥ १ ॥
भानुभं मध्यशूलाग्रे ततः सव्यगतानि च ॥
त्रीणि त्रीणि लिखेद्देवं सप्तविंशतिसंख्यया ॥ २ ॥
महारथिकनक्षत्रं यत्र तत्र शुभाशुभं ॥ श्री
गेमत्युजयश्चक्रे संधौ रथत्रिदंडिके ॥ ३ ॥
इति रथचक्रं ॥ ॥ अथ व्यूहचक्रं
अष्टारं वर्तुलाकारं व्यूहचक्रं त्रिनाडिकं ॥
दंडं चतुष्टयं वक्ष्ये कर्तव्यं च चतुर्दिशा ॥ ४ ॥
दंडाग्रे वर्तितो न्यस्य दिनभाद्यभमंडलं ॥

प्रवेशे निर्गमे चैव त्रीणि प्रदेत्त्रीणि पर्ययेत् क्षिणं ॥ ५ ॥
शशिसंज्ञाष्टकं मध्ये तद्बाह्ये भानुसंज्ञकं ॥ तृतीयं
राहुसंज्ञं च केतुर्दंडचतुष्टये ॥ ६ ॥ एवमुक्तं चतुष्का
नं तद्दिने यस्य नामतः ॥ तद्दिने तत्फलं तस्य सर्वकार्ये
षु सर्वदा ॥ ७ ॥ चंद्रांगे विजयो लाभः सूर्यांगे मध्यमं
फलं ॥ राहुऋक्षाष्टके विघ्नं मृत्युः केतुभानुकृये ॥ ८ ॥
इति व्यूहचक्रं ॥ ॥ अथ कुंतचक्रं ॥
कुंभाकारं लिखेच्चक्रं तीक्ष्णदंडं सशाखिकां दिश

कुंतचक्र

खड्गचक्र

मारभ्य कर्तव्यं नचकत्रयं ॥ राजभे नवकं यंत्रं तु
हृक्षे च शुभाशुभं ॥ तीक्ष्णे मृत्यूर्जयो दंडे शोषभे च
समरणे ॥ ७ ॥ इति कुंतचक्रं ॥ ॥ अथ ख
ड्गचक्रं ॥ खड्गचक्रं लिखित्वादौ नवभेदसमन्वितं
योधऋक्षात्समारभ्य त्रित्रीणि लिखेद्बुधः ॥ १ ॥ य
च्चचक्रं तथा मुष्टिं पालिकां मुष्टिधारयोः ॥ खड्गती
क्ष्णविजानीयात् नवांगानि विभागतः ॥ २ ॥ पर्व
दी यत्र बंधा ता जायते क्रूरखेचराः ॥ मृत्युर्भंगाभ
यं युद्धे सौम्यो लीभ जयस्तथा ॥ ३ ॥ खड्गधाराद्वये

तीक्ष्णे क्रूरे जयति संगरे ॥ सौम्यैस्तत्र भवेद्भंगो मिश्रे मिश्रफलं मतं ॥ ४ ॥ इति खड्गचक्रं ॥ ॥
यथा खड्गं तथा विंद्यात् छुरीकाचक्रनिर्णयं ॥ क्रूरसौम्यविभागेन योधधिष्ण्यादि विन्यसेत् ॥ १ ॥
त्रीणि बाणस्य मूले तु मध्ये मूर्ध्नि क्रमात्तथा ॥ चापस्य मूलमध्येद्धे त्रीणि त्रीणि तथा पुनः ॥ २ ॥ गु
णे तु त्रीणि त्रीण्येव योधनक्षत्रतत्फलं ॥ शरमू

चापचक्र

ले भवेन्मृत्युः मध्ये व्याधिफले जयः ॥ ३ ॥ गुण
मध्ये भवेद्भंगः स्याप मध्ये धनक्षयं ॥ चापार्धे वि
जयो ज्ञेयो गुणार्धे लाभसंयुतः ॥ ४ ॥ चापाधो
विग्रहो मृत्युः गुणाधश्च तथा फलं ॥ चापग्रहयु

तिनष्टे विशेषेण तु नान्यथा ॥५॥ सौम्ययोगे जयं लाभं चापचक्रे समादिशेत् ॥ शुभपापसमायोगे

शनीचक्र ॥बलाधिक्यात् बलं स्फुटं ॥६॥ ॥इति चापचक्रं ॥ ॥

अथ शनिचक्रं ॥ ॥शनिचक्रं नराकारं लिखित्वा सौरिभादितः ॥ नामऋक्षं भवेद्यत्र ज्ञेयं तत्र शुभाशुभं ॥१॥ मुखे कं दक्ष

दोर्तुर्यं षट् पादौ तुर्यं वामदोः ॥ हृदि पंच त्रिकं शीर्षे नेत्रे गुह्ये

द्विकं द्विकं ॥२॥ मुखे हानिर्जयो दक्षे भ्रमं पादौ श्रीयो हृदि ॥

वामे शीर्षभयं राज्यं नेत्रे सौख्यं मृतिर्गुदे ॥३॥ जन्माष्ट द्वादशे

तुर्ये यदा निघ्नकरः शनीः ॥ तदा सौख्यं वपुस्थे न हृच्छीर्षे नेत्र

दक्षयोः ॥४॥ तृतीयैकादशे षष्ठे यदा सौख्यकरः शनिः ॥ तदा

विघ्नं शरीरस्थेव क्रांघ्रि गुह्य वामदोः ॥५॥ यस्य पीडाकरः सौरीस्तस्य चक्रमिदं स्फुटं ॥ लिखि

त्वा कृष्णद्रव्येण तैलमध्ये क्षिपेद्बुधः ॥६॥ निक्षिप्य भूमिमध्यस्थं कृष्णपुष्पैः प्रपूजयेत् ॥ तुष्टिं

याति नरैः सं हृः पीडां त्यक्त्वा शनैश्चरः ॥७॥ ॥इति शनिचक्रं ॥ ॥अथ सेवापुरुषचक्रं ॥

सेवाचक्रे शिरः सप्त सप्त पृष्ठे तथोदरे ॥ पादयोः सप्तऋक्षाणि साभिजित्तत्र विन्यसेत् ॥१॥ स्वामि

भात् भृत्यभं गण्यं भृत्यभात् स्वामिभं ततः ॥ स्वामिप्रश्ने भृत्यभाद्गण्यं भृत्यप्रश्ने तु स्वामिभात् ॥ निष्फलं

पृष्ठिपादस्थं फलदं तु शिरोदरे ॥२॥ ॥इति सेवापुरुषचक्रं ॥ ॥अथ डिंभपुरुषचक्रं ॥

डिंभचक्रे लिखिद्धानी भानुनादित्रिमस्तके ॥ मुखे त्रिणि द्वयं स्कंधे एकैकं बाहुहस्तयोः ॥१॥ पंच

हृन्नाभि गुह्ये च एकैकं षष्ठ जानुनि ॥ चरणाभ्यां ततैकैकं जन्मभं यत्र तत्फलं ॥२॥ शीर्षस्थे छत्रला

भश्चवक्रे मिष्टान्नभोजने॥ स्कंधे षनीचबाहुभ्यां स्थानभ्रष्टो भ
वेन्नरः॥३॥ पाणिभ्यां तस्करो लक्ष्मीर्हृदये ल्पायुश्च नाभिके॥ गुह्ये
कामिश्च मोजान्वोः स्तोकजीवी च पादयोः॥ इति डिंभपुरुषचक्रं॥
अथ नरचक्रं॥ ॥नरचक्रं नरं लिखः आत्मावयवसंयुतं॥ येन
विज्ञानमात्रेण क्रियते यान निर्णयः॥१॥ मुखैकं मस्तके त्रीणि हस्त
पादौ चतुष्टयं॥ हृदि पंच त्रिकं कंठे अभिजित्तत्र विन्यसेत्॥२॥ कुल
योद्धनमादौ च मुखे मूर्ध्नि च वामदोः॥ वामे पादे दरे कंठे दक्षहस्तांघ्रि
गण्यते॥३॥ यत्रांगे भानुभौमार्कि राहवो धिष्ण्यसंस्थिता॥ तत्र घा
तं विजानीयात् चंद्रयोगे विशेषतः॥४॥ ग्रहभुक्तिप्रमाणेन नवांश

क्रमेण च॥ प्रहारो जायते तत्र वक्रे द्विगुणसंख्यया॥५॥ निजभे अर्ध
घातं च पादोनं मित्रभे ग्रहे॥ उदासीनं भवेत्सर्वं द्विगुणं शत्रुराशिभेः॥
६॥ एकोप्यनेकस्थानांश्च करोति भूबले जिते॥ भूबलस्थे भदोषे
ठास्थिते स्थानं न कुर्वते॥७॥ यत्र यत्र स्थिते घातो यत्र यत्र स्थितेन न
हि॥ तत्फलं कथयिष्यामि ग्रहभुमिवसात्पुनः॥८॥ क्रूरा घातं न कुर्वंति
एव दक्षिणतोरणे॥ सन्मुखा वाममार्गा ये ते योद्धांगे घातकारकः॥९॥ दक्षि
णांगे गताः क्रूराः सौम्या वामांगसंस्थिताः॥ शिरश्छेदे समुत्पन्ने धरं धा
वति संमुखं॥१०॥ यस्य वामांगगाः क्रूराः सौम्या यस्य च दक्षिणेः॥ तस्य
भंगो रणे नूनं यदि शूरा महाभटः॥११॥ ॥इति नरचक्रं॥ ॥

अथपक्षिचक्रं॥चंचुमस्तककंठेषुहृदयोदरांघ्रिपक्षयोः॥त्रीणित्री
णिक्रमेणैवशशिभादिन्यसेद्बुधः॥१॥चंचुस्थतांभवेमृत्युःशीर्षे
कंठोदरेहृदि॥विजयोज्ञेमलाभश्चभंगदंपादपक्षयोः॥२॥इतिप
क्षिचक्रं॥ ॥अथवर्गचक्रं॥अगरुडकमार्जारःचसिंहःटशुनी
शुनः॥तसर्प्पाःपाषुविज्ञेयोयमृगःशअजात्मजः॥१॥वसुभूतरस
वेदाश्चंद्राद्रिनेत्रवह्नयः॥पूर्वादिक्रमविज्ञेयावर्गोपरिदिशाष्टके॥२
नामाद्यवर्णस्वरासंख्यायायत्रैदसमुद्भवः॥प्रत्यक्षंस्थापयेत्तत्रपिंडी
कृत्वाष्टकैर्हृदं॥३॥शेषसंख्याध्वजोधूमःसिंहश्वावृषराशभाः।
ध्वजोध्वांक्षक्रमेणैवयोओश्चैप्रभवंतिते॥४॥ध्वांक्षश्चरासभोश्व

णोगौसिंहोध्वजोनलः॥यथोत्तरबलाःसर्वेज्ञातव्याःस्वरपारगैः॥५॥प्रभोयोद्धेपुरेदेशेमित्रना
रीगृहेषुच॥बलाढ्यायेभवेल्लाभोनलाभोबलवर्जितो॥६॥ ॥इतिवर्गचक्रं॥ ॥
अथआयचक्रं॥ध्वजोधूमोथसिंहश्वसौरभेयस्वरोगजः॥ध्वांक्षश्चैवक्रमेणैतेआयाष्टकदिशा
ष्टके॥१॥प्रतिपदाद्युदीयंतेतिथिभुक्तिप्रमाणतः॥अहोरात्रेपुनःसर्वेसर्वेयामभुक्त्याभ्रमं-
तिच॥२॥आयवर्गोष्टकोज्ञेयोदिशाष्टकक्रमेणच॥स्वोदयंमृत्युदंज्ञेयंसर्वकार्येषुसर्वदा॥
इतिआयचक्रं॥ ॥अथविरंचिचक्रं॥अतःपरंप्रवक्ष्यामिसद्यःप्रत्ययकारकं॥चक्रं
विरंचिविख्यातंपत्स्करैरपिदुर्लभं॥१॥कृत्तिकाउत्तराफाल्गुन्युत्तराषाढमादिमं॥पंक्तियुक्ता
लिखेद्धानिक्रमेणनवकत्रयं॥२॥वेधोविकर्षागस्तत्रकर्तव्योनवकत्रये॥क्रूरसौम्यग्रहो

विद्धं ज्ञेयं तस्य शुभाशुभं॥३॥ जन्मसंपद्विपत्क्षेमा प्रत्यराधुनैधमाना॥ मित्रानिमित्रगाता
रा नव भेदा भवंति च॥४॥ जन्मत्रयस्य वेधेन मृत्युः क्रूरग्रहैर्भवेत्॥ जयं लाभं शुभे
स्तत्र मिश्रो मिश्र फलं विदुः॥५॥ सौम्यो प्यशुभतारस्थः स्वतारा भाव पोषकः॥ दुष्टस्थो हंति
दुष्टः सः क्रूरो तस्माद्विपर्ययः॥६॥ जन्मत्रयस्थितः सौरी क्षेमायां राहुभूमिजौ॥ मित्राति मि
त्रगे सूर्ये जायते वधबंधनं॥७॥ जन्मत्रये यदा मंत्रि क्षेमायां बुधभार्गवौ॥ मित्राति मित्रगे

विरंचिचक्र

चंद्रे जयो लाभसुखानि च॥८॥ जन्मतारादितारणां क्रूरसौम्य
ग्रहो व्यधात्॥ फलमुक्ता दिनानीतु दिनतारा फलं भवे॥९॥ त्रिपंच
सप्तमे नियाम ध्याधि प्रथमाष्टमाः॥ चतुर्थि नवमी षष्ठी उत्कृष्ट
तारका मता॥१०॥ त्रिपंच सप्त तारास्कु रोगोत्पत्ति यदा तदा॥ चिरये

गो मृति स्तासु क्रूरविद्धासु जायते॥११॥ यात्रा युद्धे विवादेषु जन्मतारं न शोभना॥ शुभान्य शुभ कार्ये
षु प्रवेशे तु विशेषतः॥१२॥ त्रिपंच सप्त तारासु देवतायतनं प्रभुः॥ मंत्रं मित्रं कलत्रं च देशं ग्रामं गृ
हं त्यजेत्॥१३॥ ॥इति विरंचिचक्रं॥ ॥

अथ सप्तशलाका चक्रं॥ तिर्यगूर्ध्वगता रेखाः सप्त संख्या लिखेद्बुधः
कृत्तिकादीनि भान्यत्र साभिजिच्च क्रमेण च॥१॥ शुक्लं क्रांतं तथा भो
ग्यं विद्धं पापग्रहेण भं॥ शुभाशुभेषु कार्येषु वर्जनीयं प्रयत्नतः॥ नाय
स्याभिधान नक्षत्रं विद्धं क्रूरग्रहेण च॥ देशो ग्रामं पुरं सैन्यं नरा ना
री विनश्यति॥ ॥इति सप्तशलाका चक्रं॥ ॥

अथ पंचशलाकाचक्रं

तिर्यगूर्ध्वगताः पंचद्वे द्वे रेखे च कोणगे॥ ईशकोणाग्ररेखायां कृत्तिकादि लिखेद्बुधः॥१॥ विशाखा कृत्तिका वेधो भरणी मित्रभे तथा॥ धनिष्ठा सार्प्य योर्वेधो मघाश्रवणये तथा॥२॥ शुभाशुभग्रहैर्विद्धं विवाहादि शुभे त्यजेत्॥ ध्यादि विद्धं महादुष्टं राहुविधं तथैव च॥३॥ ॥
इति पंचशलाकाचक्रं॥

॥अथ चंद्रचक्रं॥ चंद्रं दुसदृशं चक्रं त्रित्रिशूलसमन्वितं॥ मध्ये द्वादशभान्यत्र षट्षट्नव शूलके॥१॥ मध्यत्रिशूलिमध्यस्थे शशि दृक्षसमादितः॥ सव्येन गण्यते चक्रं यावत्साध्यस्य नामभं॥२॥ शृंगे मृत्युर्जयो मध्ये पृष्ठे भंगो महाहवे चातुरंगकवौकोटे द्वंद्वयुद्धे विशेषतः॥ ॥इति चंद्रचक्रं॥ ॥

चंद्रचक्र

भास्करचक्रं

॥अथ भास्करचक्रं॥ रेखात्रयं त्रिशूलाग्रं तिर्यक्रेखा षडन्वितं॥ एकैककोणगास्तत्र मध्याद्यो भानुभादितः॥१॥ अधस्त्रये भवेन्मृत्युश्चतुर्भे कोणगैः शुभः॥ मध्यमा द्वादशप्रोक्ता नवर्क्षा भंगकारकाः॥३॥ ॥इति भास्करचक्रं॥

स्वरोदय अथप्रथममातृकाचक्रं॥ ॥षोडशोर्द्धगतारेखापंचरेखाश्चतिर्यगा॥कोष्ठकानांभ
वेत्सष्टीस्तत्रांकाक्षरयोजना॥१॥पूर्णायादिविलोमांकानूलिखेत्प्रतिपदांतगानू॥तदधोमा
७५ तृकालिख्यउत्रणांतस्वरोस्त्रितां॥२॥संगृह्यनामवर्णांका न्मात्राभेदितसंयुतानू॥मुनिभि
स्तुहरेद्भागंपश्चाद्द्वयंबलाबलं॥३॥मात्राधिकेभवेल्लाभोजयोमात्राधिकेरणे॥मातृकायाप्र
भेदोयंतस्माज्ञेयप्रयत्नतः॥४॥ ॥इतिप्रथममातृकाचक्रं॥ ॥अथद्वितियमातृकाच २म
क्रं॥ ॥द्वादशार्द्धगतेरेखापंचरेखाश्चतिर्यगाः॥मातृकांप्रस्तरेतत्रषष्ठांतस्वरवर्जितां॥कोष्ठका ७५
काधोलिखेदंकानूपंचयुग्मत्रिकंत्रिकं॥षट्द्वंद्वाष्टकात्रीणिनवैकैकंतथेवच॥२॥नामवर्णस्ययासं
ख्यामात्रासंख्यातथैवच॥पिंडितानवभिर्भक्ताऽजयोमात्राधिकोरणे॥३॥ ॥इतिद्वितीय
मातृकाचक्रं॥ ॥अथत्रितीयमातृकाचक्रं॥ ॥मनुमार्तंडदोर्बाणतिथ्यस्वरसद्विया

ज्ञाः॥नवांनास्तघःस्याप्याः पंचस्वरकृखादिनः॥१॥उत्रणोनाहकारांतानूवधाकोष्ठकःक्रमेः
नाममात्राक्षरांकैक्यंसपुरेखाधिकेजयः॥२॥ ॥इतित्रितीयमातृकाचक्रं॥ ॥
अथचतुर्थमातृकाचक्रं॥ ॥भवनादित्यदोर्बाणतिथिवेदाश्चमुनिदिक्रसाः॥वसूनवां
तकानूलिख्यषडंतोस्त्रितमातृकानू॥१॥पुन्नामवर्णमात्राणांस्वांकयोगेष्टकेतथा॥मात्राधि
केजयीयुद्धेमात्राहीनेपराजयः॥२॥ॐ ॥इतिचतुर्थमातृकाचक्रं॥ द्वितीयमातृका



MEMORIAL

अथसारतरंवक्ष्येलंपटाचार्यभाषितं॥जयपराजयोयेनज्ञायतेरणतःस्फुटौ॥१॥लग्नात्लग्नभेदनघोषाघोषक्रमेणच॥प्रवेशनिर्गमात्मांचक्रमायुयपराजयो॥२॥ ॥इतिविजयचक्रं

नाडीचतुष्टयंचक्रंलिखित्वातोरणाकृतिः॥नृपभादिलिखेद्धानिप्रवेशोनिर्गमेतथा॥ १॥स्तंभमूलेस्थितानक्षौसिंहद्वारेतथाष्टकं॥मालायामष्टकंतत्रचतुर्धिष्ण्यानितोरणे॥२॥निर्ग



मेचंद्रमायत्रप्रवेशोयत्रभास्करः॥तत्रकालेशुभायात्राप्रवेशोविघ्नकारकः॥३॥चंद्रप्रवेशऋक्षस्थौनिर्गमस्थोदिवाकरः॥वधबंधप्रदायात्राप्रवेशोतत्रशोभना॥४॥चंद्रादित्यौप्रवेशर्क्षेअथवानिर्गमेस्थितौ॥मिश्रंफलंभवेतत्रप्रवेशेचाथनिर्गमे॥५॥क्रूरग्रहयुतश्चंद्रप्रवेशेवाथनिर्गमे॥।तद्दिनेभूपतीनांचनिषिद्धाराजपाटिका॥६॥प्रथमेन्हिविधातव्याभभुजाराजवा

टिका॥शुभग्रहयुतो चंद्रो सिंहद्वारभसंस्थिते॥७॥स्तंभसौरीन्टपं हंति सिंहेस्वचक्रविग्रहे
मालास्थिते चलंराज्यं तोरणेसर्वसिद्धिदः॥ ८॥ इतितोरणचक्रं॥ ॥मीने
७७ मेषोदये चंद्रः सततं दादक्षिणोन्नतः॥उत्तरोन्नतशेषेषु समलं रुषकुंभयोः॥१॥विद्रूपं
स्यात्समेचंद्रे दुर्भिक्षं दक्षिणोन्नतः॥ इतिरोगभयंकूलेस्त्रभिक्षं उत्तरोन्नते॥२॥श्टं
गोन्नतचक्रं अहिचक्रं प्रवक्ष्यामी यथासर्वज्ञभाषितं॥द्रव्यं शल्यं तथा राम
न्यं येन जानंति साधकाः॥१॥ निधेरानश्चितेकस्थालंभूतायत्रभूतले॥तत्रचक्रमि
दं स्थाप्यस्थापनद्वारसंस्थितं॥२॥ उर्द्ध्वरेखाष्टकं लेख्यं तिर्यक्यं च तथैरच॥अहि ७७
चक्रेभवंत्येवंमष्टाविंशतिकोष्ठकाः॥३॥तत्रपोष्ठाश्चियाम्यर्क्षं शतभंब्रास्यसार्प्प
भं॥पुष्यं हस्तं समालिख्य द्वितीयापंक्तिसंस्थितं॥४॥अहिर्बुध्न्याजपादर्क्षं+॥कृत्ति

का—सभाग्यभं उत्तराफल्गुनि लेख्यं पूर्वपंक्तौ भसप्तकं॥५॥अभिजिद्विष्णुधनि
ष्टाख्यं सौम्यं रौद्रं पुनर्वसु॥चित्राभंच त्रितीयायां पंक्तौ नक्षत्रसप्तकं॥६॥विश्व
र्क्षं तोयभं भूलं ज्येष्ठा मैत्र विशाखके॥स्वातिः पंक्तौ चतुर्थ्यां च कस्थाचक्रं विलो
कयेत्॥७॥एवं प्रजायते चक्रे प्रस्तारः पंन्नगाकृतिः॥द्वारशाखामघायाम्यं द्वारस्थाकृत्तिका
नतः॥८॥अश्वाद्रीपूर्वाद्रीषाढादित्रिकं पंचचतुष्टयं॥रेवतीपूर्वभद्रे दोर्भानिशेषाणि भास्वतः॥
॥९॥उदयादिगतानाड्यो भघ्नाः षष्ट्या प्रशोधकैः॥दिनेंदुभुक्तयक्तो सौ ज्ञेयोस्तत्कालचंद्रमाः॥
१०॥चंद्रवत्साधयेत्सूर्यऋक्षस्तं चेष्टकालिकं॥पश्चाद्विलोकयत्रौ च स्वऋक्षे चान्यमेस्थितौ॥११॥
चद्रऋक्षेयदार्केंदुतदास्ति निश्चितं निधिः॥ भानुऋक्षस्थितो मु— शल्यं भवति नान्यथा॥१२

स्वरोदय स्वस्वभेद्वितयंनास्तिकिंचिद्विपर्यये स्थितं॥नलभ्यतेद्रव्यचंद्रे क्रूरग्रहासमन्विते॥१३॥पुष्टेचं
द्रेभवेत्पुष्टः क्षीणेचंद्रेल्पकोनिधिः॥ग्रहदृष्टिवशात्सोपिविज्ञेयोनवधाबुधैः॥१४॥हेमंतारं
७८ चताम्रारंरत्नंकांस्यायसंत्रपुः॥नागंचंद्रेविजानीयात्भास्करादिग्रहेक्षिते॥१५॥मिश्रेमिश्रं
चवेद्द्रव्यंशून्यंदृष्टिविवर्जिते॥सर्वग्रहेक्षितेचंद्रेनिर्दिष्टोसौमहानिधिः॥१६॥हेमंतारंचताम्रा
रंपाषाणंमृन्मयायसं॥सूर्यादिग्रहगेचंद्रेद्रव्यभाउंप्रजायते॥१७॥भुक्तारास्यंसमानेनभू राम
मानंकांबिकैःकरि॥नीचेद्विघ्नंपरेनीचजलस्थोसौमहानिधिः॥१८॥नवांशकानुमाने ७८
नभूमानंतस्यकल्पयेत्॥कलमानेनतत्संख्याधातुज्ञानविचक्षणैः॥१९॥स्वोच्चस्थेतुद्विगंद्र
व्यंनवांशकक्रमेणच॥परमोत्तुंपरेतुंगेभितिस्थंऋक्षसंस्थिते॥२०॥चंद्रांशभुक्तमानेनद्रव्य
संख्याविधीयते॥तस्यादशगुणावृद्धिःषड्गेंदुबलक्रमात्॥२१॥अधिष्टितंभवेद्रव्यंयत्रचं

द्रोग्रहान्वितः॥तदधिष्ठायकाज्ञेयाभास्करादिग्रहक्रमात्॥२२॥ग्रहंमुख्यग्रहंचैवक्षेत्रपालंचमा
तृकां॥द्वीपेशंभीषणंरुद्रंयक्षंनागंविदुक्रमात्॥२३॥स्वग्रहेहोमव र्तंन्योमुचेनारायणीबलिः॥क्षे
त्रपालेस्वरामांसंमातृकायांमहाबलिः॥२४॥द्वीपेशेदीपजापूजाभीषणेभीषणार्चनं॥रुद्रजो
जाप्यंसंतुष्टेयक्षेयक्षादिशांतिकं॥२५॥नागेनागग्रहाःपूज्यागणनाथेनसंयुतां॥लक्ष्मीध
रादित्यानिसर्वकार्येषुपूजयेत्॥२६॥कृतेविधानेननिधिरसाध्योपिचजायते॥निधिप्रा
प्तानरालोकेचंदनीयानसंशयः॥२७॥निवर्तनैकमध्येचसंभ्रातिर्यत्रभूतले॥तत्रचत्र मि
दंस्थाप्यंधीमान्चक्रविनिर्णयः॥२८॥ ॥इतिअहिबलचक्रं॥ ॥

॥अहिबलचक्र॥

॥लांगलचक्र॥

लांगलं दंडिका यूपं योक्त्रद्वयसमन्वितं
दंडिकादि लिखेद्भानि दिनेशाक्रांतभादि
तः॥ १॥ दंडिकाहलयूपानां द्वि द्वि स्थाने
त्रिकं त्रिकं॥ योक्त्रयोः पंच केसव्य गणना
चक्र लांगले॥ २॥ दंडे स्वेतु गवां हानिर्यू
पस्थे स्वामिनो भयं॥ लक्ष्मी लांगलयोक्त्र
स्ते क्षेत्रारंभे दिनर्क्षगे॥ ३॥ इति लांगल
चक्रं॥ ॥अथ बीजोप्तिचक्रं॥
सूर्यतादिन्यसेत् भानि त्रिनाड्येकांतर

क्रमात्॥ मुखे त्रीणि गले त्रीणि भानि द्वा
दशावोदरे॥ १॥ पुच्छे तुर्यं बहिः पंच दिन भा
दि फलं वदेत्॥ वदने बुरकिंचिड्याद्गल
के गारकं तथा॥ उदरे धान्यवृद्धिश्च पुच्छे
धान्यक्षयो मतः॥ इति रोगभयं बाह्ये चक्रे
बीजाप्तिसंभवे॥ ३॥ ॥इति बी
जोप्तिचक्रं॥ ॥अथ वृषभचक्रं॥
वृषचक्रं वृषाकारं सर्वावयवसंयुतं॥ लि

लिखित्वाविन्यसेद्भानिरूपनामर्क्षपूर्वकं॥१॥
मुखाक्षिकर्णशीर्षेषुशृंगेस्कंधेद्विकंद्वि
कं॥त्रीणिपृष्ठेद्विकंपुछेद्वेद्वेपादोदरेन्यसे
त्॥२॥हलप्रवाहबीजोप्तिमारंभादिदि
नर्क्षके॥यात्रांगेसंस्थितेतस्माद्वक्ष्येसर्वं
शुभाशुभं॥३॥हन्यासेचसुखानिलोच
नगतेकर्णेतुभिक्षाटनंशीर्षेश्रीमतिरक्त
शृंगयुगलेस्कंधस्थितेशोभनं॥पृष्ठेरोग
भयंचपुछकगतेपादेभ्रमंहस्तस्रवंएवंचं
द्रभजंफलंप्रकटितंचक्रेरथाख्येनृणां॥४॥

अथसप्तनाडिचक्रं॥ ॥अथान्यंसंप्रवक्ष्यामियदुक्तंसप्तनाडिकं॥येनविज्ञानमात्रेणवृष्टिंजा
नंतिसाधकः॥१॥कृत्तिकादिलिखेद्भानिसाभिजित्तत्रदापयेत्॥सप्तनाडिव्यधस्तत्रंकर्तव्यःपन्नगा
कृतिः॥२॥ताराचतुष्कवेधेननाडिकैकाप्रजायते॥तेषांनामान्यहंवक्ष्येतथाचैवफलानिच॥३॥
कृत्तिकाचविशाखाचमैत्राख्यंभरणीतथा॥उर्द्धायात्रातिनाडिसाचंडवाताभिधामता॥४॥रोहिणी
स्वातिज्येष्ठाश्विद्वितीयानाडिकामता॥आदित्यप्रभवानाडिवायुनाडितथैवच॥५॥सौम्यंचित्रात
थामूलंपौष्णमक्षंचतुर्थकं॥तृतीयागरकानाडिदहनाख्यातथैवच॥६॥रौद्रंहस्तंतथापूर्वाषाढाभ
द्रपदोत्तरा॥चतुर्थीजीवनाडीसासौम्यनाडिप्रकीर्तिता॥७॥पुनर्वसूत्तराफाल्गुन्युत्तराषाढता
रका॥पूर्वाभद्राचमूलाख्यापंचमीनीरनाडिका॥८॥पुष्यर्क्षंफाल्गुनीपूर्वाअभिजित्शततारका॥

स्वरोदय षष्ठि नाडी च विज्ञेया बुधाख्या जलनाडिका ॥ ९ ॥ आश्लेषर्क्षं मघा कर्णो धनिष्ठा भं तथैव च ॥
अमृताख्या हिमा चंद्रो सप्तमी सा रसातला ॥ १० ॥ मध्यमार्गे स्थिता सौम्या नाडी नरग्रपृष्ठतः ॥
८१ सौम्ययाम्यगतं ज्ञेयं नाडीनां च त्रिकं त्रिकं ॥ ११ ॥ क्रूरा याम्यागता नाड्यां सौम्याः सौम्यदिगाश्रिताः ॥
मध्यनाडी च मध्यस्था ग्रहरूपफलप्रदा ॥ १२ ॥ एकनाडिगता नाड्यां ग्रहाः क्रूराः शुभा यदि ॥ ततो नाडि
फलं वाच्यं शुभं वा यदि वाऽशुभं ॥ १३ ॥ ग्रहाः कुर्युः महावातं महावाताख्यनाडिका ॥ वायुनाडिगता वा राम
युदहन्यां दाहदायकः ॥ १४ ॥ सौम्यनाडिगता मध्यास्थीरस्थामेघनाडिकाः ॥ जलाया दृष्टिदा चं ८१
द्रनाडिका त्वतिदृष्टिदा ॥ १५ ॥ एकोप्येतत्फलं दत्ते स्वनाडी संस्थितो ग्रहः ॥ भूसुतं सर्वनाडी बुध
ते नाडिभवं फलं ॥ १६ ॥ प्रावृट्काले समायाते रोहिण्यगते रवौ ॥ नाडिवेधसमायोगे जल
योगान्वराम्यहं ॥ १७ ॥ यत्र नाडिस्थितश्चंद्रस्तत्र स्था नाडि खेचराः ॥ क्रूराः सौम्या विमिश्राश्च तद्दि

र दृष्टिरुत्तमा ॥ १८ ॥ एवं नक्षत्रसंयोगे जायते यदि खेचरे ॥ तत्र काले महादृष्टि यावत्स्यात्रो
रात्री ॥ १९ ॥ केवलैः सौम्यपापैर्वा ग्रहैर्विद्धो यदा शशी ॥ तदाति तुच्छ पानीयं दुर्दिनं भवति ध्रुवं
॥ २० ॥ यस्य ग्रहस्य नाडिस्थश्चंद्रमास्तद्ग्रहेण च ॥ दृष्टो युक्तः करोत्यंबु यदि क्षीणो न जायते ॥ २१
पीयूषनाडिगश्चंद्रस्तत्र खेटा शुभाशुभाः ॥ त्रिचतुःपंच पानीयं दिनान्येकत्रिसप्तकं ॥ २२ ॥ एवं
जलाख्या नाडिस्थे चंद्रे मिश्रग्रहान्विते ॥ दिनार्द्धं दिनसं पंच दिनानि जायते जलं ॥ २३ ॥ नीर
नाडिस्थिते चंद्रे तत्रस्थैः पूर्ववग्रहैः ॥ यामं दिनार्द्धकं त्रीणि दिनानि जायते जलं ॥ २४ ॥ अमृता
दित्रये यैत्रे ये भवंति सर्वे खेचराः ॥ तत्र वृष्टिक्रमाज्ज्ञेया धृत्यर्करसवासराः ॥ २५ ॥ सौम्यनाडिग
ताः सर्वे वृष्टिदास्ते दिनक्षयं ॥ शेषनाडि महावातः दुष्टदृष्टिप्रदा ग्रहाः ॥ २६ ॥ निर्जला जलदा नो

डीभवेद्योगसमाधिके॥ क्रूराधिकसमायोगेजलदापिनदयकः॥२७
॥याम्यानाडिस्थिताक्रूराअनावृष्टिप्रसूयकाः॥शुभयुक्ताजलं
शस्त्रास्तेतिवृष्टिप्रदायकाः॥२८॥एकनाडिसमारूढौचंद्रमाध
रणीसुतौ॥यदीतत्रभवेज्जीवस्तदाएकार्णवामही॥२९॥बुधशु
क्रौयदेकत्रगुरुणाचसमन्वितौ॥चंद्रभौमस्तदाकालेजायते
वृष्टिरुत्तमा॥३०॥जलयोगेसमायातोयदाचंद्रमितौग्रहौ॥
क्रूरेदृष्टतदावापितदामेघाल्पवृष्टिदा॥३१॥उदयास्तमयेमा
र्गेवक्रेयुक्तौतुसंक्रमे॥नाडिगताजलंएतेमहावृष्टिप्रदामताः॥३२
॥इतिसप्तनाडिपंनगाकृतिचक्रं॥ ५

अथसंवत्सरचक्रं॥ ॥चक्रंसांवत्सरंवक्ष्येयदुक्तंकौशलागमे॥येनविज्ञायतेसम्यक्
वर्षेवर्षेशुभाशुभं॥१॥द्वादशारंलिखेचक्रंतत्रमेषादिराशयः॥संस्थाप्यक्रमयोगेनमीनंतोःसव्य
मार्गतः॥२॥तत्रचक्रेसमालिख्यमेषादिराशिमार्गतः॥प्रभवाद्यब्दमेकैकषष्टिपंचप्रवर्तने॥३॥
एवंराशिस्थितंचंद्रंवत्सरंवर्तमानजं॥तद्राशिस्थंफलंवीक्ष्यंयत्किंचिद्वार्षिकंमतं॥४॥चैत्रेया
प्रतिपत्युक्ताःतस्याकालेप्रवेशयेत्॥तद्दिनेलोकयेच्चक्रंकालज्ञानविनिश्चये॥५॥तत्रस
प्तग्रहान्स्वराशौयोयत्रसंस्थितः॥वर्षराशिविचिंत्यास्तेरेषास्थानगताग्रहाः॥६॥उपचयग
ताक्रूराःसौमाश्छिद्रांत्यवर्जिताः॥ग्रहारेषाप्रदाज्ञेयामित्रमध्यगृहेषुच॥७॥स्वर्क्षेविघ्नफ
लंदत्तेस्वोच्चेविघ्नंतथैवच॥फलार्द्धंशत्रुगेहस्थेनीचस्थोनिफलोग्रहः॥८॥एवंरेषाप्रमाणे
नवर्षेविशोपकामताः॥ज्ञातव्यावर्षकेंद्रेणवर्षेवर्षेप्रयत्नतः॥९॥एवंवर्षफलंप्रोक्तंचैत्रमासाध

वासरान्॥आषाढेकार्तिकेप्येवंजलधान्यंविचिंतयेत्॥वासरान्॥आषाढेकार्तिकेप्येवंजलधा
न्यंविचिंतयेत्॥१०॥यत्रदेशेपुरेग्रामेजं
लंभिन्नंप्रदृश्यते॥तस्मात्कारणंवक्ष्यि
येनजानंतिसाधकाः॥देशादिराशिनाथ
स्य योरेषादायको ग्रहः॥मित्रोदासीन
शत्रुत्वेफलभिन्नंकरोतिसः॥१२॥मि
त्रोद्विघ्नफलंदत्तेसमसाम्यंकरोतिसः॥
शत्रुःसर्वहरोज्ञेयःसर्वदाकालवित्तकैः॥
१३॥

एवंविचारकर्तव्याःकालविशोपकाबुधैः॥तथापानीयधान्यानांस्वस्वकालेविचिंतयेत्॥१४॥
इतिसंवत्सरचक्रफलं॥ ॥अथस्थानचक्रं॥ ॥स्थानचक्रंप्रवक्ष्यामि
रं ग्रामं दुर्गं देवालयं पुरं ॥ नाम यंत्र स्थितं यस्यामस्या धौसो सुरैरपि ॥ ५१ ॥ रक्षार्थे च कृतं १२३

यंत्रं त्रिलोहेन तु वेष्टितं ॥ बाहुमस्तककंठेषु धृतं रक्षावहं ध्रुवं ॥ ५२ ॥ यस्य यंत्रस्य मध्य

स्थे विधिवंदुं दुरंघ्रतं ॥ विडालोपि तगृह्णाति यंत्रस्यास्य प्रभावतः ॥ ५३ ॥ ये केचिद्देवजा दोषा

ये केचिन्मंत्रयंत्रजाः ॥ ते सर्वे विलयं यांति ज्वराश्च व्याहिकादयः ॥ ५४ ॥ एतद्यंत्रं महायंत्रं म
४५

हाविद्याक्षरालयं ॥ निर्मितं शंभुना लोके रक्षार्थे वज्रपंजरं ॥ ४६ ॥ इति वज्रपंजरयंत्रं ॥ ॥

ऐं ह्रीं भ्रूं ह्रूं क्रूं ब्रूं भ्रूं ह्रूं नमो भगवति दंष्ट्रिणी भीमवक्त्रे महोग्ररूपे ह्लिं ह्लिं रक्तनेत्रे क्लिं क्लिं महानिः

स्वने कुकु विद्युज्जिह्वे कुकु निर्मांसे कटाननगोनसाभरणे श्लि श्लि शवमालाधारिणि टिनटा

टोपविषमकृताभनेवसामोदोलिप्तगात्रे द्रावय द्रावय महारौद्रि सार्द्रगजचर्मकृतच्छेदे विज्रं

भविज्रंभ नृत्य नृत्य असिलताधारणी भ्रकुटितटाटोपविषमकृताननेवसानेदोलिप्तगात्रे

कह २ हस २ क्रुध २ नीलजीमूतवर्णे अंत्रमालाकृतातरणे विस्तर २ घंटारवाकीर्णदंडे क्रौं ह्रीं

ह्रंत ह्रंत आकर्षय आकर्षय धम धम देहः ख फ्रें विज्रं भिणि क्रूं क्ष्मूं क्ष्मः क्रोधरूपे प्रज्वल प्रज्व

ल भीम भीषणं भिंद भिंद महाकाये छिंद छिंद करालि तिकटिकटि महाकायभूतः मातः स

स्वरोदय वं दुष्ट निवारणि जाये जये त्रैलोक्यविजये २ हुं फट् हुं हुं हुं फट् २ स्वाहा॥ इति त्रैलोक्यविज
यो यंत्रोद्धारमंत्रं॥ इति कवचपंजरविधि॥ ॥सेनाध्यक्षाभिषेकं रणशुभजनने पूजनं पट्ट
१२४ बंधं तं डारक्षांगले पंचविधगुणयुतं रक्षणं शत्रुघातात्॥ छकाबुकाप्रभावं स्वरविधिसहि
तं कर्म षट्कं पताकां शत्रूणां साधनार्थं नरपति विदितं मंत्रयंत्रं प्रभावं॥ १ ॥स्वरविवरविशेषैश्च
क्र वं धैश्च भूम्यां विविधबलपता कामातृका भेदरम्यं नरपति कविचंद्रः सर्वशास्त्रेषु धीतिः राम
नरपतिजयचर्यां शास्त्रमेतच्चकार॥ २ ॥श्री नरपतिजयचर्यायां स्वरोदये षट्टंगेसप्ताध्या १२४
ये भूबलाध्यायः पंचमः॥ ॥चतुर्थमंगं समाप्तं॥ ॥स्वप्नाध्यायं प्रवक्ष्यामि यथोक्तं गुरु
भाषितं॥ स्वप्नस्तु प्रथमे यामे संवत्सरविपाककदः॥ १ ॥ द्वितीये चाष्टभिर्मासै स्त्रिभिर्मासैस्त्रि
यामके॥ अरुणोदयवेलायां दशाहेन फलं भैलेत्॥ २ ॥ व्याधितेन सशोकेन चिताग्रस्तेन जं

तुना कामार्तेनापि धूर्तेन दृष्टस्वप्नो निरर्थकः ३ वातिकं पित्तिकं चैव
चिंतितं चानुवर्जितं अत ऊर्ध्वं प्रवक्ष्यामी पुण्यापुण्यं च मे शृणु ४ आ
रोहणं गोवृषकुंजराणां प्रासादशैला ग्रवनस्पतिनां विष्टानुलेपो रुदि
तं मृतं च स्वप्ने गम्यागमनं च धन्यं ५ यस्तु पश्यति स्वप्नांते राजा
नं कुंजरं हयं सुवर्णं वृषभं गावः कुटुंबं तस्य वर्धते ६ यस्तु पश्यति
स्वप्नांते विवाहो वपनं तथा अस्य मृत्यु ध्रुवं तस्य द्रव्य पुत्र विनाशनं ७
क्षीरिणं फलिनं वृक्षमेकाकी योधिरोहति तत्रस्थ प्रतिबुध्येत धनं शीघ्र
मवाप्नुयात्॥ ८ खरोष्ट्रमहिषीयुक्तं रथं यो व्याधिरोहति मरणं वा प्रवासं

स्वप्ना॰ यामलकं तस्य विनिर्दिशेत् ९ प्रासादस्थोपि यो भुंक्ते समुद्रतरते नरः अ
पि दासकुले जातः सोपि राजा भविष्यति १० दीपमन्नफलं पद्मं कन्यछत्रं
१२५ तथा ध्वजं स्वप्नांते जो लभेसत्वं यश्चिंतयति तध्रुवं ११ पत्रपुष्पं फलं
तोयं स्वप्नांते जो भे लन्नरः सर्वसिद्धिमवाप्नोति जीवेद्वर्षशतं नरः १२
मानुष्याणां तु मांसानि स्वप्नांते यस्तु भक्षयेत् हरित्यानी च पक्कानि शृ
णु तस्यापि यत्फलं १३ पादे पंचशतो लाभः सहस्रं बाहुलक्षणे सज्यंश राम
त सहस्रं वा लभते शीर्षभक्षणे १४ उपानुत्तनहो छत्रं च लब्ध्वा यः प्रति १२५
बुध्यते असिवा निर्मलं तीक्ष्णं अध्यानं च विनिर्दिशेत् १५ देवताप्रत्य
क्ष्यं ते प्रहसंति वदंति च आस्फोटयति धावंति देशास्तत्र विनश्यति १६

नावमारोहयेद्यस्तु नदीनां च समुत्तरेत् प्रवासो निर्दिशेत्तस्य शीघ्रं तु पु
नरागमः १७ केशा यस्य विशीर्यंते दंता यस्य पतंति च धननाशो भवेत्त
स्य पीडा व्याधिः शरीरजः १८ अभिद्रवंति यं स्वप्ने शृंगिणो दंष्ट्रिणं त
था वासरो वा वराहो वा भवेद्राजकुलाद्भयं १९ अभ्यंगो वाथ तैलेन घृते
नैव यथोचितं स्नेहेन वा तथानेन व्याधितस्य विनिर्दिशेत् २० रक्तांबर
धरा नारी रक्तगंधानुलेपना अवगूहति यं स्वप्ने पीडाव्याधिसमन्वितः २१
कृष्णांबरधरा नारी कृष्णगंधानुलेपना अवगूहति यं स्वप्ने तस्य मृत्यु
विनिर्दिशेत् २२ पीतांबरधरा नारी पीतगंधानुलेपना अवगूहति

स्वरोदय यं स्वप्ने हस्यांतस्य विनिर्दिशेत् ॥२३॥ शुक्लांबरधरा नारी शुक्लगंधानुलेपना ॥
अवगूहति यं स्वप्ने तस्य श्रीः सर्वतो मुखी ॥२४॥ सर्वाणि कृष्णान्यतिनिंदितानि
जं निगोवाजिकुंजरैर्द्विजं रेव वर्जं ॥ सर्वाणी शुक्लान्यतिशोभनानि कार्पासभ
१२६ स्मास्थि च तत्र वर्जं ॥२५॥ आदित्यमंडलं स्वप्ने चंद्रं वा यदि पस्यति ॥ व्याधि
तो मुच्यते रोगाद्रोगी श्रियमाप्नुयात् ॥२६॥ यस्तु स्वेतेन पर्णेन दृश्य
ते दक्षिणे भुजे ॥ सहस्रलाभो भवेत्तस्य अपूर्णे दशमे हनि ॥२७॥ वडवां
कुर्कुटी क्रौंची लध्वा पः प्रतिबुध्यते ॥ स कोशाभूतं लभते भार्यां च प्रियवादि
नी ॥२८॥ निगडे यस्तु बध्येत बाहुपाशेन या पुनः ॥ पुत्रो वा जायते तस्य
प्रतिष्ठां वा विनिर्दिशेत् ॥२९॥ रुधिरं पिबति स्वप्ने सुरां वा पिबति कश्चित् ॥ ब्राह्म १२६

णो लभते विद्यामितरस्तु धनं लभेत् ॥३०॥ क्षीरं पिबति यः स्वप्ने सफेनं दो
हते रुतं ॥ सोमपानं भवेत्तस्य अन्नं चाशय्यमादिशेत् ॥ ३१॥ दधि लाभे ध्रुव
स्तस्य वित्तलाभो ध्रुवं यशः ॥ घृतप्राशनतः क्लेशो यशस्तु दधिभक्षणे ॥३२॥
ऐंद्रो कंकणवीरं च पालाशं चाथ पुष्पितं ॥ स्वप्नांते यस्तु पश्येत नरः शोकम
वाप्नुयात् ॥३३॥ पुष्पिते पुष्पितं विद्यात् फलिते रद्धिरुत्तमा ॥ धूम्रायंतमप
याय यः प्रज्वलं तं श्रियावहं ॥३४॥ आशायने शयने याने शरीरे वाहने गृहे ॥ ज्व
लमाने स्तु बुध्येत तस्य श्रीः सर्वतो मुखी ॥३५॥ अंत्राणि वेष्टयेद्यस्तु ग्रामे
नगरएव वा ॥ ग्रामिमंडलिके राजा नगरे पार्थिवो भवेत् ॥३६॥ यस्तु मध्यन

स्वरोदय डागस्य भुंजीत घृतपायसं॥ निकटं पुष्करे यान्नेतं विद्यात्पृथिवीतले॥३७॥ यस्मै
यज्ञागमं विद्यात् गोधूमेश्च धनागमं॥ लिंगमभ्यर्चितं दृष्ट्वा प्रतिमां च विशेषतः
१२७ ॥३८॥ स्वप्ने श्वारे भवेत्तस्य धनं च विपुलं लभेत्॥३९॥ देवताश्च द्विजा गावः पितरो
लिंगिनो नृपाः॥ यद्वदंति नरं स्वप्ने तत्तथैव भविष्यति॥३९॥ नागपत्रं भवेत्स्वप्ने क
र्पूरमगरं तथा॥ चंदनं पांडुरं पुष्पं तस्य श्रीः सर्वतो मुखी॥४०॥ रक्तचंदनका
ष्टानि होमये हुतसंयुतं॥ गायत्र्याष्टसहस्राणि ते नत्रां तिर्भविष्यति॥४१॥ राम
बृहस्पतिमतं पुण्यं प्रातरुत्थाय यः पठेत्॥ दुःस्वप्नं नस्यते तत्र सुस्वप्नं तु १२७
भविष्यति॥४२॥ इति स्वप्नाध्यायः समाप्तः॥ ❀ ॥ प्रणत विबुधवंद्यां भार
ती विंदमानः प्रवरचतुरकामोदातु कामंजनेभ्यः॥ नरपतिरितिलोके ख्याति

नामाभिधस्य नरपतिजयचर्यान्नामकं शास्त्रमेतत्॥१॥ ग्रहतिथ्यादिकाप्र
मुदयास्तौ च शीघ्रगौ॥ शत्रुमित्रसमाखेटा राज्याधीशा बलाबलं॥२॥ उच्चा
नीचाश्च मध्यस्था दृष्टिस्थानानि यानि च॥ गोचरं गोचरे वेधं दशास्त्वंतर्दशा
पुनः॥३॥ वारफलं तथा संधिं लत्तां वेधमुपग्रहं॥ शुभाशुभफलं वक्ष्ये तिथिधि
ष्ण्यगुणान्वितं॥४॥ चंद्रताराबले चैव भद्रा त्रिदिनपुष्करं॥ यमघंटं तथा चक्र
मेकचैकार्गले तथा॥५॥ पार्श्वौ द्वौ धोदराव कारे वरहोनृणां शकाः॥ बालकुम
रको वृद्धश्शूला तिशूलयोगको॥६॥ परिघं धिष्ण्यशूलं च वारशूलं च योगिनी
रिक्तभ हंकालपाशं च राहुवत्सं च भार्गवं॥७॥ छायोत्पत्तिं निधावक्ष्ये विषुम

ध्यं दिनेष्टकं ॥ लग्नोदये स्वदेशीयं दिनमानं दिनं गतं ॥८॥ कालवेलां स्तथा होरा
यामार्धं कुलिकं तथा ॥ वक्ष्ये कंटकवेधं च उकुलीकं तथैव च ॥९॥ लग्नं लग्नाधिपं
 होरां स्वद्रेष्काण नवांशकान् ॥ द्वादशांशानुदयास्तांशास्साधनं ॥१०॥ लग्नात् शुभा
शुभं प्रश्ने जानको ग्रहनिर्णयं ॥ देवतानां प्रतिष्ठां च यात्रा प्रवेश साधनं ॥११॥
वास्तु दीपोर्थ विन्यासं कालविंशोपकास्तथा ॥ जलयोगास्त्वर्थकांडं वर्षमा
साहनिर्णयो ॥१२॥ तिथ्यादिखचराश्चंद्रतत्कालोदयजास्फुयाः ॥ अवस्थान
ष्टमुष्टी चलुकाभेदवदाम्यहं ॥१३॥ ज्योतिरंगमिदं सर्वं यो जानंति मनीषि
णः ॥ दीपवत्तान्विजानीयान्मोहांधकारनाशने ॥१४॥ विक्रमादित्यकालां
कासंचत्रिंशाधिकेशाते १२५ शोधिते जायते शाकाब्द शाका तद्युगणसाधनं
॥१५॥

शाकस्तांक खेंदुनः १०८७ सूर्यघ्नो माससंयुतः ॥ स च निस्त्वरुनो राशिः
मध्योंऽकाब्धिनृपान्वितः ४९ ॥१६॥ अध त्याब्धि हतो ४२ श्वाब्धि ४७ युतः
खखेन्दुभाजितः १४०० ॥ फलं धत्ताहतो मध्ये वेदा सोऽग्निगजाब्धिभिः ४८३८
पत्रे क्य मधुमासाद्य स्फुटे रुद्र युतो हतः ॥ स्वाग्निभिर्याततिथियुक्पृथक्
पृष्टि ६० युतस्त्रिधा ॥१८॥ अधोराशिद्वये योज्यं वेदाब्धिचन्द्रिगोष्टयः ४९३४
गोभूतिथ्यब्धिवेदे ४४१५१९ श्व पंचायुते ५००२ युगांगुकैः ॥१९॥ भक्त क्रमेण
लब्धे क्ये जायते च दिन्मानि च ॥ तेऽनो द्वो युतो राशेः ३ स घुद्रुणे परिस्फुटं ॥२०॥
द्रस्यहर्णानयनं ॥ राश्याद्यकेंभवा ११ गाब्धि ४७ तुरगेषु ५७ बुधस्य च ॥ ध्रुव

स्वरोदय कत्रीणि ३ पंचोगाश्वि २६ नागाब्धयः ४७ क्रमात् ॥२१॥ जीवस्य ध्रुवके द्राणी ध्
पंच विश्व १३ धराग्रारा: ५१ ॥ शुक्रोदग्रा शूरा विश्वं १३ पंचत्रिगूा ३५ ध्रुवो मतः ॥२२
१२९ मंदे शून्यं ० ग्रारा बाहुः २५ नंदाश्वि २९ विश्वमेव च ॥ पातस्य ध्रुवके वेदा ४ त्र्यक ३
तिथि १५ नगेषु च ५७ ॥२३॥ उच्चस्य पंच रामाब्धि ४३ दंता ३२ स्तत्व २५ ध्रुवो मतः ॥
एभिर्युक्तो भवेन्मध्ये ऽहर्गणात्साधितो ग्रहः ॥२४॥ इति रव्यादीनां ग्रहाणां
ध्रुवकः ॥ ७ ॥ नंदेषु ५९ वश्वि ८ नेचंद्रे ख नंदाद्रि ७९० ग्रारामनयनाः ॥ भौमे राम
रूपाग्नि ३१ चांगाश्वी २६ बुधे पंचजिना २४५ रदा ३२ ॥ पंच शून्यं ० गुरौ ज्ञेयं ष १२०
ट् नंदा ९६ वस्रु भार्गवे ॥ बाहु २ शून्यं ० ग्रा नै भुक्ति राहु त्रिकेभ स्मृताः ॥२७॥ चं
द्रोच्चे रस ६ रूपाब्धि ४१ कलाद्या ग्रहजा गतिः ॥ तथा युक्ता ग्रहा ज्ञेया मध्यमास्थदि

नेदिने ॥२८॥ इती सूर्यादीनां मध्यमागतयः ॥७॥ रात्र्याद्युच्चं करा २ सूमि
र्गेण ५५ स्करा ३२ रवौ वेदा ४ वस्का ८ जिना २४ द्राश्वि २२ स्करा ३३ श्चैव गजा ८
यः ४८ ॥ शुक्रस्य तेच रूपाश्वि २१ रसेंदु १६ युगुलं २ तथा ॥ मंदस्योच्चं नगा ७
ष्टाश्वि २८ नृपा १६ शून्यं ० तथैव च ॥ इति रव्यादीनां मंदोच्चानि ॥७॥ वामां
गे र्युगणः स्थाने २७ रव्याद्यानवका मताः ॥ एकादिनववातांके स्तत्संख्यास्तेच
कोष्टकाः ॥ युगणाकापिताः कोष्टा तिर्यक्कोष्ट चतुष्टये ॥ विन्यस्या मधुया मि
श्रा जायंते मध्यमा ग्रहाः ॥ तथा च ॥ मध्यमार्के नृपे १६ हत्वा भागादि द्वि
गुणं पुनः ॥ त्रि २ घ्नादि स्वकलाशुद्धो मध्यो भौमाध्वयान्विता १५२ ॥ भानुस

स्वरोदय· स७ गुणो भक्तो रसवेद ४६ कलान्वितः॥ वेदघ्नो ४ भास्करः सूनुर्बुधो म
ध्यो ध्रुवो युतः॥ भानुर्भानुहतो जीवसप्तघ्न ७७ सित एव च॥ सूर्या त्रिंशल ३०
१३० कुते शौरिदिवानाथ कलान्विताः॥ अर्कोन्नखो हते २० राहुर्नग ७ घ्नचकला
न्विते॥ शोधिते शुक्रमध्यायुः स्फुरस्यादेष एव हि॥ अर्धचक्रे समायुक्ति के
तो पातेन सर्वदा॥ इति मध्यग्रहानयनं॥ ७॥ रसोश्वदृग्भि संयुक्ता ४२७६ राम
कार्याकारणवत्सरा॥ भजेत्स्वाभ्राभ्र सूर्यैस्तान् १२००० शेषं पृथक् हराल्प
जेत्॥ तयोरसंहतं रामे ३ दिक् १० भक्ताप्त विलिप्तिका॥ त्रिःपंच ५ भूः १ द्वि १३०
बाणेषु ५२ तिथ्या १५ ब्धि ४ करबाहु २ भिः॥ पृथक् हतोश्व बीजानि जायं
ते भास्करादिषु॥ धनं ज्ञानार्किपातेषु शेषेष्वृणं सदा भवेत्॥ इति बीजानय

नं॥ ७॥ अवंत्स्यत्तरयामायारेखाया पूर्वपश्चिमे॥ तिथिघ्ना योजनाः खाष्ट ८०
भक्ताप्तेन ऋणं धनं॥ इति देशांतरानयनं॥ ७॥ इति बीज देशांतर सहिता
मध्यमा ग्रहाः शोधितचचनमध्याच भवेद्राहुः परिस्फुटः॥ अर्धचक्रे समायु
क्ति केतो पातेन सर्वदा॥ इति परिस्फुटो राहुकेतुश्च॥ ७॥ विभोमे मध्यगे सू
र्ये पातइबापदात्ततः॥ शेषे दलाप्त केयच्च तदंशादि रुतं ततः॥ भुक्तभोग्यं
च संगृह्य कोष्टतदंतरेण च॥ भौमकेंद्र कला हृत्वा तत्र लब्धं तत फलं॥ केंद्रे
मृगादि कर्काद्ये निधना जायते क्रमात्॥ संस्कृतेन तमंदोच्चं संस्कृतं स्यात्स
रिस्फुटं॥ कार्येश्चोच्चफलं प्राग्वत् द्वितीयं मंदकर्मणि तेन॥ इति भौममंद

च्चस्पष्टिकरणं॥ मध्यादित्यंपरिस्थाप्य बुधशुक्रोच्चपातनं॥ बुधशुक्रोच्चशी
घ्रोच्च बुधशुक्रोवि मध्यगो॥ कुजगुर्वार्किशीघ्रोच्च सर्वदा मध्यमोरविः॥ य

स्माच्च पात्यते यस्त तत्तद्धत्ये पातनं ततः॥ खांशोन खेचरः केंद्रं षड्भ्यांधोध
नर्णकं॥ भुजापादततः कोटौ ऋणधनंधनंऋणं॥ एवंध्यात्वा भुजांकोटिं स्था
पयेत्स्वर्णसंज्ञकं॥ ओजयुग्मपदा केंद्रे ततः कार्यगते च चकं॥ केंद्रांशांश्च या
ग्नाद्यो भुक्तो भोग्यश्च कोष्टकः॥ भुक्तभोग्यांतरेणाथ हृत्स्थाः केंद्रकलागु रा भ
णेत्॥ षष्टिलब्धफलंभुक्तेकोष्टयोज्यं ततो भुजात्॥ संस्कृतेनेन सूर्यंदुम १३१
ध्यौ सातां परिस्फुटौ॥ तत्कलाढ्येन संस्कार्यौ भौमाद्या मध्यमा ग्रहाः॥ मंदसं
ज्ञाभवेत्स्यैतेन नोगतिप्रसाधयेत्॥ कोष्टांतरगता भुक्तिः षष्टि ६० लब्धेनको

ष्टनः॥ ग्रहवत्संस्कृता मध्या रग्रवज्ज्ञायते गतिः॥ रूतिगतिमंदग्रहानयनं॥ भौ
मंदकानार्किजीवारान् मध्यमार्कात् विशोधयेत्॥ मंदांशः शुक्रसंज्ञार्कः शो
ध्यो मध्यज्ञशुक्रतः॥ शेषं केंद्रं षड्भ्रूर्ध्वं भुजर्णं स्वंतुकेंद्रकं॥ षड्राश्युनं त्य
था वस्तं च कं शुद्धं दलाधिकं॥ तत्केंद्रमंशाकान् कृत्वा समे रेखेशीघ्रकोष्टकं॥ भु
क्तं भोग्यं च संस्कार्यं कर्तव्यं कोष्टकांतरं॥ अंतरे भुक्तकोष्टस्यात् शुद्धाशुद्ध
धमार्णकं॥ स्वर्णेनानेन संस्कारकार्यं कोष्टेगतोनभा॥ विषमांसे यदा केंद्रे तदा
कार्यकलामयः॥ कलाद्यंतात् हतं कलाखार्क १२० लब्धेन संस्क्रियात्॥ अंतरा
कोष्टकं भुक्तकोष्टार्धेन भुजावसात्॥ संस्कृतः खेचरो मंदो मंदशीघ्रोभवेत्त

स्परो १५ तः॥शीघ्रोच्चामंदगत्यूनांकोणांतरहतागतिः॥खार्कैः१२० लब्धार्द्धसंस्कारोत्तरा
न्मंदगतेस्ततः॥शीघ्रोग्रहोजातस्तस्मान्मंदफलंपुनः॥पूर्ववत्सकलंतच्चसं
१३२ स्कुर्यान्मध्यमेग्रहे॥शीघ्रमंदग्रहोजातस्तस्माँ[illegible]फलंपुनः॥प्राग्वल्लक शिघ्र
लसंस्कारच्छीघ्रमंदग्रहास्फुटं॥तस्मिंश्चपूर्ववत्कुर्यात्खेटेकर्मचतुष्टयं॥अ
संकृत्कर्मणांतावत्यावत्ग्रहसमोग्रहः॥इतिपरिस्फुटग्रहानयनं॥छ॥ राम
अबीजाःशानिभौमार्क्याःसप्यातोरवि।नमितगु॥इंदोर्भुजफलसंयेयुक्तदेशा
चरोचिता॥सूर्योत्कार्यपदंकार्यपदराशेश्चशार्धकं॥भोग्येभोग्यहृतेभक्तेभो १३२
कलाभिर्व्वरंभवेत्॥स्वस्वभुक्तिहतंतेनतच्चस्वाष्टांगाग्नि३६०० हृतंफलं॥
१८००

उदयास्तग्रहेस्वर्णंगोलेयाम्येन्यथान्यथा॥इतिचरकर्मसाधनं॥छ॥स्वस्वभु
क्तिहतंसूर्यफलंचक्रेकला२१६०० हृतं॥लब्धंकलादिकंज्ञेयंतत्स्वर्णंखेटेयु
ग्मपादादगे॥इतिजातककर्मसाधनं॥इतिसर्वकर्मसाधिताः॥परिस्फुटाग्र
हाःद्युगणेसप्तशेषेकान्वारस्तद्गतवारजाःस्युहृदयादितिथ्याद्यागतगम्य
सनाडिका॥इतिवारानयनं॥चंद्रलिप्ताखखाष्टाभि८०० र्भक्ताःस्युर्भक्तभा
न्यथः॥शेषभागाश्चसंत्रहृद्गतस्यनरहृतेतिथिः॥इतितिथ्यानयनं॥छ॥
चंद्रार्कयोगजालिप्ताभक्ताअष्टशतैः८०० र्गताः॥योगाःशेषास्तितेभागे
योगगत्सैकभाजिते॥इतियोगानयनं॥व्यर्कचंद्रकलाभक्ताखगरामै
३६०

स्वरोदय र्तभवेत्॥बवादिकरणं षट्कं शेषे नाऽग्रस्थिथाविव॥कृष्णचतुर्दशी रात्रौ शकुनिस्यात्तु चेत्प
दं॥नागं दर्शाह्नि किंस्तुघ्नं प्रतिपत्प्रथमे दले॥इति करणानयनं॥वक्रमार्गोदयास्तानि
१२३ ज्ञायंते खेचराणां क्रांतिः॥चतुर्थकर्मकेंद्रेण प्रोक्तकेंद्रसमेन च॥क्रांतिकर्मणि धृत्वादौ स्पु
स्पष्टसाधनं ग्रहं॥ज्ञेयो मेषतुला यत्र गोलउत्तरदक्षिणे॥ऊंजयुग्मपदात् ज्ञेया क्रांतिः
क्रमोत्क्रमाभिधा॥पदांतसंख्यकोष्ठेभ्यः साधयेत् क्रांतिलिप्तकाः॥क्रमक्रांतिर्यथा ज्ञात
ज्ञातव्यासौम्ययाम्यगा॥उत्क्रमाख्या पुनः क्रांतिः परक्रांतिविशोधना॥कोष्टकक्रांति राम
साधनं॥भौमसप्तांक ९७ लोकेंदु १३ ज्ञेवेदेषु ५४ गजेषवः ४८ जीवे चांकाश्वि २९ वेदेषु ५४ १२३
सप्तासा १०७ खेषु ५० भार्गवः॥अर्कजे नृप १६ नागाश्वि २८ कलाद्याः कथिताः स्फुटाः॥अंतफल
भिधा जीवा ज्ञातव्याः सर्वदा बुधैः॥नंदरामा ३९ रसाग्निश्च ३६ रूपरामा ३१ चतुःकरा २४

तिथि १५ पंच ५ कल्पा जीवाः क्रमशः क्रांतिखंडकाः॥आदौ साध्यं पदं स्पष्टं गतगम्यक्र
मेण च॥पदराश्यर्द्धतो जीवा याताऽंशशेषकादिकं कला॥नष्टं धृत्वैकं द्वितीयं कर्मभू
मिषु ज्यागते ष्यांतराद्धतहतं नशैते हृतं॥तत् ज्ञायुतिदले योज्यं भज्याज्योनं दलं यदि
भोग्याधिकदले शोध्यं ज्ञायते स्पष्टषडकं॥स्पष्टषड्हतं पूर्वमनष्टगो शतै १०० हृतं
युतं भाग्लब्धं खंडेषु ततो ज्या ज्ञायते स्फुटा॥इति सर्वज्यानयनविधि॥एवं चतुर्थके
द्रेण केंद्रज्यां सधयेत्सदा॥चतुर्थफलतोप्येवं फलज्यानयनं कुरु॥चतुर्थकर्मकें
द्रज्याहतां तत् फलज्जीवया॥भक्ता फलज्यया चांत्यकर्णे खेचरजो भवेत्॥च
राशिद्यारसपाते भुं १ गजा ८ नागबु ५८ भूत्रिकं ३१ बुधपाते तथा शुन्यं ० रूपा=

स्वरोदय श्वि२१दशपर्वता ७ देवाचार्यस्य पाते द्वौ २ द्वाविंशति २२ धरा १ कृति २० शुक्रपृ
धरागोश्वि २९१ रामाब्धि ४६ देवता मताः ३३ शौरिपाते त्रिकं ३ त्रेकं १३ शंकरापु
१२४ च विंशति २५ एतेनुलोमजाः पाता मध्यमाः परिकीर्तिताः॥ व्योमांका ९० व्योम
चंद्र १५० व्योमांगा ६० व्योमभास्करा १२० व्योमसूर्या १२० कुजादिनां कला विक्षे
पजा मता॥ मंदारजिवजाः पातस्फुटं कर्मफलेनते॥ सितज्ञयास्तृतीयेन संस्कृताः
स्फुः परिस्फुटान्॥ सायनामध्यशुक्राज्ञस्फुट मंरमंत्रिणतेभ्यश्चस्पष्टपातोनास्ततो
गोलं विचिंतयेत्॥ तद्भुजा नुर्ववज्जीवा विक्षेपिलीप्तकाहता॥ अंत्यकर्णेन भक्ता १२४
तं विक्षेपास्युः परिस्फुटाः॥ एवं पातेन चंद्रस्य कार्या जीवा नवाहता॥ बाणे ५ र्भक्ताः श्च
जायंते चंद्रविक्षेप लिप्तिका॥ क्रांतिविक्षेपयोश्चारे समादिक् भिन्न दिक् स्थिते॥

स्वविक्षेपयुताहीना क्रांतिः स्पष्टा प्रजायते॥ सूर्यस्य केवलां क्रांतिं साधयेद्दक्षिणोत्तरां॥
एवं कृतेन खेटानां ज्ञेया याम्योत्तरा गतिः॥ इति क्रांतसाधनं॥ प्राक घटिकादिकं कृत्वा जन्म
कालं परिस्फुटं॥ कर्तव्या खेचराः स्पष्टा असकृत् कर्मणा ततः॥ १॥ सायनार्कस्य भोग्यादि
षड्संख्योदयनाडिभिः॥ दिनमानं ततो रात्रिषष्टिमध्या विशोधिताः॥ २॥ द्युमध्याद्दिन
मध्याह्नं निशार्द्धं मध्यरात्रिकं॥ एवं कृत्वा घिकं स्पष्टं ततः साध्यं नतोन्नतं॥ ३॥ इष्ट
कालार्कमध्याह्नमध्यकालो नतं मतं॥ उन्नतं मध्यरात्रार्कमध्यो भवति सर्वदा॥ ४॥
मध्यरात्रिं च मध्याह्नं यावत्पूर्वकपालके॥ शेषे परकपालस्थे नतं ज्ञेयं विचक्षणैः॥ ५॥
सायनार्केण ये भुक्ताः पूर्णा मेषादिराशयः॥ तेषां स्वोदयरूपाणि पलानीह समाहरेत्॥ ६॥
भुक्तभागादिके शेषे भोग्यादय कृते कृते॥ त्रिंशता प्राप्तितं पूर्वेषु स्यात्तं घटिकादिकं॥ ७॥

स्वरोदय जन्मनाडिसमायुक्तं जायते घटिकारविः ॥ षष्ट्याधिके तु षष्ट्यानं तच्छेषे नाडिकारविः ॥८॥
सूर्यविन्नाडिकामध्यान्मेषादिस्वोदयान्हरेत् ॥ शेषं त्रिंशत्हतं भक्तं मशुद्धोदयसख्यया
१२५ ॥९॥ भामेगोमयनांशोनं भागादि भोग्यराशिजं ॥ ततः प्रयोज्यते लग्नं यूतं स्यादंगतान्वि
तं ॥१०॥ प्राग्वल्लंकोदये भोनुः साध्यो जन्मघटिविता ॥ कार्यः पूर्वं जते नोनो युक्तः परन
ते न तुः ॥११॥ तदर्कोल्लग्नवत्साध्यं लंकोदयैः स्वभोदयं ॥ षट्राश्यन्वितं तत्रुबधुभावं परि
स्फुटं ॥१२॥ लग्नं चतुर्थमध्याच्च चतुर्थं सप्तमात्त्यजेत् ॥ सप्तमं खगमध्यात्तु खं भं लग्नादिशो
धयेत् ॥१३॥ स्वस्वशेषत्रिभागां तं पृथग्युपदिशं गुणं ॥ स्वस्वकेंद्रयुतं भावाज्जायंते द्वित्रिसङ्ग राम
१४ काः ॥ एवं द्वादशभागास्ते प्रसिद्धं तिय थाक्रमं ॥ संधिस्यात् भावयोगार्थं तत्रस्थो निःफलो ग्र १२५
१५ हः ॥ गतभावफलो ज्ञेयः संधितो हिनखेचरः ॥ संधिमानाधिको यस्तु सोग्रभावफलो मतः ॥
१६ वर्तमानफलं पूर्णं भावजं यच्छति ग्रहः ॥ भावांशसदृशो यातो हीनाधिके तु पात्ततः ॥१७॥ भा

वप्रवृद्धमानेन फलवृद्धिः प्रजायते ॥ भावअल्प्यफलं पूर्णभावाद्गासात्फलक्षयः ॥
१८ ॥ एवं भावफलं देयं स्वदशाप्राप्तखेचरात् ॥ स्वभावफलमानेन गतगम्यं स्वकाल
जं ॥१९॥ जन्मयात्राविवाहे च प्रश्ने नृपाभिषेचनः ॥ व्रतबंधप्रवेशे च भावस्तं अश्विंतयेत्प
हां ॥२०॥ इति भावसाधनं ॥ जातकयात्रायुद्धे पृच्छालग्नार्थनिर्णयो भवेत् ॥ स्थापनं दीक्षार्थ
वेधे षड्बलरहिता महाविफलाः ॥ २१ ॥ तस्माद्बलविज्ञानं वक्ष्येहं षट्प्रकारभेदेन ॥ स्थान
दिक्कालचेष्टानैसर्गिकदृष्टिरूपेण ॥२२॥ षष्ठिलिप्ता भवेद्रूपं पंचाप्यिश्वरणो नित्यं ॥ त्रिं
शल्लिप्तादलं पादः स्यात्तं च दश लिप्तिकाः ॥२३॥ स्वनीचोनो ग्रहः स्वाप्यश्चक्रशुद्धोऽगभाधि
काः ॥ अंगाप्तं भावतो विघ्नं रूपादिस्वोच्च अं[illegible]लं ॥२४॥ बलं पादोनकं रूपं स्वत्रिकोणगते ग्र
हे ॥ बलं स्वर्क्षेधिमित्रर्क्षे सार्द्धपादकला फलं ॥२५॥ पादो मित्रगृहे ज्ञेयः पादार्द्धं समखेट

स्वरोदय भे॥तस्यार्द्धं शत्रुभे प्रोक्तं तदर्द्धं मधिशत्रुभे॥२६॥स्वगृहादिगतानां च ग्रहाणां कथितं बलं
हारादिसप्तवर्गेतत्प्राप्यं स्वनाथसंख्यया॥२७॥सितेंदु पादवीर्यौ स्तः समराशिनवांशके॥
१२५ युजराश्यंशके शेषा रूपार्द्धबलिनो ग्रहाः॥२८॥रूपार्द्धार्द्धबलाः खेटाः केंद्रादित्रितये स्थि
ता द्रेष्काणः क्रमतः पादबला युक्तीवयोषितः॥२९॥इति स्थानबलं॥मंदाद्विशोधयेल्ल
ग्नं भानुभौमाच्चतुर्थकं॥ज्ञेयं मध्यात्यजेत् द्यूनं दशमं शुक्रचंद्रतः॥३०॥यदिशेषं बलाधि
क्यं शोध्यं मंडलकात्ततः॥रससंख्याहृते भागे कलाद्यं दिक्बलं स्फुटं॥३१॥इति दिक्बलं॥
व्यर्केंदुर्भाजितः षड्भिश्चक्रशुद्धो ग्रभाद्धिकः॥बलं शुक्ले च तत्कृष्णे रूपमध्याद्विशोधितं॥ राम
३२॥शुक्लकृष्णबलं ज्ञेयं सौम्यासौम्यग्रहे क्रमात्॥क्रूरयुक्तो बुधः पापः क्षीणचंद्रस्तथैव १२५
च॥३३॥निशामंदारचंद्राणां दिवाशुक्रार्कमंत्रिणां॥नतोन्नताद्बलं द्विघ्नात् न्यस्य रूपमहि
र्निशं॥३४॥दिवारात्रिविभागेषु ज्ञार्कौ कौंदुसितारके॥उदयादिबलं रूपं जीवे रूपमहर्नि

शं॥३५॥अब्दमासादिनेकालहोरायां स्वेशजं फलं॥पादवृध्याक्रमेणैतत् बुधाः कालबलं विदुः
॥३६॥इति कालबलं॥मंदेद्वंद्वे दक्षिणाक्रांतिघने सौम्या दृणं मतं॥व्यास्ता सितार्के जीवारे बुधः क्रां
तिसदा धनं॥३७॥संस्कारे परमक्रांत्या कृत्वा नो त्रिगुणं भवेत्॥परक्रांत्या नतो राशिः षट्विभ
क्तायनं बलं॥३८॥स्वर्यायनबलं यत्तु चंद्रपक्षबलं यथा॥द्विघ्नं स्वस्वबले योज्यं पूर्वायाने सदा बुधे
॥३९॥लिप्तिकातुल्यभौमादिग्रहयुद्धे तात्कालिके॥तयोर्बलांतरं कृत्वा विक्षेपांतरभाजितं॥४०॥ल
ब्धं पूर्वबले योज्यं सौम्याशासंस्थिते ग्रहे॥दक्षिणाशास्थिते शोध्यमेवं युद्धबलं स्मृतं॥४१॥मध्य
ग्रहाग्रहस्य शेषा यावत्संख्याधिकोनकः॥तदर्धं तत्क्रमेणैव स्वशीघ्रे स्यादृणं धनं॥४२॥शीघ्रे मध्यो
नितं कार्यं वक्रार्धादधिकं यदि॥वक्रयुद्धं हरेत् षड्भिश्चेष्टाबलफलं मतं॥४३॥इति चेष्टाबलं॥द्र
ष्टानिरिक्षकः खेटः शेषमंशादिकं मतं॥ग्रहाणां जायते दृष्टीबलं लिप्तादिकं मतं॥४५॥शो
धिते एकराश्यद्दशराश्यापि केथवा॥न पश्यंति स्थितास्तत्र जात्यंधाइव खेचरा॥४६॥एकरा

स्वरोदय स्याधिके रूपहीनं शेषार्द्धं तेतु दृक् च्युते द्विभाधिके दृष्टिस्तिथिसंख्याकलान्विता ॥
४७॥ त्र्यधिके शोधिते वेदात् षष्टिरूपयुतार्द्धिता ॥ वेदाधिके भवेत् दृष्टिः शोधिते पंचम
१२७ ध्यतः ॥४८॥ पंचाधिके तु पंचोने द्विघ्ने दृष्टिफलं मतं ॥ षट्राश्यधिके दिग्भ्यः शोधिते द
लिते दृशो ॥४९॥ पाददृष्टिः स्थितः शौरिर्दृश्ये द्वे तु स्थितो गुरुः ॥ पादोनदृष्टिर्भौमः पू
र्णदृश्यात्रपश्यति ॥५०॥ सर्वे दृष्टिफलं साध्यमेकैकं खेचरं मति ॥ सौम्यासौम्यचतुर्थांशोनब
ले कार्योऽसणं धनं ॥५१॥ इति दृष्टिबलं ॥ लग्ननाथबलं लग्ने जीवज्ञे दृष्टिसंयुतः ॥ शेषे शुभा
शुभा दृष्टिस्तुर्यांशोनयुतो निता ॥५२॥ नृराशेरुदये लग्ने बलं रूपं प्रयच्छति ॥ दलं चतुष्पदा राम
प्ये युक्तीनराशौ न किंचन ॥५३॥ ते च चतुष्पद कीटाप्याः खस्त्री बंधुगताक्रमात् ॥ रूपवीर्याश्च वं १२७
त्येवं स्वकीयास्ते बलोज्झिताः ॥५४॥ अंतरस्थान्स्वदत्तोनानन्तत्र शुद्धांगषष्ठाधिकान् ॥ हृ
त्वा राशीन् हरेत् षड्भिर्ज्जायते राशि दिग्बलं ॥५५॥ राहोसौरि बलं देयं केतोः सूर्यबलं त

था ॥ भावानां स्वर्क्षजं वीर्य एवं बालव विनिर्णयः ॥५६॥ इति षड्बलसाधनं ॥ अस्य करणसू
त्रविवरणं क्रियते ॥ प्रथमं तावदहर्गणस्य विवरणं लिख्यते ॥ तद्यथा ॥ विक्रमादित्यसंवत्
कालसंख्याक मध्यमात् ॥ पंचत्रिंशदधिकं शतं १३५ शोधयेत् ॥ शोधिते सति चैत्रादिश
क संवत्सरो भवति ॥ शाके शाकं कर्मभूमौ संस्थाप्य सप्तनवधिक सहस्रेण १०९७ ऊनयेत्
शेषाकृतकरणवत्सरा भवंति ॥ ते च द्वादशभिः १२ गुण्यते ॥ चैत्रादिकान् गतमासान्
योजयेत् ॥ स च मध्यमो मासगणो भवति ॥ मध्यममासगणस्त्रिःस्थानगतो ३ धार्यः
तत्र मध्यमराशावंकाश्विनृपान् १६२९ योजयेत् ॥ तदधस्त्रिवेदघ्नः ४३ अश्वाब्धिः
४७ युक्त कर्त्तव्यः ॥ तस्य राशेश्चतुर्दशभी शतै १४०० भागो हार्यः ॥ भागो हृते यल्लभ्य
ते ॥ तदंकांतं स्थापनीयं पश्चात् दूर्ध्वराशौ वेदाग्निगजाब्धिभिः ४८३८४ भागो

स्वरोदय ग्यात्यः॥यल्लभ्यते॥तस्मिन् पूर्वलब्धांकसंयुक्ते धिमासाल्लभ्यंते॥तान् उर्ध्वराशौ संयो
जयेत्॥ततःपरिस्फुटो मासगणो भवति॥सच परिस्फुटमासगणः॥स्वाग्निक्षिः॥३०॥
१२८ गणते शुक्लप्रतिपदादि तिथीयुक्तकरणीयः॥सच मध्यमोहर्गणो भवति॥सच मध्यमाह
र्गणः॥एकः पृथक् उर्द्धः ध्रियते द्वितियः षष्टियुक्तो द्वस्त्रिधा धार्यः॥अधोराशिद्वयैः२ वेदा
ब्धिवह्निगोब्धयो ४९३४४ योजनीयः॥तत्राधस्तनराशौ गोभूतिथ्यब्धिवेदे ४४१५९ भागे
ग्यात्यभागे कृते च लभ्यते॥तदंकांते धरणीयं॥पश्चात्तदूर्द्धराशौ पंचाशत्सहस्रै ५००००
भागो हार्यः॥यल्लभ्यते तत्पूर्वलब्धाधःस्थापितियं॥तथा दूर्द्धराशौ चतुषष्ठ्या ६४ भागो ह्री
यते॥यल्लभ्यते तत्पूर्वलब्धांकद्वयः २ युक्तां कृत्वा उर्द्धस्थापित मध्यमाहर्गणराशिमध्यात् शो १२८
धयेत्॥ततस्तस्मिन् त्रि ३ युक्ते अहर्गणः स्फुटो भवति समायाते अहर्गणे सलिमुनिक्षि प्रभागो
ग्यात्यः॥भागे गृहीते उद्धरितांकेन रव्यादिकोणगतवारो लभ्यते॥इते प्रवारसकाउदिका

ग्रहास्तेनाहर्गणेन कर्तव्यः॥इति अहर्गणानयनं॥अथ सूर्यादि ध्रुवंकांक विवरणं क्रियते॥
तत्र राश्यादयो राशिअंशकलाविकलारूपाश्चतुः॥स्थानगतिर्ज्ञातव्याः तत्र सूर्यध्रुवके ११
षड्विंशति २६ सप्तपंचाशत् ५७।० चंद्रध्रुवके ११ एकादश पंचदश १५ विंशति २० शुन्यं० भौमध्रुव
के पंचः चत्वारिः ४ शुन्यं० पंचाशत् बुधध्रुवांके॥त्रिंश ३० पंच ५ षड्विंशति २६ सप्तचत्वारिंशत् ४७
जीवध्रुवके षट् ६ पंच ५ त्रयोदश १३ एकपंचशत ५१ शुक्र ध्रुवके दश १० पंच ५ त्रयोदश १३ पंचत्रिंश
त् ३५ शनि ध्रुवके शून्यं० पंचविंशति २५ एकोनविंशत् २९ त्रयोदश १३ राहु ध्रुवके चतस्रः ४ त्रयो
दश १३ पंचदश १५ सप्तपंचाशत् ५७ चंद्रोच्चध्रुवके पंच ५ त्रयोविंशति २३ द्वात्रिंशत् ३२ पंचविंश
ति २५ अथ सूर्यादि ग्रहगति विवरणं कथ्यते॥तत्र कलाविकलारूपं द्विकं ज्ञातव्यं॥तत्र सूर्यगति
एकोनषष्टि ५९ अष्टौ च ८ चंद्रगतिः नवत्यधिक सप्तशतानि ७९० पंचत्रिंशत् ३५ भौमस्य एकत्रिं
शत् ३१ षड्विंशति २६ बुधे पंचचत्वारिंशदधिकं शतद्वयं २४५ द्वात्रिंशत् ३२ जीवे पंच ५ शून्यं० शुक्रे

स्वरोदय षणवतिः९६ अंशे८ शनेः द्विकं२ शून्यं० राहोस्त्रि३ एकादश११ चंद्रोच्चषट्६ एकचत्वारिं४१ अथसू
र्यादीनां उच्चं कथ्यते।।तच्चराशिकलाविकलारूपं ज्ञातव्यं तत्र सूर्ये द्विकं२ सप्तदश१७ पंचपंचाशत्५५
१२९ त्रयस्त्रिंशत्३३ भौमोच्चे चतस्त्र४ अंशे८ चतुर्विंशति२४ सप्तदश१७ बुधोच्चे सप्त७ चतुर्दश१४ त्रि
पंचाशत्५३ पंचपंचाशत्५५ जीवोच्चे अष्टविंशति२८ षोडश१६ शून्यं० अथसूर्यादीनां मध्यमा
नयनमाह।।पूर्वानीतमहर्गणं कर्मस्त्रमौ स्थापयेत्।।तत्र च एकं दशशतं सहस्रदशसहस्रं
लक्षं दशलक्षमिति अदिक्षि महांशांतेरंकस्थानकैर्नवकाखेटखेटं प्रतिज्ञातव्याः।।तेषु च
नवकेषु एकादिनवपर्यंतैरंकैः कोष्टकाम्नात्ख्या।।तेचकोचकास्तिर्यगाद्याकोष्टकचतुर्युग्र राम
शिभागकलाविकलारूपान्यसनीयाः।।यस्ययस्यग्रहस्य मध्यमानयनं क्रियते।।तस्यपंक्तौ १२९
ध्रुवको।।राश्यादिको योजनीयः।।तत्र कला विकलाभागराशिस्थानान्येकीकृत्यषष्ट्या६०
त्रिंशता३० राशिस्थानं यावत्प्राप्यते।।ततो राशिस्थाने द्वादशाधिशोधयेत्।।एवंकृते

दक्षिणोत्तरमध्यरेखासंचाराश्यादिका बीजदेशांतरसहिता मध्यमा ग्रहा भवंति।।
अथबीजानयनमाह।।नंदाश्वगुणाग्नि३१७९ युतं शाककालं धृत्वा द्वादशभिसहस्रै
१२००० भजेत्।।शेषं भवति तत् भाजकात्।।द्वादशसहस्ररूपात् पातयेत्।।भाज्यं
शेषं शेषान भाजक शेषं २ ज्ञात्वा।।तयोर्मध्ये यत् अल्पं भवति।।तत् भाजकान्।।द्वाद
शसहस्ररूपात्।।पातयेत्।।भाज्यं शेषं शेषान भाजक शेषं २ ज्ञात्वा।।तयोर्मध्ये यत् अ
ल्पं भवति तत्र त्रिघ्नं३ कर्तव्यं।।ततो दशभक्ताप्तेन बिलिप्तिका भवंति।।ताश्च सूर्यादिग्र
हाणां स्वस्वगुणकारैर्गुणयेत्।।तत्र सूर्ये त्रिगुणा३ चंद्रे पंचगुणा५ भौमे रूपः१ गुणाः
बुधे द्विपंचाशत्५२ गुणा गुरौ पंचागुणा५ शुक्रे तिथि१५ गुणाः शनौ वेदः४ गुणाः
पाते द्वि२ गुणाः चंद्रोच्चे द्विगुणाः२ कृत्वा षष्टि६० षष्टि६० त्रिंशत३० चटापयेत्।।अने

स्वरोदय नमकारेणसर्वग्रहाणांबीजसाधनंकर्तव्यं।।तानिचबिजानि।।मंगलबुधशनैश्वरपातेधू
धनंशेषेषुऋणंकर्तव्यं।।एवंकृतेसतीसबीजामध्यमग्रहाःभवंति।।इतिबीजानयनं।।
१४० अथदेशांतरानयनमाह।।लंकाकांतिवत्सयुग्मंअवंतिगर्गराटकंस्थानेश्वरंतथामेरु
रेखेयंदक्षिणोत्तराः।।एवंदक्षिणोत्तरांमध्यरेखांज्ञात्वा।।पूर्वापरभागे।।यत्रस्थानेग्र
हा।।नयनंक्रियते।।तत्स्थानमध्यरेखयोरंतरालयो।।जनानिसूर्यादिग्रहाणां।।
स्वीयस्वीयगतिसंख्ययागुणयेत्।।ततोशीत्या८० भागोग्राह्यायल्लभ्यतेतद्देशांतर
फलंविकलारूपंभवति।।तच्चकेचित्।।देशरेखायाः पूर्वभागेतिष्ठंति।।तेषुग्रहस्यऋणं राम
कार्येयेतुपंचमेभागेतेषुग्रहस्यधनंकार्ये।।एवंकृतेजैबीदेशांतरसंस्कृताअस्मिन्स्था १४०
नगतामध्यमग्रहाभवंति।।इतिमध्यमग्रहानयनं।।क्षेपं१देशांतरं२भुक्ति३बीजं४च
रफलं५तथा पंचभिसंस्कृतामध्याजातंभासंविधौ धोस्तथाअत्रमध्यमोराहुः।।राशि

द्वादशात्संकचक्रंमध्यात्।।शोधितपरिस्फुटोभवति।।सचराहुचक्रार्धेनराशिषट्केनयुत
केतुर्भवति।।इतिराहुकेत्वोस्पष्टीकरणं।।अथभौममंदोच्चस्पष्टीकरणमाह।।प्रथमं
मध्यमार्केकर्मसस्थाप्य।।मध्यमाभौमेनउनयेत्।।शेषंशीघ्रकेंद्रंभवति।।केंद्रेमकरादि
केधनंकर्तव्यं।।कर्कादिऋणमिति।।केंद्रियाणिकानिचित्पदानि।।एक१द्वि२त्रि३क्र
मेणपतंति।।तानिपातईत्वा।।वर्तमानंपदमंशादिकंकार्यं।।तेषांमशानंभवति।।९० संख्य
यापदंसंपूर्णंभवति।।पंचचत्वारिशद्दशकाः४५पदार्द्धंभवति।।तस्मात्पदार्द्धान्यदिकें
द्रपदंशेषंअल्पंभवति।।तदातदेवग्राह्यं।।यदिपुनरधिकंभवतितदातस्मिन्नभवति९०
संख्यांशामध्यमादिशोधितेयत्शेषंभवति।।तदल्पकंग्राह्यं।।तस्याल्पकस्यअंशसं
ख्याभौमेच्चकोष्टकेभुक्तोग्राह्यःतथाभोग्यकोष्टकंचतयोरंतरंकार्यं।।तेनांतरेणभौमशी

स्वरोदय ग्रकेंद्रकला विकलाधिस्था गुणनीया॥षस्याषष्ट्यासर्वोर्द्धं राशि यावत्॥तस्यषष्ट्याभा
गेलब्धोदिर्भवति॥तत्फलं कोष्टके योजयित्वा॥अंशकादिकं कार्यं॥तत्फलं भौममंदोच्चस्य
१४१ संस्करणीयं॥कथं यदि केंद्रं मकरादिकं भवति॥तदा मंदोच्चस्य फलं याजयेत्॥यदि कर्का
दिकं तदा शोधयेत्॥एवं कृते भौममंदोच्चस्य स्पष्टं भवति॥तथा द्वितीये मंदकर्मणि मंदशी
घ्रभौमात्॥पूर्ववत् उच्चफलं कृत्वा॥असंस्कृतमंदोच्चे पूर्ववत् संस्करणीयं॥ततो भौम
मंदोच्चं परिस्फुटं भवति॥इति भौममंदोच्चस्य स्पष्टीकरणं॥अथ ग्रहाणां सभुक्तिकानां मंद
कर्मणि विवरणमाह॥पूर्वानीतं मध्यमग्रहं सभुक्तिकं एकं एकांते स्थापयेत्॥तथा त राम
मेव ग्रहं गतिरहितं द्वितीयं॥कर्मभूमौ संस्थाप्य मंदोच्चेन उन्नयेत्॥यदा मध्यमग्रहमध्या १४१
त् मंदोच्चं न पतति॥तदा मध्यमे ग्रहे द्वादशराशिं दत्वा॥स्वोच्चं पातयेत्॥परं बुधशुक्रानय
यनेन मध्यमांके ससभुक्तिकर्मभूमौ संस्थाप्य॥बुधशुक्रसत्केन मंदोच्चेन उनयेत्॥ततो

बुधशुक्रवादित्यग्रहो अतो बुधशुक्रयोर्मंदादिकर्मे चतुष्टयं सूर्यस्य सभुक्तिकस्य करणी
यं॥अनयारित्यासोच्चोनो ग्रहः केंद्रं भवति॥तस्मिन् केंद्रे भुजाकोटिसाधनार्थे धनर्णवि
कल्पना कार्या॥तत्र षड्राश्यधिके केंद्रे भुजया धनं कार्यं॥षड्राश्यूने ऋणं भवति॥तदा प
दवशात् कोटौ धनर्णे कार्ये॥कथं केंद्रे प्रथमपदस्थे कोट्या ऋणं कार्यं द्वितीयपदस्थे धनं
कार्यं हि तृतीयपदस्थे धनं कार्यं द्वितीयपदस्थे धनं कार्यं॥तृतीयपदस्थे धनं॥चतुर्थपदस्थे
ऋणं॥एति एवं भुजकोटिश्च धनर्णात्मिका भवति तदा ऋणसंज्ञा॥तथा यदि कोटि धना
त्मिका भवति तदा धनसंज्ञा कार्या॥करणात्मिका ऋणसंज्ञा कर्तव्या॥इति भुजकोटिसाध
नं॥अथ कस्मात् केंद्रात् ग्रहकर्म समारभेत्॥कथं केंद्रं प्रथमपदस्थिते गतं कर्तव्यं॥गतमि=
ति किमुच्यते केंद्रे प्रथमपदस्थिते राश्येकद्वित्रिकं यावत् यदा भवति तथा प्रथमकेंद्रे यथा

स्वरोदय वस्थितमेवज्ञातव्यं॥केंद्रत्रितीयपदस्थितेराशिसप्ताष्टनवकंयावत्॥यदाभवतितदापदद्वय
संक्रं॥राशिषट्कंतृतीयपदकेंद्र॥मध्यात्पातयेत्॥शेषंगतंभवति॥केंद्रेद्वितीयचतुर्थपदस्थितेए
१४२ षांकर्त्तव्यं॥एवमितिकिमुच्यते॥केंद्रेद्वितीयपदस्थितेराशिचतुपंचषट्कंयावत्यदाभवतित
दाराशिषट्कंगृहीत्वातन्मध्यात्द्वितीयपदकेंद्रेपातयेत्॥शेषएकंभवति॥केंद्रेचतुर्थपद
स्थितेराशिदशएकादशद्वादशकंयावत्॥यदाभवतितदाराशिद्वादशकेगृहीत्वा॥तन्म
ध्याच्चतुर्थपदेकेंद्रेपातयेत्॥शेषएष्यंभवति॥एवंकेंद्रस्यगतकर्मणिवाक्येनयत्शेषं
राश्यादिकंभवति॥तत्अंशादिकंकर्त्तव्यं॥ततोमंदकर्मणितेरंशेनिजसंख्यायायोमंद राम
कोष्टकोभुक्तोभवतिसप्रथमस्थानेधरणीयः॥तथाभोग्यकोष्टकः॥तदग्रेद्वितीयस्था १४२
नेधरणीयः॥तेचकोष्टकाकलाविकलारूपाज्ञातव्या॥तयोर्भुक्तभोग्यकोष्टकयोरं
तरंकार्यं॥तच्चांतरकलाविकलामयंऊर्द्धाधोधकरूपंभवति॥तदाकेंद्रशेषंकलादिकं

वतिनतुअंशादिकं॥तदाभुक्तकोष्टकस्थानेशून्यंलिखित्वातदग्रेद्वितीयस्थानेप्रथम
कोष्टकोधरणीयः॥सचएवकलाविकलामयमंतरंभवति॥ततःकेंद्रसक्तकलाविकलाऊ
र्द्धाधोधिःसंस्थाप्यतस्यांतरस्यकलासर्पेणऊर्द्धकेनकेंद्रसक्तकलाविकलारूपंऊर्द्धा
केनकेंद्रराशिद्वयंगुणनीयं॥विकलारूपेणाधस्तनांकेनकलाविकलानांअधस्तनांकरा
शिद्वयंगुणनीयं॥अधस्तराशिषष्ट्या ६० विभज्ययल्लभ्येततदुपरिमराशौयोजयेत्॥
पश्चात्अर्धाधराशिद्वयं॥एकीकृत्यषष्ट्याविभजेत्॥यल्लभ्येततत्उपरिमराशौप्रक्षि=
प्यषष्ट्या ६० विभज्ययलभ्येतत्कालशेषेविकलारूपंभुक्तकोष्टकसभुक्तफलंभवति॥
ततफलंभुक्तकोष्टकेप्रक्षिप्यषष्ट्याविभजेत्॥ततोअंशादिकंमंदफलस्यपदंभवति॥भु
जसक्तधनर्णंज्ञात्वामध्यमग्रहास्तेनफलेनसंस्करणीयः॥कथंसस्कारः॥यदाभुजायं=

स्वरोदय धनं भवति तदा ग्रहस्य तत्फलं योजनीयं॥ यदा ऋणं भवति तदा ग्रहमध्यात् फलं शोधये
त्॥ एवं ज्ञात्वा रविचंद्रौ तेन सकलफलेन संस्कृतौ परिस्फुटौ भवतः॥ शेषास्तु भौमादिका
१४२ तेन उर्द्धफलेन संस्कृता मंदसंज्ञा भवंति॥ अथ चंद्रवर्जित ग्रहस्य कला विकलारूपं
चंद्रस्य तु चंद्रो गतिहीनां मध्यमगतिं केंद्रकलाविकलावत् कर्म भौमौ संस्थाप्य कोटयंत
रेण पूर्ववत् गुणयेत्॥ तत्सर्वं पूर्वगत्या उर्द्ध चटापयेत्॥ सर्वार्द्ध राशिस्थाने विकलारूपं भ
वति॥ तस्मिन् षष्ट्या चटापिते कलादिकं गतिरूपं भवति॥ तेन फलेन कोटिवशात् संस्कृ
ता मध्यमा गतिग्रह रूपा भवंति॥ कथं यदि कोटि धनात्मिका तदा चंद्रसूर्यस्य मध्यमग राम
तिमध्ये तत् फलं सकलं योजयेत्॥ भौमादिग्रहस्य मध्यमगतिमध्ये तु तत्फलार्धं योज १४२
येत्॥ यदा कोटि ऋणात्मिका भवति तदा चंद्रसूर्यस्य मध्यमगतिमध्ये तत् फलं सकलं
शोधयेत्॥ भौमादिगतिमध्यात् अर्धं फलं शोधयेत्॥ एवं कृते सूर्यचंद्रस्य मध्यमा-

गतिः परिस्फुटा भवति॥ भौमादिस्य मध्यमगतिस्तु मंदसंज्ञा भवति॥ अनेन मंदकर्मणा
कृतेन सूर्यचंद्रौ सभुक्तिकौ नासिध्यानयन परिस्फुटौ भवेत भौमाद्यास्तु सभुक्तिका मंदग्रहा
भवंति॥ इति प्रथमं मंदकर्म॥ ॥ अथ भौमादि मंदग्रहणो सभुक्तिका नाशिघ्रानयन
विवरणमाह॥ मंदग्रहः सभुक्तिकाः एकाः एकांते धरणीयः॥ तथा तदेव मंदग्रहं गतिर
हितं कर्मभूमौ संस्थाप्य शीघ्रोच्चमध्याद्विशोधयेत्॥ कथं मंदग्रहाणां मंगलगुरुशनी-
नां मध्यमार्कः शीघ्रोच्चः॥ तत एते मंगलरूपशनि मंदग्रहा॥ मध्यमादित्यमध्यमाद्विशो
धयेत्॥ तथा सूर्यस्य मंदबुधशुक्रस्वरूपस्य पूर्वागत मध्यमौ बुधशुक्रौ शीघ्राच्चौ ज्ञातव्यौ
ततो मंदबुधशुक्रस्वरूपं सूर्यमध्यमबुधशुक्रमध्याद्विशोधयेत्॥ यदा मंदग्रहः॥ शी
घ्रोच्चमध्यात न पतति॥ तदा द्वादशराशयात्मकं॥ मंडलं॥ शीघ्रोच्चस्य दत्वात न्मध्या

स्वरोदय न्मदग्रहं पातयेत्॥ शेषं शीघ्रकेंद्रं भवति तस्मिन्केंद्रे षड्राश्याधिके भुजायां ऋणं भवति
॥ षड्राश्यूनं धनं॥ एवं धनऋणात्मकां भुजां कृत्वा एकांते स्थापयेत्॥ पश्चात् त्केंद्रात्
१४४ शीघ्रकोष्टकमानयेत्॥ कथं यदा केंद्रं षड्राश्यूनं भवति॥ तदा तत्केंद्रे अंशादिकं कार्यं
यदा षट्केंद्रे राश्यधिकं भवति॥ तदा तत्केंद्रं द्वादशराश्यामंडलमध्याद्विशोधयेत्॥ शेषं
भवति तदंशादिकं कार्यं॥ कथं भुक्तकोष्टकं भोग्यकोष्टकमध्याद्विशोधयेत्॥ शेषं अं
तरं तच्च धनात्मकं भवति॥ यदा भुक्तकोष्टक भोग्यकोष्टकसंध्याद्विशोधयेत्॥ शेषं अं
तरं तच्च ऋणात्मकं भवति॥ एवमंतरं धनार्णात्मकं पूर्ववत्संस्थाप्य पश्चात् यदि केंद्रं विषमां राम
शो भवति तदा कलामयं तं कृत्वा केंद्रकलमध्याधि[illegible]धजयेत्॥ तत्केंद्रकलादिकं पूर्ववत्सं १४४
स्थाप्य॥ कोष्टांतरेण पूर्ववत् गुणयेत्॥ ततः पूर्ववत्सर्वोर्द्ध्वराशिं यावत् च राप्य तत्र विंशत्यु=
त्तरशतेन १२० भागो ग्रोत्या॥ यल्लभ्यते तत्कालरूपं भवति॥ शेषं षष्ट्यासंगुण्य पूर्वेणेव भ

क्ते विकलारूपफलं भवति॥ तत्फलं कोष्ठांतरसत्कं धनर्णं ज्ञात्वा भुक्तकोष्टके संस्करणीयं॥
ततो भुक्तकोष्टकफलं अर्द्धीकृत्य भुजावसानं मंदग्रहे संस्करणीयं॥ कृते मंदो ग्रहो भवति॥ अ
थ मंदग्रहसत्कां मंदगतिकर्मभूमौ संस्थाप्य शीघ्रोच्चं ग्रहसत्क शीघ्रगतिमध्यात् विशो
धयेत्॥ शेष कलादिकं केंद्रकला विकलावत्संस्थाप्य कोष्टकांतरेण पूर्ववत् गुणयेत्॥ त=
तः शीघ्रकेंद्रवत् ऊर्द्ध्वं च राप्य यत् यल्लभ्यते तत्कालादिकं गतिफलं भवति॥ तत्फलं अर्द्धीकृत्य
कोष्टांतरसत्कं धनर्णं ज्ञात्वा मंदगते संस्कार्यं॥ एवं कृते मंदा ग्रहः॥ स भुक्तिको मंदशीघ्रो
भवति॥ मंदशीघ्रानयनमिति॥ अथ द्विकर्मकृतमंदफलमुत्पातयेत्॥ कथं स्वोच्चोनखे
चरः॥ केंद्रं षडूर्द्ध्वो धनर्णकमित्यादिना पूर्वं मंदग्रहविधिना सर्वे कर्तव्यं॥ परं मंदफलं
कोष्टसत्कं॥ सकलफलं पूर्वोनित॥ अविनिष्ट मध्यमग्रहस्य सभुक्तिकस्य संस्करणीयं॥

स्वरोदय बुधशुक्रनयजेतुमध्यमार्कस्य सभुक्तिकस्य संस्कार्यं॥ एवं कृते त्रिकर्मसंस्कृतः शीघ्रमंद
संज्ञा ग्रहो भवति॥ इति शीघ्रमंदग्रहानयनं॥ अथ त्रिकर्मकृतः॥ मंदशीघ्रग्रहपार्श्वो
१४५ त्स्य ऽशीघ्रफलं उत्साध्यते॥ कथंभूतस्तादिग्रहं मंदशीघ्रमध्याद्विशोधयेत्॥ इत्यादि
नामंदशीघ्रफलविधिना सर्वं कर्त्तव्यं॥ परं शीघ्रफलकोऽकसत्कं सकलफलं त्रिकर्मकृ
त॥ शीघ्रमंदग्रहस्य भुक्तिकस्य संस्करणीयं॥ एवं कृते कर्मचतुष्टयेषु साद्धितः परिस्फु
टो ग्रहो भवति॥ इति परिस्फुटग्रहानयनं॥ अथ अंशात्मकर्म आह॥ परिस्फुटग्रहपा
र्श्वात् पूर्वोक्तानि मंदः॥१ मंदशीघ्र २ मंदस्फुट २ शीघ्र ४ रूपाणि चत्वारि कर्माणि पु- राम
नः पुनस्तावत्कर्त्तव्यानि यावत् पूर्वानीतग्रहसदृशो ग्रहो भवति॥ एवं कृते असकृत्क १४५
र्मणि साधितपरिस्फुटो ग्रहो भवति॥ इति विशेषजातकादेशकर्मसाधितं ग्रहानयनं
कार्यमिति॥ अथ चरकर्मविवरणमाह॥ सायनं सूर्यकर्मभूमौ स्थाप्य तस्य सूर्यस्यामरवा

द्विउत्तरगोलं तुलादिदक्षिणगोलं ज्ञात्वा गतैष्यकर्मणा पदं कर्त्तव्यं॥ तस्मिन्पदे ये केचित्
राशयो भवंति॥ तत्संख्यानि स्वदेशजानि पलरूपाणि चरार्द्धानि गृहीत्वा तत्॥ शेषेण भोग्य
चरार्द्धेन सूर्यभोग्यपलादिकं कृत्वा गुणनीयं॥ तस्य एकराशि कलाभिरष्टादशशतसंख्या
भिर्भागो ग्राह्यः॥ यल्लभ्यते तत्पूर्वलब्धं च रार्द्धयुक्तं पलरूपं चरं भवति॥ तच्च स्वग्रह
गत्या पलादिक्या गुणयित्वा खखांगाग्निभिः षट्त्रिंशत् शते ३६००० भाज्यं॥ यल्लभ्यते त
त्कालादिकं ग्रहफलं भवति॥ तत्फलं यदि सूर्यस्य दक्षिणगोलो भवति तदा उदयकालि
कस्य ऋणं अस्तकालिकस्य धनं॥ मध्याह्नकालिकस्य मध्यरात्रिकालिकग्रहेषु च
रकर्म न कर्तव्यमिति॥ एवं कृते चरकर्मसंस्कृतो ग्रहो भवति॥ अथ सूर्यत्फलकर्मविव
रणमाह॥ सूर्यकलादिकं कृत्वा॥ कर्मभूमौ संस्थाप्य स्वस्वग्रहगत्या गुणयेत्॥ मंडल

स्वरोदय लिप्ताभिः षट्शताधिकैकविंशतिसहस्रै २१६०० र्भजेत्॥ यल्लभ्यते तत्कालादिकं
फलं भवति॥ तत्फलं सूर्यवत्॥ सर्वग्रहाणां धनर्णं कार्यं॥ कथं यदि सूर्यस्य धनं भवति
१५६ तदा सर्वग्रहाणां तत्फलं योजयेत्॥ यदा ऋणं भवति तदा शोधयेत्॥ एवं कृते सूर्यफ
लसंस्कृता ग्रहा भवंति॥ इति सूर्यफलसाधनं॥ अथ जातकर्मविवरणमाह॥ सूर्यस्य
कर्मभूमौ संस्थाप्य तस्य युग्मपदं ज्ञात्वा द्विस्थं २ कुर्यात्॥ यदि मंडलाधिक्यं भवते तदा
मंडलं संशोध्य शेषं धरणीयं॥ तस्य गतैष्यकर्मणा परं कर्त्तव्यं॥ तस्मादंशादिकं कार्यं
अंशसंख्या जीवा सक्तो भुजकोटिको ग्राह्यः॥ तथा भोग्यकोटिकश्च तयोरंतरं कार्यं॥ ते राम
नांतरेण सूर्यसक्तकलादिकं द्विस्तं गुणनीयं॥ षष्ट्या षष्ट्या उर्द्धराशिं यावत् चटाप्यते॥ १५६
ततोर्द्ध्वराशिस्थाने षष्ट्या भावे तति कलादिकं फलं भवति॥ तत्फलं भुक्तकोटिके योजितो
त्पत्तिकोटिको दाज्यैकारूपो भवति॥ भुजज्या इत्यर्थः॥ तस्य अग्न्यब्धिभिस्त्रिचत्वारिंश

MEMORIAL

द्वि ४३ भाक्ते विकलादिकं फलं भवति॥ तेन फलेन स्वस्वभुक्तिगुणनियाषष्ट्रीशतशतैः भ
२१६०० भागोग्राह्यः॥ यल्लभ्यते तत्फलादि ग्रहं भवति॥ तत्फलं युग्मपदगते रवौ ग्रहस्य धनं
कर्तव्यं॥ ओजपदगते ऋणं॥ एवं कृते जातकर्मसंस्कृतो ग्रहो भवति॥ एतत् चरकर्मादिकं कर्म
त्रयं मध्यमग्रहाणां परिस्फुटं ग्रहाणां वा करणीयं॥ इति जातकर्मसाधनं॥ इति वार तिथि न
क्षत्र॥ योग करण रूप पंचांगानयनमाह॥ अहर्गणसमस्तके सप्तियत्सो षं भवति॥ तेन
तत्संख्यः सूर्यादिको वारो ज्ञातव्यः॥ तस्य वारस्याग्नि द्वितीयदिनस्य यो वारो भवति॥
तस्य वारस्य सक्तादयिकाद्यास्तिथ्याद्या गतगम्यास्तिथि नक्षत्र योग करणानि गतगं
म्यानि तथा शक्तानि घटिकापलानि गतगम्यानि भवंति॥ यतोऽहर्गणो ग्रवारसूर्यो
दयसमये सक्तो भवति॥ तेन साधितचंद्रार्कात् तिथिनक्षत्रयोगकरणानि उत्पद्यंते

स्वरोदय लिप्ताभिः षट्शताधिकैकविंशतिसहस्रैः २१६०० भजेत्॥ यल्लभ्यते तत्कालादिकं
फलं भवति॥ तत्फलं सूर्यवत्॥ सर्वग्रहाणां धनर्णं कार्यं॥ कथं यदि सूर्यस्य धनं भवति
१४६ तदा सर्वग्रहाणां तत्फलं योजयेत्॥ यदा ऋणं भवति तदा शोधयेत्॥ एवं कृते सूर्यफ
लसंस्कृता ग्रहा भवंति॥ इति सूर्यफलसाधनं॥ अथ जातकर्मविवरणमाह॥ सूर्यस
कर्मभूमौ संस्थाप्य तस्य युग्मपदं ज्ञात्वा द्विस्थं २ कुर्यात्॥ यदि मंडलाधिक्यं भवते तदा
मंडलं संशोध्य शेषं धरणीयं॥ तस्य गते ष्य कर्मणा पदं कर्त्तव्यं॥ तस्माद् अंशादिकं कार्यं
अंशसंख्या जीवो सक्तो भुजकोटिको ग्राह्यः॥ तथा भोग्यकोटिकश्च तयोरंतरं कार्यं॥ ते राम
नांतरेण सूर्यसक्तं कलादिकं द्विस्तं गुणनीयं॥ षष्ट्या षष्ट्या ऊर्द्ध्वराशिं यावत् चटाप्यते॥ १४६
ततोर्द्ध्व राशिस्थाने षष्ट्याभावे तत्तिकलादिकं फलं भवति॥ तत्फलं भुक्तकोटिके योजितो
त्पत्तिकोटिको दार्ज्यकारूपो भवति॥ भुजज्या इत्यर्थः॥ तस्य अग्न्यब्धिभिस्त्रिचत्वारिंश

MEMORIAL

द्भि ४३ भाकृते विकलादिकं फलं भवति॥ तेन फलेन स्वस्वभुक्तिगुणनिया षड्विंशत्शतैः ग
२६०० भागो ग्राह्यः॥ यल्लभ्यते तत्कलादि ग्रहं भवति॥ तत्फलं युग्मपदगते रवौ ग्रहस्य धनं
कर्तव्यं॥ ओजपदगते ऋणं॥ एवं कृते जातकर्मसंस्कृतो ग्रहो भवति॥ एतत् चरकर्मादिकं कर्म
त्रयं मध्यमग्रहाणां परिस्फुटं ग्रहाणां वा करणीयं॥ इति जातकर्मसाधनं॥ इति वार तिथि न
क्षत्र॥ योग करण रूप पंचांगानयनमाह॥ अहर्गणसमक्षके सति यत्सो षं भवति॥ तेन
तत्संख्यः सूर्यादिको वारो ज्ञातव्यः॥ तस्य वारस्याग्नि द्वितीयदिनस्य यो वारो भवति॥
तस्य वारस्य सक्तादयिका घास्ति थ्या घा गतगम्यास्तिथिनक्षत्रयोगकरणानि गतगं
म्यानि तथा शक्तानि घटिकापलानि गतगम्यानि भवंति॥ यतोऽहर्गणो ग्र वार सूर्यो
दयसमये सक्तो भवति॥ तेन साधित चंद्रार्कात् तिथिनक्षत्रयोगकरणानि उत्पद्यंते

स्वरोदय तत्र उदयकालिकानि एतानि ज्ञातव्यानि॥ इति वारानयनं विवरणं च॥ अथ तिथ्यान
यनमाह॥ परिस्फुटचंद्रात्परिस्फुटोरविशोध्यते॥ यदा न शुध्यति॥ तदा द्वादश रा=
१५७ स्यात्मकं मंडलं दत्वा शोध्यः॥ शेषं चंद्रकलारूपः क्रियते॥ विकलाश्च तदधस्था विभि
न्ना धरणीया कलारूपस्य खाक्ष्यद्रिणा ७२० विंशत्युसप्तःशतैर्भागो ग्राह्यः॥ यल्लभ्य
ते तत् शुक्लप्रतिपदादिगततिथयो भवंति॥ यत् शेषं भवति तत्स विकलं द्विस्थाने एकांते
धरणीयं॥ पश्चात्क्रमभूमिस्थं शेषं यथास्थितं षष्ट्या ६० संगुण्य॥ अधस्तन विकला
राशि तत्र योजयेत्॥ ततः पुनः षष्ट्या गुणयित्वा ६० गत्यंतरेण भजेत्॥ गत्यंतरं किमु राम
च्यते॥ परिस्फुटं सूर्यगतिः॥ परिस्फुटं चंद्रः॥ गतिमध्याद्विशोध्यते शेषं गत्यं भवति॥ १५७
तेन गत्यंतरेण सवर्णीकृतविकलारूपेण भागे हृते यल्लभ्यते तत् घटिका भवंति॥ शेषं
षष्ट्या ६० संगुण्य गत्यंतरेण भजेत्॥ यल्लभ्यते तानि पानीयपलानि॥ एवं कृते वर्तमा

न तिथिः सक्तानि घटिकापलानि भवंति॥ अथ एकांतरस्थापितं कलारूपं शेषं॥ पूर्वभा
गाहार विंशत्यत्तर सप्तशत ७२० मध्याधि शोध्य शेषं धरणीयं॥ तन्मध्यादेकां कलां गृ
हीत्वा॥ एकांते स्थापितानि कला संशोधयेत्॥ पशेषा विकलास्तदूर्द्ध राशिं षष्ट्या ६०
संगुण्य याजयेत्॥ पुनः षष्ट्या ६० गुणयित्वा गत्यंतरेण भजेत्॥ यल्लभ्यते तत् च
पाटिका भवंति॥ शेषं पुनः षष्ट्यां ६० संगुण्य गत्यंतरेण भजेत्॥ यल्लभ्यते तानि पा
नियपलानि भवंति॥ एवं कृते वर्तमान तिथि सक्तानि गम्य घटिका पलानि भवंति
इति गतगम्यतिथ्यानयनं॥ अथ नक्षत्रानयनमाह॥ परिस्फुटं चंद्रमर्कभूमौ सं
स्थाप्य कलारूपं कुर्यात्॥ विकलास्तदधस्था विभिन्ना धरणीयाः॥ तस्य कलारूपस्य चं
द्रस्य अष्टशतै ८०० भागो ग्राह्यः॥ यल्लभ्यते तानि गत नक्षत्राणि भवंति॥ शेषं विक

स्वरोदय कं द्वितीयस्थाने एकांते धरणीयं पश्चात् कर्मभूमौ स्थापित शेषं षष्ट्या ६० संगुण्य
अधस्तन विकला योजयेत्॥ पुनः षष्ट्या ६० संगुण्य सवर्णित या परिस्फुटचंद्रगत्या
१४८ भागो ग्राह्यः॥ एवं लभ्यंते तत् घटिकापलानि भवंति॥ अथ एकांत स्थापितं॥ क
ला रूपं शेषं पूर्वभागाहाराष्टशतः ८०० मध्ये विशोध्य॥ भागाहर शेषं कर्मभूमौ
धरणीयं॥ तस्य मध्यात् १ कां कलं गृहीत्वा एकांत स्थापित विकला शोधयेत्॥ शेषा
विकला उद्धराशिं षष्ट्या ६० गुणयित्वा योजयेत॥ पुनः षष्ट्या ६० संगुण्य चंद्रगत्या
भजेत्॥ यल्लभ्यंते ता घटिका भवंति॥ पुनः शेषं षष्ट्या ६० संगुण्य चंद्रगत्या भजेत् राम
यल्लभ्यंते तानि पलानि॥ एवं कृते वर्तमान नक्षत्र सक्तानि भोग्य घटिका भवंति॥ इति १४८
गतगम्य नक्षत्रानयनं॥ अथ योगानयनमाह॥ परिस्फुटचंद्रार्कौ राश्यादिकौ योगं
कृत्वा कर्मभूमौ स्थापयेत्॥ यदा योगो द्वादशराश्याधिके भवति॥ तदा द्वादशराश्या

त्मकं मंडलं तन्मध्यात् विशोध्य शेषं धरणीयं॥ तत् शेषं कला रूपं॥ विकलास्तद्धावि
भिन्ना धरणीया॥ पश्चात् शेषस्य कलारूपस्य अष्टशतै ८०० र्भागो ग्राह्यः॥ यल्लभ्य
ंते ते गत योगा भवंति॥ शेषं सविकलं द्वितीयस्थाने एकांते धरणीयं॥ कर्मभूमि स्था
पित शेषं षष्ट्या ६० संगुण्य विकला योजयेत्॥ पुनः षष्ट्या ६० संगुण्य परिस्फुटचं
द्रार्क गति योगेन सवर्णिकृतेन भागो ग्राह्यः॥ यल्लभ्यंते ता घटिका भवंति॥ पुनः ष
ष्ट्या ६० संगुण्य गति योगेन भागो ग्राह्यः॥ यल्लभ्यंते तानि पलानि भवंति॥ एवं कृते
वर्तमान योगो सक्तानि गत घटिकापलानि भवंति॥ अथैकांत स्थापित शेषं पूर्वभा
गाहाराष्टशत ८०० मध्याद्विशोध्य कर्मभूमौ धरणीयं॥ तन्मध्यात् एकां कलां गृ
हीत्वा॥ एकांत स्थापिता विकला शोधयेत्॥ शेषा विकला ऊर्द्धराशिं षष्ट्या ६० संगुण्य

स्वरोदय योजयेत्॥पुनःषष्ट्या६०संगुण्यगतियोगेनभजेत्॥यल्लभ्यतेताघटिकाभवंति॥शेषं
पुनःषष्ट्यासंगुण्यगतियोगेनभजेत्॥यल्लभ्यतेतानिपलानिभवंति॥एवंकृतेवर्त्त
१४९ मानयोगसक्तानिभोग्यघटिकापलानिभवंति॥इतियोगानयनं॥अथकरणान
यनमाह॥परिस्फुटंसूर्यंपरिस्फुटंचंद्रमध्याधिशोध्यशेषंकलारूपंकरणीयं
तस्यकलारूपस्यचंद्रस्यखंगरामैःषष्टियुतशतत्रयेण३६०भोगोग्राह्यः॥य
ल्लभ्यतेतेनएकोनितेनबवादिकानिचलकरणानिभुक्तानिभवंति॥शेषेनभोग्य
करणस्यगतगम्यघटिकादिकंसर्वंतिथिवत्साधयेत्॥इतिचलकरणानयनं॥॥ राम
स्थिरकरणानिपुनरेवमवगंतव्यानि॥तथाकृष्णाचतुर्दशीपश्चिमार्द्धेशकुनिकर १४९
णं॥अमावास्यायांचतुष्पदंनागंच॥शुक्लप्रतिपत्पूर्वार्द्धेकिंस्तुघ्नकरणं॥इतिपंचाग
तिथ्यानयनं॥अथक्रांत्यानयनविवरणमाह॥आदौपरिस्फुटंग्रहंसायनंकर्मभूमौ=

स्थापयेत्॥तस्यमेषादिउत्तरगोलंतुलादिउतरगोलोज्ञातव्या॥तत्रउत्तरगोलो=
स्थितोग्रहउत्तरचारिभवति॥साउत्तरक्रांतिज्ञातव्या॥तत्रउअपदेप्रथमेस्थितेग्र
हेउत्तरक्रमक्रांतिर्भवति॥समपदेद्वितीयस्थितेग्रहेउत्तराक्रमक्रांतिर्भवति॥तथाउं
अपदेतृतीयेदक्षिणाक्रमक्रांतिर्भवति॥समपदेदक्षिणाचतुर्थेदक्षिणाउत्क्रमक्रां
तिर्भवति॥तस्यग्रहस्ययानिकानिचित्मेषादित्रिराशिकानिपदानिपतंति॥तानि
पातयित्वाशेषपदमंशादिकंकृत्वातत्संख्योभुक्तोभोग्याश्चक्रांतिकोष्टकोप्राप्त्या
तदंतरेणकेंद्रकलादिस्थानगुणयित्वापूर्ववत्विभज्यऊर्ध्वराशिंयावच्चयापयेत्॥
तस्यषष्ट्यातंकलादिकंफलंभुक्तकोष्टकेयोज्यं॥तत्फलंयदोत्तरादक्षिणावाक्रमक्रां
तिर्भवति॥तदातदेवफलंयथायातं॥लिप्तिकादिकंक्रमक्रांतिर्ज्ञातव्या॥यदापुनरु

स्वरोदय क्रमक्रान्तिर्भवति॥तदा तत्फलं परमक्रान्तेश्चत्वारिंशदधिका चतुर्दशशतमध्या
त् १४४० विशोध्य यत्शेषं भवति॥सा उत्तराद्दक्षिणा वा उ क्रमक्रान्तिर्ज्ञातव्या
१५० इति वृत्तिरियं॥अथातः संप्रवक्ष्यामि यदुक्तं ब्रह्मयामले॥नराणामायुषो ज्ञा
नं स्वदशान्तर्दशाफलं॥१॥अत्र स्वरोदये शास्त्रे ग्रहा नवति प्रतिष्ठिताः॥ते च
लग्नेन संयुक्ता दशादशायुदशाधिपा॥२॥यन्निर्द्देपश्चिमे राहुकेतुः सूर्यादि
केदले॥सर्वदा भोगिनो ज्ञेयो आयुर्वेला भराशिषु॥३॥द्वादशोब्दे नेवां शा
युर्देशैकादशभिः पुनः॥दशायां परमं पुंसामाविंशोत्तरं शतं॥४॥तस्माद्दश राम
दशा प्रोक्ता ब्रह्मणा ब्रह्मयामले॥५लालज्ञायशायशास्त्रेषु नैव मा प्रकटीकृता॥५ १५०
॥शीर्षमुखं दोर्हृदयादराणि कट्यंगकं बस्तिगुदोरुजानु॥जंघादि मेषादि भसंज्ञकं च
कलाद्वयं ते पुरुषं वदंति॥६॥तनुस्वं सहजो बंधुः सुतशत्रुकलत्रभं॥निधनं घ

र्मकर्मायव्ययाभावादि लग्नतः॥७॥क्रमेण क्रूरसौम्याख्ये नरनारिविषमासमाः॥चर
स्थिरद्विस्वभावा मेषाद्याः प्रभवंति हि॥८॥आद्यं तनुदये लग्नं द्वितीयं धनं कुटुंबलं॥
त्रिः सहजं च दुश्चिक्यं तुर्यं बंधुरसातलं॥९॥हिबुकांबुसुखं वेश्म पंचमं धीसुतं मतं
॥षष्ठं शत्रुविनाशं च सप्त जायास्तकालजं॥१०॥घूनं धूनं तु जामित्रं मष्टमं छिद्रभं॥
नवमं धर्मभाग्यं च दशकर्माभ्रमध्यमं॥११॥एकादशोत्तमायश्च द्वादशं त्यं रिकं
व्ययं॥सर्वराशिसमुहस्तु चक्रं भगणमंडलं॥१२॥लग्नतुर्यास्तशून्यानां केंद्रच
तुष्टयकंटकं॥ते चतुष्टान्यभावेषु पणफणोक्लिमाक्रमात्॥१३॥कामकन्यातुला
कुंभचापाधर्द्ध नराशयः॥चापान्त्यार्धोक्षसिंहाजमृगाद्यार्धे चतुष्पदाः॥१४॥की
टा अलिमृगान्त्यार्द्ध कर्कमीना जलाद्वयाः॥क्रमेण बलिनस्त्वपूर्वाद्याशा च

स्वरोदय तुर्य्ये॥१५॥ निशावीर्या मृगो धन्वी वृषकामाजकर्कयः॥ पृष्ठोदया विकामास्ते मीन
स्यादुभयोदयः॥१६॥ शेषाः शीर्षोदया ज्ञेया दिवावीर्यास्तु शोभनाः॥ दुष्टाः पृष्ठोद
१५१ यास्सर्वे मध्यमास्तूभयोदयः॥१७॥ मेषो वृषा युगं कर्कः सपंचनवपूर्वतः॥ संसख्येना
साच तुल्यस्य क्रमेणेशास्तु राशयः॥१८॥ बुधजीवाधिपैर्युक्तो दृष्टो राशिर्बली भवे
त्॥ चेत्युक्तो न युतः शेषैर्मिश्रैर्मिश्रं बलं मतं॥१९॥ उपचयानि चत्वारि दशमायत्रि
षष्ठकं॥ चतुरस्रं चतुष्टयं त्रिकोणं नवपंचमं॥२०॥ वर्गोत्तमा नवांशास्युः पूर्वे मध्या
न्त्यजाः क्रमात्॥ चरस्थिरद्विस्वभावेषु राशीनां च त्रिके त्रिके॥२१॥ इति राशिभेदः॥ राम
नात्युच्चश्चतुरस्रांगतनुकशश्च पैत्तिकः॥ शूरास्थिसाराः पिंगाक्षो रक्तश्यामश्च भा १५१
स्करः॥१॥ स्वर्क्षप्राज्ञोऽतिगौरांगश्चपलः कफवातिकः॥ रक्तसारो घृणी वृत्तस्तनु
र्वांशुश्च चंद्रमाः॥२॥ तरुणो हिंसको रक्तो रक्तगौरश्च पैत्तिकः॥ रक्ताक्षश्च पले

उग्रो मज्जासारश्च भूसुतः॥३॥ मध्यरूपशिरालुश्च त्रिप्रकृतिप्रियंवदः॥ दूर्वाश्या
मो महाप्राज्ञस्त्वक्सारश्चंद्रमासुतः॥४॥ श्लेष्मलो मतिमान् गौरः ईषत्पिंगशिरोरुहः
मधुवर्णाक्षिको ह्रस्वो मेदसारो बृहस्पतिः॥५॥ कफवातात्मकः श्यामः कुटिलासु
शितमूर्द्धजः॥ मधूरवत्स्वरवीकांतिः शुक्रसारश्च भार्गवः॥६॥ स्थूलकेशनखच्छे
द्यो दंतुरः पिशुनोऽलसः॥ स्नायुसारः कृशो दीर्घः पिंगाक्षो वातिकः शनिः॥७॥ इति ग्र
हस्वरूपाणि॥ सूर्यारार्कितमःकेतुक्रूराः क्षीणः शशी तथा॥ एभिर्युक्तो बुधः पापो गुरुःशु
क्रौ सदा शुभौ॥१॥ प्राच्यादिशोऽर्कशुक्राराराह्वार्कींदुमंत्रिणः॥ न्जायमार्कि केत्वाराः क्रूरा
वार्किशौ परौ स्त्रियौ॥२॥ शनिराहू गुरुर्क्ष्माज सूर्यशुक्रबुधेंदवः॥ शीघ्रास्युः क्रमेणैतेव
क्रमो विपर्ययात्॥३॥ बिंबग्रहाश्च चंद्रार्कौ छायांगा राहुकेतवः॥ तथा ताराग्रहाः पंच

स्वरोदय विज्ञेयाशुसुतादयः॥४॥वर्णास्ताम्रः शितो रक्तो हरितश्च विचित्रकः॥कृष्णश्च श्या
मलो धूम्रः क्रमात्स्याद्भास्करादिषु॥५॥भौमशुक्रज्ञचंद्रार्कबुधशुक्रारमंत्रिणः॥
१५२ शौरिः शौरिस्तथा जीवो मेषादीनामधीश्वराः॥६॥अर्केह्वो विषमे होरे समे चंद्रोष्टो
जसौः॥आद्यपंचनवेशानां द्रेष्काणाः कीर्तिताः स्त्रियः॥७॥ओजे निजराश्याद्याः स
मे च सप्तमादिकाः॥सप्तांशानां भवेत्येवं ग्रहनाथा यथाक्रमं॥८॥क्रिमृगतुलकर्का
द्या नवांशपतयो ग्रहा॥निजराश्यादितो ज्ञेया द्वादशांशकनायका॥९॥पंचापंचा
ष्टसप्तेषु कुजमंदार्यज्ञसिताः॥अंशानामधिपा ओजे समे लज्ञे विपर्यये॥१०॥लग्ना राम
धूने भवेदस्तो अंशाश्च स्वामिवीक्षिते॥उदयां समलग्ने स्याद्दशाधीशविलोकिते॥११ १५२
मेषो वृषो मृग कन्या कर्क मीन तुला क्रमात्॥आदित्यादिग्रहे ष्वुच्च नीचे यो यस्य सप्तमः
॥१२॥दिशो १० रामा ३ ष्ट विंशत्या २८ तिथि १५ बाण ५ भैः २७ विंशति २० परमो

MEMORIAL

च्चाः स्मृता अंशाः सूर्यादीनां यथाक्रमं॥१३॥चंद्रानार्यो रवेरिष्टाः समः सौम्योऽपरो
रिपुः॥मित्रे चंद्रस्य सूर्येन्द्यौ समाः शेषग्रहा मताः॥१४॥आर्किशुक्रौ समौ ज्ञारिः
शेषा मित्राणि भूभुवः॥मित्रे सूर्यसितौ चांद्रेश्चंद्रौ अरिस्त्वपरे समाः॥१५॥सौम्यशु
क्रौ गुरोः शत्रु शनिर्मध्ये परेन्यथा॥शूलस्यार्किबुधौ मित्रे समः सूर्यो वरी परो॥१६॥बुध
शुक्रौ शनेर्मित्रे समआर्योरयोपरे॥राहुकेत्वोः पुनः मैत्राशत्रुचान्यान्ग्रहान्प्रति॥
१७॥योग्रहो यस्य खेटस्य द्विन्निबंधायखांत्यगा॥तस्य तत्काल मित्रो सो शत्रुत्वं शेषराशि
षु॥१८॥इति मित्रामित्रौ॥शन्यारज्ञार्यशुक्रेंदु दिन शराहुकेतवः॥यथोत्तरक्रमेणेव
नैसर्गिक बला ग्रहाः॥१९॥इति नैसर्गिक बलं॥जीव ज्ञौ बलिनो लग्ने शुक्रचंद्रो सु
खे तथा॥शनिः पत्यां कुजार्कौ खे ग्रहाणां दिग्बलं मतं॥२०॥इति दिग्बलं॥शुक्रार्के

स्वरोदय जीवबलिनोदिनेस्युःकेलिदुराङ्काकिकुजानिशायां॥बुधोद्विधाक्रूरशुभाक्रमेण
शुभावहास्तेतरवक्षयुक्ता॥२१॥इतिकालबलं॥चेष्टानांबलिनोज्ञेयोचंद्रार्कावुत्त
१५२ रायणे॥शेषावक्रोदिताःसौठायुद्धेयेजयिनोग्रहाः॥२२॥इतिचेष्टबलं॥स्वक्षेत्रे
मित्रगेहस्थाउदितास्वोच्चसंस्थिताः॥क्रूरावक्राशुभाशीघ्राज्ञेयास्थानबलाग्रहाः॥
२३॥नीचस्थाशत्रुगेहस्थावृद्धाबालग्रहापुनः॥क्रूरावक्राशुभाशीघ्राज्ञेयाब
लविवर्जिताः॥२४॥इतिग्रहबलाबलं॥कर्मा१० स्नि३ पंच५ नंदोच९ गजा८ब्धी
४ सप्तमंतथा॥पादवृध्यानिरीक्ष्यंतेग्रहालग्नानिसर्वदा॥२५॥खतृतीयेत्रिकोणः राम
स्थे-चतुरस्रेयथाक्रमं॥सर्वेदृष्ट्याप्रपश्यंतिग्रहामंदार्यभूसुता॥२७॥इतिग्रहादृष्टिः १५२
इतिग्रहप्रभेदाध्यायः॥लग्नादित्यशशांकानांबलाधिकवसात्कुरु॥अंशकायुस्र
पिंडायुर्निसर्गायुःक्रमेणच॥२८॥राश्यादिखेचराःसर्वेकर्त्तव्याजन्मकालिकाः॥क

लाकलाखखाब्धिभ्यां२००भक्तोप्तन्यकेशेषिते॥२९॥खखसरव्याहतंभक्तंशेषे
शेषंपुनःपुः॥मासाहनाडिशेषायुर्लग्नेप्यवंस्वभोगतः॥३०॥भुक्तराशिसमाब्दास्वा
मिजीविज्ञविक्षते॥लग्नशेषंकलाकृत्वाखखधृत्या१८००प्तसंयुतं॥३१॥वक्रोम
मस्वगेहस्थेस्वद्रेष्काणनशशांके॥द्विघ्नंवक्रोच्चगोत्रिघ्नंद्विघ्नेत्रिनवनाडितं॥३२॥
स्वनीचास्तमनेसार्धत्रिभागंशत्रुक्षेत्रगे॥हरंतिखचराआयुःशनिशुक्रोतुनास्तगो
॥३३॥सर्वार्द्धत्रिचतुर्थांशंचतुषष्ठिनिजायुषः॥हीनंपापेस्तादर्धंचसौम्येव्यक्ताद्वि
पर्ययेत्॥३४॥एकराशिगताःखेटाद्व्यादयोयत्रसंस्थिताः॥तत्रवीक्षबलाधिः
क्यंतेनहीनोधिकंफलं॥३५॥बलसाम्येसमुत्पनेग्रात्योभुक्ताधिकोग्रहः॥भु
क्तसाम्येसमायातेयोग्रहःप्रथमोदितः॥३६॥अंशायुः॥नदास्तिथिस्वरायुर्न्ने

स्वरोदय पंचेशादशादिकयुता॥ गुणा सूर्यादिखेटानां पिंडायुर्वत्सरास्तथा॥३७॥ स्वोच्चोनः
खेचरास्त्वाप्यः षट्खशयुनाधिकक्रमात्॥ चक्रशुद्धो यथावस्था गुणयेत्स्वगुणे
१५४ न्नतं॥ षष्ठिषष्ठिनभोवह्निसूर्यभुक्तौ फलं भवेत्॥ वर्षमासदिवानाडिपलानं तेतद
धः क्रमात्॥३९॥ नवांशभुक्तमानेन लग्नं वर्षाणि यच्छति॥ शेषं कलादि भानुघ्न
द्विशता२०० प्तं फलं भवेत्॥४०॥ यद्वा क्रूरग्रहो लग्ने तदा लग्नं कलादिकं॥ पृथ
क्पृथक् हतं कुर्यात् ग्रहायुसंख्यया ततः॥४१॥ चक्रलिप्ताहराप्तं यत् शोध्यं
स्वस्वखेचरान्॥ यदि सौम्येक्षिते क्रूरस्तदा लब्धार्द्धकं त्यजेत्॥४२॥ कुजव= राम
र्ज्यो ग्रहः क्रूरो रिपुराशिगतो यदि॥ तदा स्वायुस्त्रिभागं च हरते खचरो ध्रुवं॥४३॥ १५४
अंशायुरिति कर्तव्यं ग्रहास्तु चक्रपातनं॥ पिंडायुरेवमाख्यातं निसर्गायुर्वदाम्य
तः॥४४॥ इति पिंडायुः॥ क्रमेकथ्यंगनांगेदुखाब्धिखेषु गुणा क्रमात्॥ रव्यादि

नां निसर्गायुः कर्मे पिंडायुर्युक्तिवत्॥४५॥ इति निसर्गायुः॥ मीनोदये स्वकी= =
यांशे पंचविंशतिलिप्तिकैः॥ वृषस्थे ज्ञे चतुर्गस्थे शेषे रायुःपरं भवेत्॥४६॥ कर्कः
लग्ने गुरुचंद्रौ केंद्रस्थौ बुधभार्गवौ॥ शेषैस्त्रिभवषष्ठस्थैः रमितायुर्भवेन्नरः॥=
॥४७॥ आयुष्यं येन यद्दत्तं शुद्धेक्षेपविशोपकैः॥ सादशा तस्य विज्ञेया तस्यांतर्
ग्रहजं फलं॥४८॥ लग्नादित्यशशांकानां चलाधिकवशादिमाः॥ केंद्रपणफरा
पोक्लिमस्थानां तु बलाधिकात्॥४९॥ बलसाम्ये समुत्पन्ने ग्राह्या भुक्ताधिको ग्रहः
भुक्तसाम्ये समायाते यो ग्रहः प्रथमोदितः॥५०॥ एकर्क्षे द्वे त्रिभागे च त्रिकोणे चतुर
स्रगे॥ पादं द्यूनेन सप्तांशं ददात्यंतर्दशाग्रहः॥५१॥ सर्वे भागमयं छेदं कृत्वा ततुग्रा
दिमादशा॥ सर्वेसख्यं विभागाप्तं भागस्तद्ग्रहजो भवेत्॥५२॥ तद्वीभागांनुसंख्या=

स्वरोदय त्यासविभागाग्रहं प्रति॥ लब्धो लब्धोभवेत्तु भागो ग्रहेब्धं तद्दशाग्रहाः॥५३॥ दशां
तर्दशायोः सम्यक्प्रवेशसमयस्य ते॥ साधनं संप्रवक्ष्यामि मानेन साधनेन तु॥५४॥
१५५ दशांतर्दशयोर्मानं वर्षाद्यं वासरीकृतं॥ योजयेत्तद्युगणे शेषं नाड्याद्यं नष्टकं कु
रु॥५५॥ संस्थाप्य द्विगुणं तत्र पृथक् धृत्वा भवाहृतं॥ न्टपेशोनं ११९६ द्विगोगाप्तं=
६९२ लभ्यंते अवमवासराः॥५६॥ ते चोर्द्धसंयुताः पृथक् भक्ताः षट्खखरूपकैः १००६
॥ते भवंत्यधिमासास्तान त्रिंशत् घ्नाद्युर्द्धतस्मजेत्॥५७॥ शून्यांगाग्नि ३६० हृते त=
स्मिन् लभ्यंते वत्सरा ध्रुवं॥ शेषत्रिंशतृहृते मासास्तच्छेषे तिथयो मताः॥५८॥ वेदांगा राम
क ९६४ युताप्तानि शाकल्लो भवेत्॥ स्फुटतस्माद्दहर्गणकार्यस्तस्मा लग्नं च खेचरा १५५
५९॥ तैर्लग्नखेचरैः कार्यं तद्दशांतर्दशाफलं॥ जन्मवच्चिंतयेत्सर्वं दशारंभे शुभा
शुभं॥६०॥ तल्लग्नाचंद्रमा दत्ते तन्वादिभावजं फलं॥ दिने दिने यद्वावस्थापूर्व=

क्षिणानुमानतः॥६१॥ दशाप्रवेशे चंद्रस्य दशांते गोचरं फलं॥ शुभाशुभप्रदातव्यं त
त्संसोजन्मचंद्रवत्॥६२॥ जन्मनि योग्रहो याति स्वनीचात्स्वोच्चसन्मुखः॥ आरोह
णी दशा तस्य प्रत्यये नावरोहिणी॥६३॥ स्वक्षेत्रे मित्रक्षेत्रे वा स्वद्रेष्काणनवांशके
स्थितो चारोहिणी श्रेष्ठा मध्यावरोहसंज्ञका॥६४॥ शत्रुद्रेष्काणराश्यंशे स्वनी
चे मित्रनीचगे॥ आरोहणि भवेन्मध्या अधमास्यावरोहणी॥६५॥ श्रेष्ठा श्रेष्ठफ
ला प्रोक्ता मध्या मध्यफलप्रदा॥ मध्यमा श्रेष्ठतां याति निंद्या भवति मध्यमा॥६६॥
क्रूरश्रेष्ठदशा मध्या मध्या निंद्यफलप्रदा॥ निंद्याति निंद्यतां याति ज्ञात्वा चैव फलं
वदेत्॥६७॥ शोकं हानिं भयं भंगं वियोगं बंधुविग्रहं॥ पदभ्रंशाटनक्लेशाः सूर्य
दशामतं फलं॥६८॥ सुखं भोगं धनं मित्रं दारा मित्राश्चतुष्पदं॥ पदप्राप्ति रुजो भं

स्वरोदय गोदत्ते चंद्रदशा स्फुटं ॥६९॥ शत्रोः पीडा रुजां घातं पुत्रनाशं महद्भयं ॥ स्थानभ्रं
शं महाहानिं दत्ते भौमदशाफलं ॥७०॥ प्रज्ञा ऋद्धिं सुखं सौख्यं नृपाल्लाभमरोगतां ॥ तेजो श्रि
१५६ वृद्धिं यशोवृद्धिं ज्ञदशायाः फलं विदुः ॥७१॥ सचिवादिकमुद्राप्तिर्मित्राल्लाभो महासुखं
सद्धिवृद्धिप्रदातृत्वं पुंसां जीवदशा बुधैः स्मृता ॥७२॥ भोगं लाभं जयं राज्यं मित्रस्त्री
बंधुतः सुखं ॥ धनं धान्यं सुतस्याप्तिः शत्रुनाशकरः स्थितः ॥७३॥ कष्टं क्लेशं च दा
रिद्र्यं भयं भंगं च शत्रुतः ॥ भ्रातृपुत्रविनाशं च दत्ते सौरिदशाफलं ॥७४॥ घातं बं
धादि विघ्नानि कष्टं रोगं धनक्षयं ॥ गृहभंगं रिपुत्रासं दत्ते राहुदशा नृणां ॥७५॥ राम
वातगुल्मातिसारश्च लूतागर्दभपीडनं ॥ उपघातं च मृत्युं च दत्ते केतुदशाफलं ॥ १५६
७६॥ मूलदशानुसारेण मंतमेतद्दशाफलं ॥ परं तत्वानुभावेन ग्रहो यत्र यत्र स्थि
तः ॥७७॥ स्वग्रहादिबलैर्युक्तो दशांतर्दशयोः पतिः ॥ दुष्टोपि शोभनः प्रोक्तः शुभोपि

दुर्बलोऽशुभः ॥७८॥ इति दशांतर्दशाफलं ॥ उच्चफलेन समेतः परां विभूतिं ग्रहः प्र
साधयति ॥ स्वत्रिकोणबलं पुंसां साचिव्यं बलपतित्वं वा ॥७९॥ स्वक्षेत्रबलेन च सहित
प्रमुदितधनधान्यसंपदाक्रांतः ॥ मित्रबलसंयुक्तो जनयति कीर्त्यान्वितं पुरुषं ॥८०
॥ तेजस्विनमतिखिन्नं सुस्थिरविभवं नृपाच्च लब्धधनं ॥ स्वनवांशकः बलयुक्तः
२२३ चतुष्टये तेनैव पक्षिणी ॥ निवर्त्तते भवेद्वामा श्यामा स्वल्पलाभदा ॥ १० ॥ यदा भूमित्रये देवी-
गमेनेनष्टपक्षिणी ॥ निवर्त्तते भवेत्तारा श्यामा निर्भयप्रदा ॥ ११ ॥ तारात्रयाधिका तारा श्यामा
वामा फलप्रदा ॥ वामात्रयाधिका वामा श्यामा मातामिधीयते ॥ १२ ॥ तुर्यो प्रवृत्तिजा तारा वामा राम
सा विनिवृत्तिजा ॥ वामां तारां विजानीयात् संचमी चेन्न जायते ॥ १३ ॥ तारा वामागतीनां च मिलिता २२३
स्याच्चतुष्टयं ॥ गमागमे द्विके यत्र तत्र पूर्णा फलं विदुः ॥ १४ ॥ हीनहीनाधिकं ज्ञेयं गतिसंख्या
नुमानतः ॥ एकद्वित्रिचतुर्गत्या पादह्रासक्रमात्क्षयः ॥ १५ ॥ हीनं हीनाधिकं साम्यं ह्रत्वा यद्यधि

कं गतिं ॥ करोत्यग्रफलं हत्वा गतिसंख्यानरिष्टधा ॥ १६ ॥ भयं हानिरुजो मृत्युं चतुष्के स्यात्तृतीय
के ॥ गतिरेवं फला शांते दीप्तप्रश्ने विपर्यये ॥ १७ ॥ एवं त्रिषु चतुष्केषु गति द्वादशकं मतं ॥ इयं त्योग-
तयो प्रात्यानप्रात्या द्वादशाधिका ॥ १८ ॥ ज्ञात्वा गमागमे तारा वामे सख्यां क्रमेण च ॥ प्रश्नाशु-
भाशुभान् पात्याशेषात्फलं वदेद्बुधः ॥ १९ ॥ साधकं बाधकं निंद्यं चतुष्के त्रितयं गते ॥ एतद्द्वित्रि
क्रमेणैवं ज्ञेयं शाकुनिकैः सदा ॥ २० ॥ प्रथमं भूगतः शकुनं द्विके तदितरे यदि पश्यति तत्त्ववि
त् ॥ शकुनतुल्यमसौ लभते फलं मुक्तकष्टमिहावधिमानतः ॥ २१ ॥ शांते प्रश्ने गमे तारा सारला-
भाय केवला ॥ वामा निवृत्तिजा श्यामा लाभक्षेमं करोति सा ॥ २२ ॥ वामतो याव्रजे द्वासं सात्यप
क्षाद्भयंकरी ॥ परापक्षात्शुभं दत्ते दक्षिणं गा ऋतुतारगा ॥ २३ ॥ प्रागेका दूरतो याति पश्चादन्यास

स्वरोदय मिपगा॥पूर्वंफलांतरंदत्वादत्ते भिष्टंफलंततः॥२४॥पूर्वंदृष्ट्वागतापश्चात्पश्चात्दृष्ट्वातुपूर्वगा
आवांतरफलंपूर्वंदत्वाभिष्टंप्रयच्छति॥२५॥उपविष्टव्रजंतिचयदग्रेस्थानसंस्थितो॥मि
२२४ देशेषुयादृष्ट्वासामासापूर्णगामता॥२६॥आदिमध्यावसानेचयत्र यत्रनदृश्यते॥मि-
श्रितंपोतकीब्रूतेतत्रतत्रफलंक्षयं॥२७॥अग्रतोमस्तकेईननयातिपृष्टेधनुर्धरी॥प्रवीतो
सावधंदत्तेकिंचित्दुष्टानिवर्तते॥२८॥पृष्टतोमस्तकोर्ध्वेनयात्यग्रेश्चेतपक्षिणी॥प्रदत्ते॥ राम
भीतिदज्ञेयामस्तकदासानिवर्त्तने॥२९॥कालमानोजितेप्रश्नेतथायानेप्रवेशने॥कालाव- २२४
धिप्रवक्ष्यामिगतिमानानुमानतः॥३०॥जानुप्रश्नेशगागावर्षेषण्मासेनतथारुगा॥ सत्व
वधिकरीदेशेमासेनोदरमानगा॥३१॥पक्षेदुन्मानगादेवीकंठदेशेनवासरे॥शीर्षाघघा

फलंदत्तेतारावामाशुभाशुभं॥३२॥एकपाद्दिलयायांतिफलदासेकहेलया॥वदंतिसमका-
लेनप्रष्टुंद्वित्रिफलानिते॥३३॥पक्षिणोह्युदयःपत्न्यालग्नपृष्टुंस्वरूपया॥येव्रजंतिफ-
लंह्यायंतत्क्रमेणवदंतिते॥३४॥शुभाशुभेषुप्रश्नेषुयानेवाथप्रवेशने॥नैमित्तिकांग-
तिंवच्मिंगतःफलंविशेषतः॥३५॥जानुप्रदेशगायानोवस्त्राण्यूरुप्रदेशगा॥रंम्यासनंक-
टीदेशेमिश्रान्नंजठराश्रिता॥३६॥हृदेशेसर्वसौख्यानिकंठेकंठविभूषणान्॥ललाटेप-
ट्टबंधंचमूर्द्धगाछत्रमादिशेत्॥३७॥एवंस्थानोक्तवस्तूनांफलंताराप्रयच्छति॥वामाग्रवस्तु-
नाशायशांतेकार्येन्यथान्यथा॥३८॥गमनेचेत्सुमांस्तारोवामास्यामानिवर्तने॥अन्युत्तमप्रवे-
कार्यमध्यमंतद्विपर्यये॥३९॥गमेतारागमेवामादुर्गोचसकलंफलं॥एवंबहुलिकोयातितं=

स्वरोदय दार्द्धं जायते फलं ॥४०॥ खगः खगी विचिंत्येवं तारा वामगमागमं ॥ प्रश्नं ज्ञात्वा फलं देयं यत्किंचिच्च
शुभाशुभं ॥४१॥ निम्नात्समुन्नतिं याति श्यामा चारा महत्फला ॥ वामस्वगति नाशाय व्यत्य
२२५ ये फलं व्यत्ययः ॥४२॥ सर्वेषु शुभकार्येषु यात्राकाले तथैव च ॥ तारा शुभप्रदा ज्ञेया वामा
हानिकरी तथा ॥४३॥ तारा भयप्रदा भीतौ प्रवेशे कार्यनाशिनि ॥ दीप्त भयहरा वामा प्रवेशे सर्व
सिद्धिदा ॥४४॥ एवं गतिद्वयं ज्ञात्वा प्रदत्यादि द्विकं तथा ॥ प्रश्ने शुभाशुभं चैव ततो वाच्यशुभा
शुभं ॥४५॥ सविस्तरं मयाख्यातं तारावामागतिद्वयं ॥ ऊर्द्धाधोगतियुग्मस्य वक्ष्ये भेदात्फलं त राम
था ॥४६॥ अधोदेशात्व्रजत्यूर्द्धं या सा स्यादूर्द्धगामिगतिः ॥ काकाख्यकर्मटाख्या च गोल ५
काख्या त्रिधा तु सा ॥४७॥ काकमर्कटवद्गच्छेदूर्ध्वेन च्चामिकामता ॥ ऊर्द्धगा चापतेच्चाधो गोला
ख्या चापगा लवत् ॥४८॥ एकया हेलया दत्ते फलं काको र्द्धगागतिः ॥ क्रमेण तु फलं ख्याति दुर्गो

मर्कटकोर्द्धगा ॥४९॥ गोलोर्द्ध्या च याख्याता पश्चिणी सा विनिश्चितं ॥ कार्यारंभोन्नतिं कृ
त्वा मरणं ताय जायते ॥५०॥ ऊर्द्धभागत्रिभागं च श्रेष्ठमध्याधमानुगा ॥ व्रजंति भूरिमध्या
लं क्रमाद्दत्ते फलं शुभं ॥५१॥ ऊर्ध्वभागत्रयं याति या सा पूर्णा फलप्रदा ॥ तदूने न तदूने च फ-
लं ज्ञेयं विचक्षणैः ॥५२॥ ऊर्ध्वदेशादधो याति या साधोगामिनी भवेत् ॥ काकाख्या कर्मट
ख्या च हानितारख्या च सा त्रिधा ॥५३॥ काकमर्कटपातेन पत्तेत दभिधा तु सा ॥ पत्तित्वा धोत रा
त्वा च व्रजेदूर्ध्वं तृतीयका ॥५४॥ एकया हेलया हंति काकाधोगामिनी फलं ॥ क्रमेण वा छिनं
हत्वा न्मर्कटो धोगतिः पुनः ॥५५॥ हारिताधोगया गत्वा सा देवी दूति विचिंतितं ॥ विन्याश्य प्र-
थमं पश्चात्फलं साधयती ध्रुवं ॥५६॥ ऊर्ध्वोता त्रिषु भागेषु पतंति पोत की क्रमात् ॥ शुभं हत्वा

स्वरोदय शुभंदत्ते क्लिष्टदुष्टदुष्टकं ॥५७॥ उर्ध्वानादेकपातेन पतंति हि तिवाछितं ॥ मरणं चैतेसा दत्तेन
दूनेनतदूनकं ॥५८॥ इत्यूर्ध्वाधोगतिद्वंद्वमपारम्यातंभणाम्यहं ॥ चेष्टिकं गतियुग्मं यत्सृष्टिसं
२२६ हारचारतः ॥५९॥ दक्षिणांगेन या श्यामा भ्रमेत्सा सृष्टिवेष्टका ॥ वामांगेन भ्रमंतीतु ज्ञेया संहारवे
ष्टिका ॥६०॥ एतत्गतियुगं ज्ञेयं त्रिप्रकारं पृथक्पृथक् ॥ वेष्टका भ्रामरी चैव भ्रमरी चरतीयका
६१ ॥ सृष्टिसंहारमार्गेण वेष्टयत्शकुनेष्टकं ॥ श्यामायाः सा गतिर्ज्ञेया द्विधा वेष्टनकारिका ॥
६२ ॥ उडीयान्यत्र देशेषु मंडलेकुरुते यदि ॥ सव्यापसव्यचारेण भ्रामरी सा द्विधामता ॥ ६३ ॥ राम
स्थानान्नोडीयते श्यामा भ्रामतिवस्थिति स्थिता ॥ सव्यापसव्यचारेण भ्रमरी सा द्विधामता ॥६४ २२६
भ्रमरेण फलं पूर्णं दत्ते या सृष्टिवेष्टका ॥ संहारवेष्टका भिष्टं दत्वा रोधाद्भयं वदेत् ॥६५॥ भ्रामरी
सृष्टिगा या सा कष्टेनार्धफलप्रदा ॥ कार्यहत्वा भयं सार्द्धां दत्ते संहारवेष्टिका ॥६६॥ सव्यगा भ्रा

सव्यगा भ्रामरि श्यामा स्थानस्थानल्पफलप्रदा ॥ निष्फला भ्रमरी वामा किंचित्स्थानात्भयं वदत् ॥
६७ ॥ एवं गतिद्वयं प्रोक्तं सृष्टिसंहावेष्टकं ॥ अतः पराङ्मुखी वक्ष्ये सन्मुखी च तथा गतिः ॥६८॥
अग्रस्थाया भवेत्श्यामा गतिस्यात्र पराङ्मुखी ॥ आगच्छेत्सन्मुखी या तु सा गतिः संन्मुखी मता ॥६९
द्वे अप्यते त्रिधा प्रोक्ता वाममध्या च दक्षिणा ॥ दक्षिणं च फलं तासां वक्ष्ये हं क्रमतो गतः ॥७०॥ या
वामाग्रस्थिता याति सा तत्र वामा पराङ्मुखी ॥ आगच्छेत्सन्मुखी या तु वामा सा संन्मुखी मता ॥७१
या दंडस्थाग्रतो याति सा स्यां मध्या पराङ्मुखी ॥ आगच्छेदंडमार्गेण सा मध्या सन्मुखी गतिः ॥७२॥
दक्षिणांगस्थिता याति या सा दक्षपराङ्मुखी ॥ यातु सन्मुखमभ्येति सा स्यात्दक्षिणसन्मुखी ॥
७३ ॥ वामा पराङ्मुखी श्यामाः स्यात्संपूर्णफलप्रदा ॥ ज्ञातव्या सन्मुखी वामा शुभं हत्वाति भीतदा
॥७४

मध्यापराङ्मुखीदेवीयासामिश्रफलप्रदा॥निष्फलासन्मुखीमध्यातथार्द्धभयदामता॥७५॥पाद
क्षिणाप्रगाश्यामासैकपादमुखावहा॥सन्मुखीदक्षिणामिश्रफलंदत्तामहाभया॥७६॥क्षे
 यंगतिद्वयस्यास्यसंपूर्णंतत्प्रमाणकं॥क्षेत्रदैर्घ्यैकभूमेर्यत्प्रमाणंकथितंपुरा॥७७॥एतन्मा
नेनयाश्यामाक्रमेतेक्षेत्रमध्यतः॥सासंपूर्णफलाज्ञेयापराङ्मुखीचसन्मुखी॥७८॥तदर्द्धेनफ
लंस्यार्द्धंतत्पादपादसंख्यया॥यावदाक्रमतेश्यामातावज्ज्ञेयंशुभाशुभं॥७९॥एकैकाक्रतेभू
मिद्वितीयंपक्षिणीतुया॥स्याद्विगुणंफलंदद्येत्रिगुणंभूत्रयेमतं॥८०॥अन्येषुभूमिभागेषुयदा श्रम
न्यापोतकीभवेत्॥यदापूर्वफलादन्यत्फलंसूचयतिध्रुवं॥८१॥अग्रेपराङ्मुखीभव्यातथापृष्ठेच २८
सन्मुखी॥यथाग्रेसन्मुखिनिद्यातथापृष्ठेपराङ्मुखी॥८२॥एतत्तुगतिद्वयमुक्ताशेषंगतिपद्धंतु
यत्॥यथाग्रतस्तथापृष्ठेज्ञातव्यंतत्शुभाशुभं॥८३॥नारावामफलेमाक्तंयसक्षादिभेदतः॥तथा

गतीनांसर्वासांफलंज्ञेयंशुभाशुभं॥८४॥नारोहोसाक्षिवेष्टाचतथाचैवपराङ्मुखी॥एतास्सुग
तयश्यांतादीपशेषंचतुष्टयं॥८५॥ऊर्ध्वगासहचरीचैवसाक्षिवेष्टनकारका॥एतत्गतित्रयंज्ञे
यंतारातुल्यफलप्रदं॥८६॥अधोगासन्मुखीचैवतथासंहारवेष्टका॥इदंगतित्रयंज्ञेयंवामा
मातुल्यफलप्रदं॥८७॥गतिःशुभाशुभामिश्रास्तथैकरूपमिश्रिका॥श्याम्याकरोतिसान्या
यानासांवक्ष्यामिनिर्णयं॥८८॥आदौशांतगतिकुर्यात्पश्चाद्दीप्तांकरोतिया॥सातादृशफलाज्ञे
याएवंतद्वतिक्रमस्त्रये॥८९॥आदौशांतगतियातिपुनःशांतकरोतियः॥सानिशेषफलंदत्तेगत्या
क्रमणमानतः॥९०॥यदागतिद्वयंदीप्तंकरातिश्वेतपक्षिणि॥तदामिश्रफलंदत्वादत्तेवि
घ्नंविशेषतः॥९१॥एवंगतित्रियोगादौशांतदीप्तविभेदतः॥शुभाशुभंसमंहत्वावदत्शेष
गतेफलं॥९२॥पूर्वंशांतागतिकुर्यादेकांदिप्तांततोऽपरा॥गतिमात्रेफलंयानंस्वजातन्यविना

स्वरोदय शयेत्॥९३॥पूर्वेदिग्भागगतिं कुर्यादेकां शांतांततोपराः॥गतिमात्रे फलं नष्टं स्वजात्यन्यास्व=
सिद्ध्यति॥९४॥समकाले शुभा गच्छेत्सैका न्या च शुभां गतिं॥तयार्मध्येधिका ज्ञेया या करोत्य
२२८ धिकां गतिं॥९५॥एवं यां स्रोद्वयोः स्यातां यदा समगतिस्तदा॥उच्चश्रिता तयोर्मध्ये यातिया सा=
धिकामता॥९६॥उच्चत्वेकाधिका चैका गत्याधिका द्वितीयका॥इदं शाकुनिकैर्ज्ञात्वा तयोर्द्वयं=
समं फलं॥९७॥उच्चत्वेन च गत्या च पक्षिण्यो समता यदि॥तदा फलं समं वाये नहीनाभ्यधिकं पुनः
९८॥यथा श्यामायुगे श्याविज्ञाता गतितोधिका॥तथा पुरुषयुग्मेपि विज्ञेयः पुरुषोधिकः॥९९ राम
एवं यदा समे काले यातः पुंस्त्रीविहंगमौ॥तयोर्द्वयं विशेषण फलं पूर्वापराद्भवः॥२००॥पूर्वोक्तो बल २२८
वान् पुंसां स्त्र्यग्गः सत्यचेष्टितः॥अंगना चापराह्ने तु वामगा वामचेष्टिता॥१॥एकाकी पूर्णगत्या च ग
च्छेद्यः पक्षिणीपतिः॥स गत्यर्द्धफलं दत्ते श्यामा चेत्सकलं फलं॥२॥मिथुनं सहयोगेन गत्या च परिपू
र्णं

र्णया॥यदा याति तदा दत्ते गतिद्वयफलं नृणां॥३॥श्यामा पृष्ठे पुमान् याति पूर्णयुग्मफलं तदा॥पुंसः
पृष्ठे स्थिता श्यामा किंचिन्नूनं प्रजायते॥४॥व्याद्वक्पक्षिणो यांति यत्स्त्रन्मध्या निवर्तते॥निष्फलं सोत्र
विज्ञेयः शेषश्च फलदायकः॥५॥सव्यादिभिन्नभेदेन गत्याक्रमणमानतः॥शुभाशुभगते मीने
मेवं ज्ञात्वा फलं वदेत्॥६॥अत्र गत्याष्टके यानि नामानि लक्षणानि च॥फलानि तानि पृष्ठे च ज्ञातव्या=
न खिलान्यपि॥७॥परं गत्यष्टके प्रस्थे यथा दत्ते प्रजं फलं॥तथा पृष्ठाष्टके दत्ते पोतकी पृष्ठजं
फलं॥८॥प्रत्यक्षं भुज्यते पुंसां फलं तद्यजं मतं॥अदृश्यं भुज्यते सूत्रं मतं तत्पृष्ठजं फलं॥९॥यादृ
शी पूरतो भूत्वा निविज्ञालिंगने स्त्रियः॥मुखमुत्पद्यते पुंसः प्रत्यक्षं तादृशी फलं॥१०॥यादृशी पृ
ष्ठतो भूत्वा कामिन्यालिंगने पुनः॥यत्सुखं जायते पुंसां सदृशं तादृशं फलं॥११॥अग्रेये उ ष्ट

स्वरोदय प्रकाराः पुनरपि कथिता १४ भागेनथैव संज्ञाताः संप्रयुक्ता गतिरिह शकुने सा च षोढा प्रका
राः॥ साश्वानेकप्रकाराः कथिता निजविधेस्तज्ज्ञिकाज्ज्यै श्च भेदैरेवं यो वेत्ति संम्यक् फलसहित
२२९ गतिं स्याद्सौ शाकुनज्ञः॥१२॥ ॥इति गतिप्रकरणं॥ चेष्टा पूर्वं विधा ज्ञेया शांतदीप्ता विभेद
तः॥ षड्विंदासा विशेषेण ते च भेदा भवेत्सभि॥१३॥ शांता शांतोत्तराश्चैव दीप्तादीप्तोक्षरस्थिताः
योगचेष्टा विमिश्रास्तु या शांतास्ताः प्रणाम्यथ॥१४॥ रुत्योत्साहरति क्रीडा प्रसन्नास्तु मतस्थि
ताः॥ पुच्छोत्क्षेपो रिरंसा च हर्षस्तुष्टिः शुभेक्षणं॥१५॥ फलचक्राभिमुख्यं च शरीररचना जय॥ राम
शुच्यं शुस्नानपानं च सम्यंरक्षादिराहणं॥१६॥ स्थितिर्यातं शुभे स्थाने स्वस्वरा तारगा गतिः॥ २२९
शांताशाभिमुखे चैव यत्र पुष्पफलानना॥१७॥ सहयानां च वामांगे शांताशागमनं तथा॥ पक्षयो
र्वृक्षपक्षस्य तथोक्षप्रसारणे॥१८॥ शीर्षवक्रे दशिस्कंधे कंठे दूयुदरे भगे॥ कक्षायां वृक्षपृष्ठ

चस्पर्शनं दक्षिणांघ्रिणं॥१९॥ दक्षमार्गेण वृक्षस्य विलेखो भ्रमणं तथा॥ पक्षोवितप्रतारत्वं तथो
श्चाभ्रमणस्थितिः॥२०॥ कंठे दूयुदरगे गुल्फे दक्षपक्षांघ्रि पुच्छके॥ चंचूकंडूयनं भक्ष्यवांछा भक्ष
स्य भक्षणं॥२१॥ गत्वा ग्रासग्रहो ग्रासमुखाप्ता ग्रासभक्षणं॥ प्रभूताहारसक्तिश्च भक्षदा
नं परस्परं॥२२॥ विहंगमेश्च संयोगो एकजात्यैरभिक्षितैः॥ विजात्यैरविरुद्धैश्च संयोगा
युगलस्य च॥२३॥ स्वपक्षे दर्शनं चैव स्निग्धशाखाप्ररोलनं॥ स्वनीडकृतिनिर्भिन्ने स्वपक्षि
पक्षितो धर्मो॥२४॥ शाकुनकातिनैवेद्यं पुच्छछायश्रवणं तथा॥ शांतचेष्टा इमाः सर्वा विज्ञेया पो
तकीकृताः॥२५॥ इति शांतचेष्टा॥ शांतचेष्टा समाख्याता द्विसप्तति प्रमाणतः॥ एतासंक्रमशो
चक्ष्ये फलं शांतं परिस्फुटं॥२६॥ रत्संप्तीपोतकीदत्ते महावृद्धिमहोत्सवं॥ सोत्साहामनउत्साहं=

स्वरोदय स्त्रीलाभंरसमाणका॥२७॥क्रीडनानुभवेल्लाभस्तथा क्रीडासुखानि च॥ चित्तशांतिप्रसन्नत्वो
त्कमनाश्चित्ततोषहा॥२८॥पुच्छोत्क्षेपेण तत्कार्यसिधी बंधागमस्तथा॥ योषिल्लाभो रिरीसा या
२३० हर्षो हर्षप्रदो नृणां॥२९॥तुष्टिक्तुष्टिकरी ज्ञेया यद्विहस्य प्रसन्नया॥ दिशो निरीक्षते सर्वास्तल्लाभ
सर्वदिग्भवः॥३०॥उत्फुल्लवदना देवी समा(स्या)तिफलागमं॥ संमुखी समुखीकार्यं दत्ते पांडविकाध्रुवं॥
३१॥समारत्नमंगस्य भोगान्दत्ते धनंजयः॥ शुन्यबुस्लानमाचष्टे शीघ्रं राज्याभिषेचनं॥३२॥शु
च्यंबुपानतो देवी महालाभकरी मता॥ लक्ष्मी ददाति विस्तीर्णसमंवृक्षादिरोहणं॥३३॥ दृष्टोदेविश्रु राम
भस्थाने स्थानस्थानं शुभप्रदा॥ गत्वास्थित्वाशुभस्थाने विशीघ्रस्थानदायिका॥३४॥ सुस्वराम २३०
धुरालापयुतं लाभं प्रयच्छति॥ ताराभिष्टार्थलाभाय शांता शाभिमुखी शुभा॥३५॥ पत्रमुखी शु
समाख्याति फलं पात्रांतरेण तत्॥ पुष्पंमुपुष्पितं दत्ते चिरकालेन तत्फले॥३६॥ फलपूर्णमुखी श्या

मादत्ते शीघ्रं महाफलं॥ वामांगेन समं याति सा देवी सर्वसिद्धिदा॥३७॥ शांता शांतिमुखी याति या शाशां
तफलप्रदा॥ पक्षद्वयेन तत्लेन विजयो वृद्धिसंयुता॥३८॥ पक्षद्वयप्रसारेण दत्ते पांडविका नृणां॥
स्वगोत्रसहितानां च स्थानस्थानां समुन्नतिं॥३९॥ दक्षपक्षो धृयान्दत्ते विजयं च समुन्नतिं॥ दक्षप
क्षप्रसारेण फलमुन्नतिसंयुतं॥४०॥ दक्षिणचरणाग्रेण शिरः कंडूयते यदि॥ पद्बंधं समाख्याति मु
खं चेद्भोजनं सदा॥४१॥ नेत्रस्य स्पर्शने श्यामा भद्राणि दर्शयेत्सदा॥ प्रियाऽवगुहनं स्कंधे कंठकं
ठस्य भूषणं॥४२॥ न्नद्रः शार्शमहासौख्यं जठरे वांछितार्थदाः॥ गुह्यस्पर्शे प्रसंगार्ति कक्षाया
मुन्नताश्रयाः॥४३॥ पक्षस्पर्शे श्रियं दत्ते पृष्ठस्पर्शे च वाहनं॥ एवं दक्षिणपादेन स्पर्शने कथि
तं फलं॥४४॥ चंच्वा दक्षिणमार्गेण पृष्ठस्योल्लेखने ध्रुवं॥ गजाश्वलाभमाचष्टे दक्षिणक्रमण
तः श्रियं॥४५॥ पक्षौ दिस्तार्यपानेन दक्षिणा गोत्रवृद्धिदा॥ उच्चं समाश्रयंती च श्यामा मानोन्न

स्वरोदय ति प्रदा॥४६॥ कंठं कंडूयते चेच्चा द्दत्ते कंठ विभूषणं॥ योग्यालंकार लाभं तु तद्दकंडूयनेन त
था॥४७॥ चेच्चा जठरकंडूयाद्दत्ते मिष्टान्नभोजनं॥ रति लाभं समाख्याति गुह्यकंडूयते पुनः
२३१ ॥४८॥ चेच्चा दक्षिणपक्षस्य कंडूत्या सुहृदागमः॥ चेच्चा दक्षिणपादस्य कंडूत्या यानक्षमता॥
४९॥ चेच्चा दक्षिणमार्गेण पुच्छं कंडूयते यदि॥ नष्टार्थलाभमाचष्टे तथा शामा विनिश्चितं॥५०॥
भक्षाभिलाषतो ब्रूते समासन्नं शुभं फलं॥ तत्काल प्राप्त भक्षाच फलं शीघ्रं प्रयच्छति॥५१॥ गता
ग्र ल्हाति या ग्रासं सा यासेन फलप्रदा॥ भक्ष्य मुखि समाख्याति फलं शिद्धं न संशयः॥५२॥ आया राम
सां च न दां लेच मुखभक्ष्योपयोगतः॥ प्रभूताहार सत्काच दत्ते ह्याति बहुफलं॥५३॥ अन्योन्य भक्ष्य दा २३१
नेस्यात् भोज्यं भक्षं स्वगोत्रभिः॥ स्वजात्यैः सह संयोगे मित्रप्राप्तिर्भवेन्नृणां॥५४॥ अविरुद्ध विजा
तियैः पक्षिणी यदि युज्यते॥ तदातिन द्विरुद्धानां सद्यः प्रीतिः प्रजायते॥५५॥ मिथुनस्य समायोगे

जायते वांछितं फलं॥ सपक्षदर्शनं पुंसां कार्यं साधयति ध्रुवं॥५६॥ स्वशाखां दोलने सौख्यं स
नीड करणे गृहं॥ निर्भयत्वे पुनस्तस्याः कार्यं तं निर्भयं भवेत्॥५७॥ पक्षिणं पूर्वदृष्टस्य परेणो
न्नत विग्रहे॥ साहाय्य करणत्वेन सहायाप्तिर्भवेद् ध्रुवं॥५८॥ उद्यमे रुद्यमे कुर्यात् दीक्षका सन्न
मागता॥ अत्यासन्नं फलं दत्ते सुच्छाया श्रयणे ध्रुवं॥५९॥ इति शांत चेष्टा फलानि॥ शांताः चेष्टा
समाख्याता द्विसप्तति फलान्विता॥ एतासां मध्यतो वक्ष्ये चेष्टा शांतो नराअहं॥६०॥ नितंबसु
चि जलस्नानं स्वजाति सुरतं तथा॥ पक्षयोरुन्नतिश्चैव पक्षादान परस्परं॥६१॥ दक्षिणेन च पा
दे न शिरः कंडूयनं तथा॥ पक्षौ विस्तार्य पक्षिण्या दक्षिणं गमनं तथा॥६२॥ फल वक्त्रा च भक्षा स्यात्
युद्धे जयं तथैव च॥ एता शांतो च राश्चेष्टा महाशांत फलप्रदाः॥६३॥ शांते शांता शुभा स्ते या दीप्ते शां
ता भय प्रदा॥ चेष्टा शांतोत्तरा या स्तु शांत दीप्ते च शोभना॥६४॥ इति शांतो नर चेष्टा॥ शांते शांतो

स्वरोदय नराचेष्टाप्रोक्ताफलसमन्विताः॥ एताः संयोगतावक्ष्ये योगचेष्टाफलान्विताः॥ ६५॥ यदिचेष्टा
द्वयं शांतो सम योगे नजायते॥ योगशांतोत्तराचेष्टा विज्ञेयासामहाफलाः॥ ६६॥ शांताशां
२३२ तोत्तराचेष्टाजायतेसमगंयदि॥ शांतोत्तरोसौचैत्तरासाचदत्ते महाफलद्वयं॥ ६७॥ शांतोत्तराद्वयंकु
र्यात् युगपत्यदिपक्षिणी॥ महाशांतोत्तराचेष्टाराज्यंराज्यंप्रयछति॥ ६८॥ शांताद्यास्त्वादिकाचेष्टा
समयोगेभवंतीयाः॥ समकालंप्रयछंतितत्सरमेष्टफलानिता॥ ६९॥ शींशांतोत्तराद्याद्याचेक्रमे
णभवंतिहि॥ तदातत्सरव्यमानेनक्रमेणैवफलंतिता॥ ७०॥ ददातिशांतचेष्टानोद्विघ्नंशांतोत्तरांफलं राम
॥ एवंज्ञात्वाफलंदेयंसंजातेद्यादिचेष्टिते॥ ७१॥ इतियोगचेष्टा॥ इतिशांतचेष्टाप्रकरणंसमाप्तं॥ २३२
शांताशांतोत्तरायोगः श्चेष्टाप्रोक्ताफलान्विताः॥ प्रवक्ष्येते ऽधुनाचेष्टादीप्तास्तासां फलानिच॥
७२॥ विष्टामूत्रभ्रमछर्दिनिद्रालस्यांविचेष्टिताः॥ जंभामोहवधःपातोरोगार्त्तोः स्वागतंजनं
॥ ७३॥

दौर्मनस्यारिसंयोगोयुद्धेचाथपराजयः॥ स्वपिछोत्पाटनंस्वागंचर्वेणंचचुथर्षणं॥ ७४॥ चंचुनास्वांग
घातश्चविटपादहृतिस्तथा॥ चंच्वात्मनस्तरोश्चापिलग्नेदोदर्शनंतथा॥ ७५॥ अचिंतितोपघातश्चअ
न्यजातिकृतस्तथा॥ अपहारश्चपक्षिण्याः स्येनः समलिकादिभिः॥ ७६॥ नाशस्त्रासातुरत्वंचयुद्धेवि
घटनंतथा॥ भूरिमेलापकस्तासांगमनंसूर्यसन्मुखं॥ ७७॥ तृणकेशास्तिपाषाणाचर्मांगारमुखीतथा
काष्टरज्जुमुखीजीर्णवस्त्रपिछमुखीपुनः॥ ७८॥ शामापराङ्मुखीश्चैवतथावक्रमुखीस्तथा॥ अं
तर्द्धानंचपक्षिण्याशिरसश्चप्रकंपनः॥ ७९॥ त्रोटयंतिफलंपुष्पंपत्रंवाथतृणानिच॥ विष्टामीष्टंप्र
संतीवदुष्टंबुपानमज्जनं॥ ८०॥ अप्राप्तिर्दृष्टभक्षस्यप्राप्तभक्षपलायनं॥ ग्रासायहरणंचैवनः
शक्तिर्भक्षणे॥ ८१॥ भक्षत्यागस्थितेभ्रंशः स्थानादुल्लुवनंतथा॥ व्योमावलोकनंवामादक्षांगेस
न्मुखागमः॥ ८२॥ पराजातिसमासंगोभ्रामणंवामतस्तथा॥ अधोवक्रास्वरोदुष्टापादसंकोचनंतथा
॥ ८३॥

अनुधमस्तथा ध्यानं गात्राणां च विमोक्षणं॥ अन्यत्र गमनं क्षेत्रादासीनस्य च लापनः॥८४॥ प्रदी
प्तदिगवस्थाने दुस्थानावस्थितिस्तथा॥ युग्मयोगरीरं सा च तथोत्साहस्य मोक्षणं॥८५॥ उपेक्षो
२३३ वामपक्षस्य वामपक्षप्रसारणं॥ कार्शो हीणाव चेष्टा वा वामांगस्य गुदस्य वा॥८६॥ पंकस्थानं प्रवेश
स्त गर्ते विवरकोटरे॥ पादपादवतारश्च विपक्षे दर्शनं तथा॥८६॥ धुननं कंपनं स्तंभो देहस्यो
हर्षणं तथा॥ उत्तानपादसंस्पर्शी चेष्टा स्वगृहभंजनं॥८७॥ चेष्टा वामांगकंडूया कुशाखायाश्च
दालनं॥ रज्जुसिभस्ममध्ये च क्रीडा मज्जनलोटनं॥८८॥ पादेन पादकंडूया च चाद्रिखननं भुवं॥ राम
पृष्ठकंडूयनं चेष्टा वामांगाचलनेन च॥८९॥ इति दीप्तचेष्टा॥ दीप्तचेष्टा इमाः सर्वाः संख्या अष्टोत्तरंश २३३
तं॥ तासां फलानि दीप्तानि वक्ष्येहं क्रमशोधुना॥९०॥ विष्टायां फलनाशः स्यात् मूत्रे वित्तक्षयो
भवेत्॥ कार्यभ्रंशो भ्रमे भ्रांतो सिद्धकार्यं विनश्यति॥९१॥ निद्रायां स्थानघातः स्यात् दारुस्पेव्या

धितो भयं॥ निश्चेष्टापरवस्था यज्जं भादने पराङ्मुखं॥९२॥ मोहक्लेशाय हृर्णा स्याद् अधःपाते भवेन्मृतिः
रोगार्ती रोगदा स्वांग भंजने व्याधितो भयं॥९३॥ रोमनस्यात्सुबंधूनां मतिर्वातोश्रुतिर्भवेत्॥ अरियो
गेन यं द्विष्टान् युद्धे भंगपराभवः॥९४॥ स्वपिछोत्पाटने मृत्युः रुकघातः स्वागच वर्णे॥ चेष्टा आ
घर्षणे क्लेशः स्वांग घातस्त घातदः॥९५॥ वृक्ष[?]दिहनने दंते विघातं स्वजने जने॥ स्वां कलत्र कू=
छेदने पीडां कुरुते स्वांगकेनं णं॥९७॥ वृक्षलकृछेदने दंते पीडां बंधुशरीरके॥ अदर्शने च दुर्गायाः
कार्यस्यादर्शनं भवेत्॥९८॥ अचिंतीर्थनापथा तेन लरिष्टं स्यादचिंतितं॥ विज्ञाने रूपघाता च श=
त्रुतो घातमादिशेत्॥९९॥ श्यामायालनकाघे श्च हतो मृत्स्करचिंतितः॥ नासे तु कार्यनासः स्यात्
त्रासे संजायते भयं॥४००॥ आतुराचाकुलत्वाय युद्धे युद्धं समादिशेत्॥ विघटने वियोगः स्यात्
भूरिलापके रणं॥१॥ सूर्यसन्मुखयानेन संतापं कार्यनाशनं॥ तृणमुखी च दारिद्र्यं क्लेशास्थि

स्वरोदय वदनामृतिः॥२॥पाषाणवदनादेवविपरचक्रांगमेववदेत्॥चर्ममुखीरुजोभीतिमांगारास्याकुलक्ष
यं॥३॥काष्ठंकाष्ठमुखीदंतेरज्जुवक्त्राचबंधनं॥दारिद्रंजीर्णवासास्यात्दुःखंपिच्छमुखीम=
२३४ हत्॥४॥पराङ्मुखीफलंहंतिवक्रास्यात्वक्रकार्यकृत्॥अंतर्द्धानेनभीतिस्यात्द्विफलामूर्द्ध
कंपने॥५॥फलपत्रोटनेदेवीफलंसिद्धविनाशयेत्॥फलाभावंसमाख्यातिपुष्पस्यशोटनेपुनः
॥६॥पत्रच्छेदेफलंसर्वंपात्रांतरेणनश्यति॥तृणानात्रोटनेदेवीसूचयेद्वंधुविग्रहं॥७॥विण्महारे
चदारिद्र्यंमरणंमांसभक्षणे॥दुग्धांबुपानेनिक्लेशोमृत्युर्दुग्धांबुमज्जने॥८॥अप्राप्तौदुग्धभक्षस्य
दुग्धान्नस्यफलक्षयः॥प्राप्तःफलक्षयःप्राप्तःशल्यभादेपलायनं॥९॥आत्मजातिविजातिभ्यां राम
भक्ष्यापहरणेफलं॥सिद्धमेवान्यतोज्ञातिस्वकजातिविजात्ययोः॥१०॥भक्षिणशक्तितक्लेशोन २३४
शनेभक्ष्यमोचने॥स्थानभ्रंशोस्थितभ्रंशःस्थानाद्विलुवनेमृतिः॥१२॥देशभंगसमाचेष्टा=
म्रोमावलोकनेमृत्युःवामगाकार्यनाशकाः॥विघ्नंसूचयतेश्यामादक्षांगेसन्मुखागमे॥११॥

=सुरतंचविजातिना॥वामांगभ्रमणेश्यामाविदधातिकुलक्षयं॥१२॥अधोवक्त्राफलंहंतिदुर्वी
र्त्त्वदुश्चदुःस्वरः॥पादसंकोचनेक्लेशोऽनुद्यमेऽभ्युद्यमोभवेत्॥१४॥दृग्नेसर्वार्थविध्वंसंध्या
नसंस्थावराहिका॥सर्वांगाणांविमोक्षेणस्वजनानांविघातकृत्॥१५॥क्षेत्रादन्यत्रपातेनचिंति
तार्थस्यनाशिकाकार्यनाशकरीचस्यात्त्रासिनप्रपलायते॥१६॥प्रदिप्तेदिग्विस्थानेचकार्यभ्रं
शोभवेन्नृणां॥कुस्थानावस्थितौक्लेशःपंचत्वंचातिनिंदिते॥१७॥युग्मयोगेरिरंसायांकार्यना
शोभवेद्ध्रुवं॥उत्साहमोक्षणेश्यामासिद्धमंगल्यनासिका॥वामपक्षोन्नतत्वेनकुरुतेसाकुल
क्षयं॥वामपक्षप्रसारेणशत्रुपक्षान्महद्भयं॥१९॥वामांगंवामपादेनस्पृशेद्यत्रयातदा॥चं
च्वावामांगसंस्पर्शेविपक्षाद्भयमादिशेत्॥२०॥चंच्वग्रेणगुदस्पर्शेव्याधिशत्रुगुदोद्भ
वः॥पंकस्थानेभवेद्रोगोभयंगर्त्तप्रवेशने॥२१॥बिलप्रवेशनेमृत्युःकातरेचमहाभयं॥दक्षो

स्वरोदय तिर्णाश्चयेह्नि कार्यविक्षेपदर्शने॥२२॥ धुननं कार्यनाशाय कंपनं भूरिभीतिदं॥ कार्यस्य लंभ
नं लाभे रोगमुद्धुषितावदेत्॥२३॥ चंचौत्तानो ह्रि संस्पर्शे वदेत् भिक्षाटनं ध्रुवं॥ स्वग्रहोत्पा
२३५ टने भ्रंशः स्वग्रस्य भवेन्मरणं॥२४॥ चंच्वावामांघ्रि कंडूया विदेशगमनप्रदा॥ कुशास्थां दोलने
देवीकार्यस्य दोलनं वदेत्॥२५॥ क्रीडंति सारजोमध्ये पुंसां मालिन्यमादिशेत्॥ रजश्चावे
नदारिद्र्यं रुजां धूल्यां विलोटने॥२६॥ क्रीडंति भस्ममध्ये सा पक्षजाय भवेन्मरणं॥ भस्मस्था
नेन मृत्युः स्यात् भस्मोल्लोटात्कुलक्षयं॥२७॥ पादेन पादकंडूत्याः मार्गक्लेशप्रदा भवेत्॥ भूख राम
नने ह्रिर्णा चंच्वा कुल्लोछेदकरी भवेत्॥२८॥ पृष्ठं कंडूयते चंच्वावामां गचलनेनया॥ पूर्वसंचि २३५
तवित्तस्य सास्याद्विमासिका॥२९॥ इति दीप्तचेष्टाफलानि॥ दीप्तचेष्टा समारभ्याता संख्यया
सोत्तरं शतं॥ एतासां मध्यतो वक्ष्ये चेष्टादीप्तोत्तरा अथः॥३०॥ विष्टावांतिरधःपातः स्वप

क्षोत्पाटनं तथा॥ तृणास्थिके स्वपिछास्याच्चर्मांगारमुखी तथा॥३१॥ रज्जुपाषाणकाष्ट=
स्या जीर्णवस्त्रमुखी च या॥ स्वपिछोत्पाटनं स्थानं भस्मदुष्टंबुकर्दमे॥३२॥ द्विजाति सुरसं
तं स्यांगे स्वकीयचचुनाः॥ युद्धं पराभवश्चैव भये शोबीजकोटरे॥३३॥ भक्षापहरणं चान्यैः प्राप्त
भक्ष्यपलायनं॥ अचिंतितोपघातश्च हरणं श्येनकादिभिः॥३४॥ आसनात्पतनं चैव भंगस्त
स्यासनस्य च॥ एता दीप्तोत्तराचेष्टा महादुष्टफलप्रदाः॥३५॥ इति दीप्तोत्तरचेष्टाः॥ दीप्तोदी
प्तेतराश्चेष्टाः फलयुक्ताः प्रकाशिताः॥ एतासं योगतो वक्ष्ये योगचेष्टाफलान्विताः॥३६॥ दी
प्तचेष्टाद्वयं देवी सममेव करोति यत्॥ योगदीप्तोत्तराश्चेष्टा विज्ञेया सातिदुष्टदा॥३७॥ दीप्ता=
दीप्तोत्तराचेव जायते समगं यदि॥ दीप्तोत्तरोत्तराचेष्टा संगात्सत्संददाति साः॥३८॥ दीप्तोत्त
राद्वयं श्यामाः करोति युगपद्यदि॥ महादीप्तोत्तराश्चेष्टाः साकुलोछेदकरो मरणं॥३९॥ दीप्ताधास्था

स्वरोदय दिकाचेष्टाः ज्ञायते सगं यदि ॥ दुष्टफलानिता वंति यच्छंति सममेव ताः ॥ ४० ॥ दीप्तादीप्तोत्तरा या
धा जायंते क्रमतो [illegible]दि ये ॥ तत्संख्यया फलं दद्युः क्रमेणैव तथा निजं ॥ ४१ ॥ दशातिदीप्तचेष्टा हि
२३६ द्विघ्नं दीप्तोत्तराफलं ॥ एवं विचार्य दातव्यं जायंते द्विश्यादि चेष्टिते ॥ ४२ ॥ दीप्ते दीप्ता शुभा ज्ञेया
शांते दीप्ता यावहाः ॥ चेष्टा दीप्तोत्तरा यास्ताः दीप्ते शांते च दुष्टदाः ॥ ४३ ॥ इति दीप्तोत्तराया
ग्रचेष्टाः ॥ दीप्तादीप्तोत्तरा योगः चेष्टा प्रोक्ता फलान्विताः ॥ ४४ ॥ प्रवक्ष्यंते धुना चेष्टा विमि
श्राफलसंयुताः ॥ ४४ ॥ स्पर्शनं वामपादेन शीर्षं कंठोदरे हृदि ॥ ग्रीवा पृष्ठ भगे मिश्रा श्चेष्टा राम
स्वल्पफलप्रदाः ॥ ४५ ॥ दक्षपादेन वामांगे वामपादेन दक्षिणं ॥ वाल्यपि त्वास्पृशया च शाम २३६
सा निःफला भवेत् ॥ ४६ ॥ यदि चेष्टाद्वयं शांतं दीप्तं स्याद् कहेलया ॥ मिश्रचेष्टा च सा ज्ञेया किंचि
दुष्टफलप्रदाः ॥ ४७ ॥ शांतां दीप्तोत्तरां चैव सहैव कुरुते यदि ॥ दीप्तचेष्टाफलं दीप्तं सार्द्धं दत्तेव

राहिका ॥ ४८ ॥ यदा शांतोत्तरा चेष्टा दीप्ते चेष्टां समन्विता ॥ कुरुते पक्षिणी दत्ते किंचित् शांतफलप्रदा
॥ ४९ ॥ यदा शांतोत्तरा चेष्टा दीप्तोत्तरा समन्विता ॥ समकालं समुत्पन्ना तदा दीप्तफलप्रदा ॥ ५० ॥ शां
तदीप्ताहिकाः स्या धासमगत्सं भवंति याः ॥ तेन क्रमेण यच्छंति तत्संख्यं तत्क्रमं फलं ॥ विचार्य स्वधि
यातासां फलं देयं शुभाशुभं ॥ ५१ ॥ शांतदीप्तादिका द्या धा यक्रमत्तो भवंति हि ॥ किंचित् शां
तादिका दीप्ता ज्ञस्याः शांतोत्तरादिकः ॥ शांतोत्तरबला द्विघ्नं बलं दीप्तोत्तरां विदुः ॥ ५३ ॥ एवं
विचार्य सबला याचेष्टा पातकी कृताः ॥ शोध्या हि नाधिका ताश्च शेषा यास्ता फलं वदेत् ॥ ५४
॥ गंता चेष्टा सरब्धं न कुर्वति श्चेर्यो यदि पक्षिणी ॥ स्वं उचेष्टा च सा ज्ञेया फलारंभविनाशकाः
॥ ५५ ॥ दीप्तचेष्टां समारब्धां न करोति श्चेत पक्षिणी ॥ विज्ञेया पठं चेष्टा सा भयं कलाप्यपोह
ति ॥ ५६ ॥ स्वपक्षे या शुभा चेष्टा सा स्वपक्षात् शुभावहा ॥ या यास्मिन्न शुभा चेष्टा स्वपक्षा सा भयं

स्वरोदय करी॥ विपक्षे याशुभा चेष्टा सा विपक्षात्शुभंकरी॥ तस्मिन्नंगे प्रदीप्ता या सा विपक्षाद्विनाशिका

॥५८॥ शांता शांतोत्तरा चेष्टा दीप्ता दीप्तोत्तरा तथा॥ शुभाशुभवया यानेम्याधुद्दनेपि सा तथा॥५९॥

२३७ शांता शांतोत्तरा या निजफलसहिता योगचेष्टा स्वतासां दीप्ता दीप्तोत्तरा या पुनरपि कथिता या गचेष्टा

स्तथैव॥ या अन्यामिश्ररूपास्तदनुप्रकटिता ब्रह्मपुत्र्याकृता स्ता एता यो वत्ति सम्यक्स भवति श

कुनज्ञानप्रसिद्धसिद्धः॥६०॥ इति चेष्टाप्रकरणं॥ पूर्वं पंचस्वराख्याता शास्त्रसंग्रणे मया॥ सांप्र

तं तान्प्रणिध्यामि घराद्यानूपोतकीलतान्॥६१॥ स्वरांश्च स्वरभेदांश्च तत्कृतीकरणानि च॥ भेदा राम

नां प्रतिभेदांश्च तत्फलानि च वक्ष्यहं॥६२॥ पृथिव्यापस्तथा तेजो वायुराकाशमेव च॥ एते पंचस्व २३७

राख्याता एतद्भेदं वदाम्यहं॥६३॥ इति पंचस्वराः॥ स्वरश्चिलिचिलि पृथ्वी शूली शुली स्तथैव च॥

चिकुचिकुस्वरोचारी कुचिकुचिस्तथा पुनः॥६४॥ कीतुकितुस्वरोच्चारो ये चान्ये स्वलितस्वराः

विज्ञेयास्तेजसा एते चीची चिलिकु वायुजो॥६५॥ चीकुचीकुस्वरो व्याम तथा चिरिश्चिरिर्मतः॥द

शभेदा भवंत्येवं पृथ्व्यादिद्विप्रकारतः॥६६॥ इति पंचस्वराणां प्रत्येकं द्विप्रकारत्वेन दशभेदाः

स्वरांणां करणे यानि कारणानि विदुर्बुधाः॥ वदामि तानि सर्वाणि पार्थिव्यादिक्रमादहं॥६७॥ चिलि

लाभे सुखे शुलि चिकु व्याहरणे मतः॥ कूचिकूचिर्जके छायां स्वलिता कितुका मतः॥६८॥ भये ची

ची स्वरोच्चारो वियोगे चिलिकुस्वरः॥ कष्टे चिरिचिरि प्रोक्ता दैन्ये चीकुस्वरो मतः॥६९॥ स्वस्वदंकफक

कचूर्णी प्रोक्तानि कारणान्यथा॥ भेदानां प्रतिभेदाश्च पंच पंच वदाम्यहं॥७०॥ चिलि चिलि चिलि

चिलि चिलि चिलि चिलि शब्दश्च पार्थिवो ज्ञेयः॥ शुशुभूशुशुलि शूलि शुस्वरावस्तथैवहः

इति पार्थिवस्वरस्य द्विभेदस्य द्विभेदस्य॥ प्रत्येकं पंचप्रकारत्वेन दशभेदः॥ चिकु चिचिकु चिचि

कुचिचिकु चिकु शब्दश्च वारिजो गदितः॥ कूचि चिकु चिकू चिचिकू चिची कूचिकूचिश्च॥७२॥

स्वरोदय इति आप्यस्वरस्य दशभेदा॥ किंतु किंतु किंतु किंतु किंतु नादश्च तैजसः॥ कथितः ये चान्ये खलि
तर वास्ते सर्वे तैजसा ज्ञेयाः॥७३॥ इति तैजसस्वरस्य दशभेदाः॥ चिचि चिचिची ची स्व ची ची चि
२३८ चिचिचिरा स्वमरुतस्मातः॥ चिलिकु चिलिकुः चिलिकुः चीलि लि कु चिलि चिली कुश्च॥७४॥
इति वायुस्वरस्य दशभेदाः॥ चिरि चिरि चिरि रिची रिचिरी चिचि भवति नाभसो नादः॥ चीचीकुचि
कुचिचिकु चीचिकु ची चीकिकु चीकु चिकुश्च॥७५॥ इति आकाशस्वरस्य दशभेदा॥ इति दश
स्वराणां प्रत्येकं पंचप्रकारत्वेन पंचाशत्प्रभेदाः॥ एषां शुभाशुभफलं वक्ष्येहं पृथक् पृथक् राम
सर्वेषां॥ पंचाशत्संततिभेदानां निर्दिष्टं यथा यथा मुनिभिः॥७६॥ चिलि लाभं चीलि जयं सुखं च २३८
चिलि चिलि चिलि स्वरे भंगं॥ चिलि चिलि राज्ये पुंसां दत्ते इति शाकुने ख्यातं॥७७॥ शूशू कन्या
शुशु सुतं शूलि निधानं च भोजनं शूलि शूशू मुद्राकोभं पार्थिव शब्दाः शुभा एवं॥७८॥ चिकु

संगं चिचिकु पदं चिचिकुं चिसू दूलं सुखं चिचिकुचि॥ चिकु चिकु वांछितलाभं कथयंति पानियजैः
शब्दैः॥७९॥ कुचिं चिमित्रलाभं कुचिचिदेशाच्चिकुचिसंतोषं॥ कुचिचिग्रामपदं सैन्ये पदं कुचिकु
चिश्च॥८०॥ किंतु शोकं किंतु सुखं किंतु कलहं च किंतु॥ किंतु क्रीडां मोहं किंतु विघ्नं स वलित र
दानिः फला सर्वे॥८१॥ चिचि पीडां चिचि भयं चिचि रोगं चिचिर दोहानिं॥ चिचि चिचि चिबंधु वियोगं वा
युरदादुष्टदा एव॥८२॥ चिचि लिकु घातं चिलिकु गमनं च चिलि चिलिकु उद्वेगं॥ वह्निभयं तु चि
ली ली कु ची ली लिकु संगरं ख्याति॥८३॥ चिरि कष्ट चीरि रिशब्दो महाभयं कुरुते॥ चिरिचि
रिबंधन हेतु चीचीचीमृत्युमाख्याति॥८४॥ चीचीकु बंधु कुभयं चीकु चीकु कुलनाशं॥ चीचि
चिकु संत्रासं चीचीकु द्वेषं समाख्याति॥८५॥ एवं सूक्ष्मप्रभेदानां फलानि कथितान्यथा॥ सा
मान्यतः फलं वच्मि क्ष्मादि पंचक संभवं॥८६॥ पृथ्वी स्वरो महालाभो वारिजे वांछितं फलं॥ ते

स्वरोदय जोमिश्रंफलंज्ञेयंभयंवायोमृतिस्तथा॥८७॥यत्प्रोक्तंस्वफलप्रोक्तंकेवलेषुस्वरेष्विह॥द्वित्र्या
दिकरणेज्ञेयंस्वरावानुक्रमात्तत्॥८८॥तेजसाःपार्थिवाप्याश्चवायुजाम्यामजाःस्वराः
२३९ यथोत्तरबलाएतेज्ञेयाशाकनवेदिभिः॥८९॥बलाधिकेफलपूर्णंहीनंहीनबलेस्वरे॥पूर्व
पृष्टेसमंज्ञात्वापूर्वेपृष्टेफलंवदेत्॥९०॥पार्थिवाप्यौस्वरौमित्रेतथातेजसमीरणौ॥धरातेज
सखिलंचशेषाःसंतुस्वरामताः॥९१॥स्वराशांनोमहाशांतोजायतेमित्रयोगतः॥दुष्टेदुष्टतांया
तिशत्रुयुक्तोनसंशयः॥९२॥अशुभोपिशुभोनादोमित्रयोगेनजल्पितः॥शुभोपिशुभतां राम
यातिशत्रुयोगेकृतोरवः॥९३॥पृथ्वीशक्रयमाशायांपानीयंपश्चिमोत्तरे॥तेजोवह्निचलेवा २३९
युर्व्योमाश्रयेणगोचलि॥९४॥स्वदिशायांबलंपूर्णंमित्राशायांफलंददं॥शत्रुदिक्फलनाशा
यत्रस्थानेस्वराफलं॥९५॥नंदाभद्राजयारिक्तापूर्णासुतिथिषुक्रमात्॥तिथ्याधीशास्वरा

ज्ञेयाःपार्थिवाद्यादिनेदिने॥९६॥स्वस्वतिथ्यादितःसर्वेउदयातिक्रमादमी॥षट्घटिकाकप्रमा
णेनस्वराणांकालजंफलं॥९७॥निजकालेफलंसर्वंमित्रकालेफलार्द्धकं॥शत्रुकालेफलंनास्ति
त्रिधाकालबलंमतं॥९८॥पृथ्वीजलौशुभौनंदावशुभौव्योममारुतौ॥तेजोमिश्रफलंदत्तेसंयु
तोयनतत्समं॥९९॥धरापूर्वाःस्वरायेचतेसर्वेशुभदामताः॥अन्यस्वरानुगापृथ्वीहानिरोगभ
यप्रदाः॥५००॥पृथ्वीपूर्वकसंयोगःस्वरैःशांतफलंभवेत्॥बलाबलविचारोत्रनकर्तव्यः
कदाचनः॥१॥पार्थिवादिक्रमेणैवव्यामांताविहितायदि॥स्वरापूर्णफलाज्ञेयाद्वित्रियोगानु
सारतः॥२॥धरायावापितंबीजंसर्वोपद्रववर्जितं॥नरोहतितथापादंवारियोगंविनाक्वचित्
॥३॥धरावारिसमायोगेयदाबीजंप्ररोहति॥विनातुतेजसातत्रवृद्धिस्यान्नैवतादृशी॥४॥पृ
थ्वीसलिलवह्नीनांसंयोगोजायतेयदि॥तदयस्मकूननिष्पत्तिशोभनंमारुतंविना॥५॥धरा

स्वरोदय बुवह्निवायुनां संयोगे स्यात्फलं यदि ॥ फलपाके तु नाशो निर्मलं गगनं विधा ॥ ६ ॥ धरांछग्निमरु
द्योगयोगसम्यक्फलप्रदः ॥ तथा तथा स्वरैः पूर्णैः पंचभिः शकुनं फलं ॥ ७ ॥ पंचनादेधापूर्वे पूर्णेशा
२४० तं यथा फलं ॥ तथा रीक्तं फलं पूर्णं व्योमादिव्यस्यस्वरैः ॥ ८ ॥ शांते प्रश्ने स्वरः शांतो विपक्षे स्वल्पदुष्ट
दः ॥ पूर्णे दुष्टं वदेत् दुष्टो गमे व्याघुटने तथा ॥ ९ ॥ दीप्तप्रश्ने स्वरो दुष्टः स्वपक्षे दुष्टनाशनः ॥ अल्पदु
ष्टहरः शांतः प्रवृत्तो च निवर्त्तते ॥ १० ॥ दीप्ते प्रश्ने स्वरो दुष्टो विपक्षे स्वल्पदुष्टदः ॥ शांतेति दुष्टदो
ज्ञेयो गमे वागमने पि वा ॥ ११ ॥ शांतो शांतः स्वरे पृष्टे गमे न स्वार्थलाभदः ॥ आगमे दुष्टदो ज्ञेयो दी राम
प्तेतु तद्विपर्यये ॥ १२ ॥ दीप्तदीप्तः स्वपृष्टे गमे स्वल्पः शुभो मतः ॥ आगमे स्वल्पदुष्टो सौ शांतेप्र २४०
श्ने द्विपर्ययः ॥ १३ ॥ अग्रशांतस्वः शांतो प्रवृत्तो स्वल्पदुष्टदः ॥ व्यावृत्तो तु महानो दीप्तप्रश्ने द्वि
पर्ययः ॥ १४ ॥ अग्रेदीप्तस्वरो दीप्ते गमदुष्टार्थनाशकः ॥ आगमे स्वल्प शांतो सौ शांते प्रश्ने

द्विपर्ययः ॥ १५ ॥ शांते प्रश्ने तथा दीप्ते प्रत्यस्थाने शुभो रवः ॥ प्रश्नरूपं फलं दत्ते गमे वागमे=
पि वा ॥ १६ ॥ शांते प्रश्ने स्वरो दुष्टो प्रत्यस्थो मृत्युदायकः ॥ दीप्ते वासौ प्रियं दत्ते प्रवृत्तौ च निव
र्त्तने ॥ १७ ॥ सव्यापसव्यभागेषु समकालं स्वरान् यदि ॥ कुरुते पोतकीयुग्मं तोरणं तत्प्रकथ्यते ॥
१८ ॥ पुरःपृष्ठैः स्थितैः शब्दैर्दंडसंज्ञाप्रकीर्तिता ॥ कोणस्थपरिघो ज्ञेयो गमे वागमने पि वा ॥ १९ ॥ शांते
प्रश्ने फलं शांतं स्वरे स्तोरणसंज्ञके ॥ दुष्टं परिघदंडेषु दीप्ते प्रश्ने विपर्ययः ॥ २० ॥ सविसर्गो बिंदु
युक्ता वर्धाजन्यिता स्वराः ॥ दुष्टा तिदुष्टं वं ध्यास्ते विज्ञातव्याक्रमाद्दमि ॥ २१ ॥ आर्त्ती मर्त्तातुरा
भीता रुक्षा नष्टाश्च जर्जरा ॥ हीना हीना प्लुताषंडा एते दुष्टस्वरा मताः ॥ २२ ॥ आर्त्तौ कार्यवि
नाशः स्यान्मत्ते हान्यातुरे गमः ॥ भीते भीते रुजा रुक्षे कष्टं जर्ज्जरे नष्टयोः ॥ २३ ॥ हीने हीन
फलं प्रोक्तं दीने भिक्षाटनं मतं ॥ प्लुवे शोकः क्षयः षंडे क्षीतियोगे महाभयं ॥ २४ ॥ एते स्वरास्व

स्वरोदय पक्षस्था प्रशांते स्वफलस्यार्थदाः॥ पुर्णफला स्वीपक्षस्थाः दीप्ते प्रश्ने द्विपर्ययः॥२५॥प्रश्ना
त्प्राक्पान्स्वरान्ब्रूते क्षेत्रमध्ये वराह्निका॥आकस्मिकं फलं तेषां ज्ञेयं शाकुनवदिभिः॥२६॥
२४१ समासन्ने स्वरो जाते समासन्नफलं वदेत्॥दूरस्थो चिरकाले शां—जाः शांतस्वरेण वत्॥२७॥
क्षेत्रबाह्ये स्वरान्ब्रूते श्यामासान्यफलप्रदो॥स्वपक्षस्थैः शुभं कार्यं विपक्षस्थे विरूपकं॥२८
॥एवं क्षेत्रसमाख्यातो दुर्गो स्वरविनिर्णयं॥अतो यात्राप्रवेशेषु कथिते च शुभाशुभं॥२९॥स्व
रजं यत्फलं प्राक्तं क्षेत्रे प्रवृत्तिजं मया॥यात्रायातफलं प्रात्यं प्रवेशे तु निजं निजं॥३०॥गमेवा राम
मस्वरो भव्यः पृष्ठे पृष्ठफलप्रदः॥दक्षिणे भयरो ज्ञेयो निषेधं कुरुते ग्रहः॥३१॥सर्वसिद्धि २४१
प्रदो ज्ञेयः प्रवेशे दक्षिणस्वरः॥वामे हानिः सुखं चाग्रे पृष्ठे दुष्फलप्रदः॥३२॥विवादे विग्र
हे युते भये भंगे महाहवे॥दक्षिणेग्रस्वरो भव्यो वामपृष्ठे न शोभनः॥३३॥दूरे युद्धे शुभो ज्ञे

यो वामपृष्ठे स्थितो ध्रुवं॥समासन्ने रणे ग्राह्यो दक्षिणाग्रे स्वरः सदाः॥३४॥पृथ्वी चारुणवह्निवा
युगगनं प्राक्पंचभूतान्क्रमान्तत्स्योच्चारवशात्वीभेददशकं तेषां फले तो कारणं॥भेदानां
प्रतिभेदरावजफलं जानाति यो देशकः सर्वे सत्स्य समो विचारविषये दुर्गो रुत निश्चितं॥३५
॥इति स्वरप्रकरणं॥प्रोक्तोयं ब्रह्मणा गोले सूर्येण भ्रमणं क्रमात्॥तदहं संप्रवक्ष्यामि दिग्भे
दं शाकुने मतो॥३६॥रजन्यं तर्द्धयामादि यावद्यामार्द्धके दिने॥एवं पौंदयो भानुपूर्वाद्यष्टदि
शो भ्रमेत्॥३७॥दिनरात्रिप्रमाणेन याममानं तु दुष्ट तद्भवेत्॥तन्मानेन भ्रमेद्भानुर्दिशो
ष्टौ प्रहराष्टके॥३८॥ ः ज्वालिनि सूर्यसंयुक्ताद्गम्या यारविणोज्झिता॥गम्या धूमवती ज्ञे
याति स्तोदीप्तां इमा दिशः॥३९॥ताभ्यः पंचमिकास्ता या शांतास्ते स्वः प्रकीर्त्तिताः॥शेषदि
शाद्वयं मिश्रं यथासन्नस्वभावकं॥४०॥विषुवत्संस्थिते सूर्ये ज्वालिनी वासवी दिशा॥द

स्वरोदय ग्धा शांशांकरी ज्ञेया धूमिता पावकी मता ॥४१॥ कर्काद्यंशगते सूर्ये ज्वालिनी पूर्वस्य दिशा ॥ दग्धा
सोमदिशा ज्ञेया शंकासा धूमिता तदा ॥४२॥ मकराद्यंशके सूर्ये पावकी ज्वालिनी भवेत् ॥ सह
२४२ स्राक्ष दिशा दग्धा यमाशा धूमिता भवेत् ॥४३॥ वासरांत्यंशभागे च निशाद्यप्रहरार्द्धके ॥ ज्व
लत्यापि गता गंम्या दग्धा धूमवती दिशा ॥४४॥ अशुभास्तु दिशो दीप्ताः शुभाः शांताः प्रकीर्तिताः
यद्दिशा द्वितयं मिश्रं यथासंन्नफलं च यत् ॥४५॥ ज्वलितादष्टकाष्ठानां प्रमाणार्थं भणाम्यहं
सूर्यचारवशाच्चक्रं दिग्विशेषविभेदकं ॥४६॥ चतुरस्रं भवेच्चक्रं मध्येष्टदिग्विभेदकं ॥ सप्तस राम
प्तलिखेद्रेखास्तत्र बद्धास्त्वेदिक्चतुष्टये ॥४७॥ चक्रबाह्ये भवेत्येवं समस्तत्र समन्विताः ॥ भागरेखां २४२
तरालस्थाश्चतुर्विंशतिसंख्यया ॥४८॥ दिक्प्राच्यं सप्तरेखासु स्थाप्या द्वादशराशयः ॥
कर्कादिमिथुनांताः स्युर्दक्षिणोत्तरमार्गगाः ॥४९॥ द्विपु स्यान्मध्यरेखायां तुलमेषाघवास

रे ॥ भवेदीशाननेरेखांतः कर्काद्य दक्षिणायनं ॥५०॥ भवत्याग्नेयरेखांतो मकराद्युत्तरायनं ॥ ए
वं तच्छेषरेखासु राशीनां स्याद्द्विकं द्विकं ॥५१॥ रेखारेखांतराले च त्रिंशद्भान्प्रकल्पयेत् ॥ राशि
त्रिंशद्विभागश्च चक्रदिग्भागभोजकाः ॥५२॥ भागो नवतिसंख्यैस्तैर्दिगेकैका भवेदिह ॥ त
दर्द्धो शदिशार्द्धो स्यात्त्रिभागत्रिंदेशो शके: ॥५३॥ कुंभार्द्धे पश्चिमं मीनमेषो वृषादिमंडलं ॥
एवं प्राचीनवत्यंशो भानंबुत्तरचारिणी ॥५४॥ वृषार्द्धमश्चिमं कामं कर्कौ सिंहादिमंडलं ॥ ए
वं नवतिसंख्याशे ज्ञायते शांकरी दिशा ॥५५॥ सिंहार्द्धे पश्चिमं कंन्या तुलवृश्चिकप्राकृ वृ=
लं ॥ पुनः प्राचीभवत्येतैः सूर्यदक्षिणचारिणि ॥५६॥ वृश्चिकार्द्धात्तदलं चापमंगो कुंभादिमंडलं
दिशाग्नेयी भवत्येतर्भागैर्नवतिसंख्यकेः ॥५७॥ एवं राशिवशाज्ज्ञानुयेत्रस्यात्त्रिंशदंश
केः ॥ ततः पूर्वीशपृष्ठं स्यात् देहेत्यं चाभिसंख्यया ॥५८॥ ज्वलन्पृष्ठं शपृष्ठस्थाद्ग्धांशात्सां

स्वरोदय कसंख्यया॥ज्वलत्पूर्वा शकाः पश्चात्तु न च संज्ञाश्च धूमिताः॥५९॥यद्दिने यत्र राश्यंशे
विषुवादौ स्थितो भवेत्॥उदयादित दंशादि सति रव्येन भास्करः॥६०॥युराशिमानात्योयाम
२४२ कलापलमयं च तत्॥नवत्याप्तपलात् भुक्तिरेकैकं सस्य जायते॥६१॥एवं यामवशाद्भानुर्यत्र
कोष्टे शके स्थितः॥तत्रोक्ता शकमानेन दिक् ज्वाला दग्ध धूमिताः॥६२॥चक्रमध्ये भवेन्मे
रुः सूर्यस्तस्य प्रदक्षिणं॥भ्रमन्नहर्निशं भुंक्ते दिशो ष्टौ प्रहराष्टके॥६३॥अन्योन्य मार्गचा
रेण भानुर्याति दिने दिने॥एवं भवति मार्गाणां अशीत्या संयुतं शतं॥६४॥तद्दिने मार्गतो ग गम
त्वा र विर्यस्यां दिशि स्थितः॥ततः प्रभृति नामानि विज्ञेयानि दिशाष्टके॥६५॥ज्वलिता धू
मिता छाया जला कर्दमिता धरा॥भस्मांगारवति ज्ञेया सूर्यभुक्तादिशि क्रमात्॥६६॥वधं
बंधं सुखं राज्यं लाभं क्षेमभयं रुजं॥ज्वलिताद्यासु का ष्टास फलं स्यात् शकनोदये॥६७

ज्वलितादि दिशौ कैका त्रिधा ज्ञेया क्रमेण तु॥तासां नामानि वक्ष्येहं चतुर्विंशति संख्यया॥६८
॥ज्वलिता ज्वालिनी ज्वाला चैवं प्रज्वालिनी त्रिधा॥संधुक्षिता व धूमांधा धूमिनी च त्रिधा परा
॥६९॥छाया मिश्रा च शुभ्रा च त्रिधा छायादि शामता॥शीतला हिमकी चैव तुषारी च जला त्रिधा॥७०
॥गुंडुला च कला पंका चेति कर्दमिता त्रयं॥सस्नेहा शाड्वला शोषा चैवं तु त्रिविधा धरा॥७१॥
रेणुश्च भस्म तापः स्यादिति भस्मान्विता त्रिकं॥दग्धा च दहनी दाघी चैव मंगारिणी त्रिधा॥७२॥
चतुर्विंशति नामानी प्रोक्तानि च क्रमेण तु॥पृथक् पृथक् फलं तासां वक्ष्यते शकुनोदये॥७३॥
घातं मृत्युं रुजं च व बंधनं हानि विभ्रमं॥मोहं चैव सुखं लाभं धनाप्ते राज मुन्नतिं॥७४॥अभिषे
कं तथा राज प्रसादं पुत्र संपदं॥स्त्रीलाभं भोग वृद्धिश्च विदेशं निग्रहं तथा॥७५॥भंगं चैव तथा
कष्टं संतापं शोकमेव च॥प्राप्नुवंति क्रमादेवं शकुनात्मानवाः फलं॥७६॥प्रोक्तं यत्प्रहराष्ट

स्वरोदय केरविवशाद्दग्धादिकाष्टकं तस्यैकैकदशा त्रिधा क्रमवशाद्भेदाश्चतुर्विंशतिः ॥ तेषां नाम
निदानेभावजफलं विंदंति ये शाकुने ते जानंति फलस्य तस्य विवरं हालाहलं चामृतं ॥७७॥
२४४ ॥ इति दिशाप्रकरणं समाप्तं ॥ पूर्वेस्थानं त्रिधाप्रोक्तं यन्मया शास्त्रसंग्रहे ॥ अधुना तत्प्रवक्ष्
यामि श्यामाविस्थानकारणं ॥७८॥ शुभाशुभप्रदत्वेन द्विविधं तत्प्रजायते ॥ यत्शुभ
दं तयोर्मध्ये प्रथमं तद्रुणाम्यहं ॥७९॥ प्रासादः पर्वतो हर्म्यं प्राकारो मंदिरं मठः ॥ यंत्रिका
द्दालक यत्रं प्रतोलि विथावेश्मकं ॥८०॥ सत्रागारं प्रपा गोष्टं गोगृहं नव्यगोमयं ॥ कोष्टा- राम
गारगृहं कोशं टंकशाला घरीगृहं ॥८१॥ हस्तिस्तंभकुटी शय्याहयानां मोलिकालयं ॥ सिं २५४
हद्वारं ध्वजा छत्रं तोरणं स्तंभमंडपं ॥८२॥ रथनिश्रेणिका पोतं सिंहासनसुखासनं ॥
शय्यादः चोलकः पटः शस्त्रवस्त्रे दृढं शुभं ॥८३॥ संपूज्यं प्रतिमालिंगं वापिकूपसरोवरं

पादावर्त्तं घरीयंत्रं निकीका बहुकुंडिकाः ॥८४॥ मद्रां उधान्यमधांबु स्नेहतक्राम्लपूरितं ॥
कलशं वेदिका भांडं सिद्धान्नसहितं सतं ॥८५॥ रजितारं जितारस्या सोछाया साड्डला घरा ॥
संपूर्णं द्वारशीला वाल्याकणसिद्धान्नसंचयं ॥८६॥ वेदिका सातिकं कुंडलं स्वस्तिकासितः ॥
स्थंडिलं श्रीगलं रम्यं शांतियज्ञार्थमंडलं ॥८७॥ ससस्यं रम्यलकं क्षेत्रं शाड्डला रामवाटिका ॥
अनविंल्यं फलं पुष्पं पत्रं शाखाग्रपल्लवं ॥८८॥ क्षीरवृक्षस्तथा चान्यः स्वाद्यपुष्पः फलान्वितः ॥
सुखादः शाड्डला स्निग्धः सर्वोपद्रवविर्जितः ॥८९॥ सजीवा गोवृषछागहस्त्यश्वा मृगरोहितौ
पोतिपत्तोर्णयोर्वस्त्रमुर्णायाकं वल्कं तथा ॥९०॥ व्याघ्रस्य द्वीपिनश्चर्ममृगचर्मस्तथैव च ॥ चम
रो हस्तिदंतश्च शंखशुक्तिः कपर्दिका ॥९१॥ सन्नाह शुभदानां च गजानां वाजिनां तथा ॥ यु
द्धारं भोरणस्तंभ पर्याणं वाजिनां तथा ॥९२॥ फलकं धनुषं घं दामुरजो वाद्य भेरिका ॥ वी

स्वरोदय वकं काहलारक्ता गजको स्ये गजांकुशः ॥९३॥ अष्टाविंशशते शांत स्थानानं कीर्तितं म
या ॥ नामतोथ प्रवक्ष्यामि प्रत्येकं तत्फलं शुभं ॥९४॥ प्रासादस्थो श्रियं दत्ते पर्वतस्था कुलो
२४५ न्नति ॥ हर्म्यस्था हर्म्यलाभाय प्राकारे पुरसौख्यदा ॥९५॥ मंदिरे पुरलाभाय मठे धर्मानुगं पदं
टिंकुल्यामुन्नतिं दत्ते तंत्र महालके स्थितः ॥९६॥ यंत्रस्था विग्रहाल्लाभं मतोल्यां गरलाभ
दा विद्याधर्यो श्रियं दत्ते सत्रागारे सुशोभनं ॥९७॥ प्रपायां वृष्टिकृज्ज्ञेया गोष्ठे गोष्ठाधिप
स्पदा ॥ विद्याधैर्ये श्रियं दत्ते सत्रागारे सुशोभने ॥९८॥ प्रपायां वृष्टिकृत् ज्ञेया गोष्ठे गोष्ठा राम
धिपत्यदा ॥ गोगृहे गोधनं दत्ते संपदं न व्यगोमये ॥९९॥ गोष्ठागारगृहे धान्यं कोशस्था कोश २४५
लाभदा ॥ टंकशाला श्रिता वित्तं नृपालाभं चरीगृहे ॥१००॥ हस्तिस्तंभे महाश्वं राज्यं ह
स्तिकुरस्थिता ॥ हस्तिशय्या स्थिता भूमी मश्वमूर्ति स्थिता श्रियं ॥१॥ ददत्ते ऽश्वान् अश्वसा

ला स्था सिंहद्वारे महाश्रितं ॥ ध्वजायमुन्नतिं दत्ते छत्रस्था छत्रलाभदा ॥२॥ तोरणे दक्षिणे
स्तंभे पुत्रलाभकरी भवेत् ॥ वामे कन्याप्रदो दृवी मध्यस्था राज्यलाभदा ॥३॥ स्तंभस्था स्नान
लाभाय मंडले पर्वसौख्यदा ॥ रथे मार्गो हृदे लाभं स्त्री तोनिःश्रेणिका स्थिता ॥४॥ पोतस्थ
।सागराल्लाभं राज्यं सिंहासन स्थिता ॥ सुखासने महावृद्धिः शय्यास्था सर्वसौख्यदा ॥५॥
स्त्री क्रीडां दोलके दत्ते पदे पद्माभिषेचनं ॥ शस्त्रे संग्राम तो जातो वस्त्रे वस्त्राभिरुचिका ॥६॥
प्रतिमास्था निवेलाभं लिंगे लाभं नृपात्पुनः ॥ वापिस्था नकुलालाभं कूपस्था स्वकुले द्रुवं
७॥ आवाहस्थापनं ग्राम्यं स्त्री लाभं कुटिका स्थिता ॥ अप्रमेम न्मये भांडे विज्ञेयं वस्तुतः फलं
८॥ तडागे देशजं लाभं पादावर्त्तो पदे द्रुवं ॥ घटियंत्रे पदं मान्यं नीकायं तु जलो द्भवं ॥९॥ धा
न्यदा धान्यभांडस्था मध्यभांडे सुसिद्धिदा ॥ जल भांडे सुखं दत्ते मिविष्टी तैलभांडके ॥१०॥ घ

स्वरोदय देदुग्धेश्रियंदत्तेवांछितंदधिभांडके ॥ तक्रभांडेगवांलाभंमैश्वर्यंमारनालके ॥११॥ कलशे
पुत्रलाभायविवाहेविदिभांडके ॥ सिद्धान्नभांडकेलक्ष्मीमंगल्यंश्वेतभांडके ॥१२॥ रचिता
२४६ भूमिमंत्रिलंदत्तेराज्यंपुरंजिता ॥ रश्माभूदेशलाभायसौख्यानुकूलोन्नति ॥१३॥ शाद्वला
संपदंदत्तेपूर्णेष्टाकर्मजंफलं ॥ अत्यान्याचशिलास्थानेकर्णाप्तेकणसंचये ॥१४॥ सिद्धान्न
संचयेभोज्यंवेदिकायांचभोगदा ॥ शांतिकुंडेनिराशायमंडलेमंडलप्रदा ॥१५॥ सितस्वस्ति
कगासौख्यंस्थंडिलेस्थावरंपदं ॥ रम्यप्राणगत्वाचित्तंजयंयज्ञार्थमंडपे ॥१६॥ ससस्यखल राम
केक्षेत्रेसपितोलभमादिशत् ॥ शाद्वलासमवायोक्तनानाभोगप्रदाभवेत् ॥१७॥ अविनष्टे २४६
फलेराज्यंपुष्पमिश्रंपदंवदेत् ॥ पत्रेपदातिगाज्ञेयाशाखायांगोत्रवृद्धिदा ॥१८॥ पल्लवेपुत्र
लाभायक्षीरवृक्षेमहापदं ॥ खाद्यवृक्षेधृतिंदत्तेपुष्पाद्येवांछितंपदं ॥१९॥ फलाटेभूरि

लाभायसुस्वादेचतथासुखं ॥ शाद्वलेसंततिदत्तेस्निग्धेगोत्रसुखप्रदा ॥२०॥ सर्वकार्याणि
सिध्यंतिसर्वोपद्रववर्जितो ॥ गोपृष्ठेभूमिलाभायवत्सस्थाचालाभप्रदा ॥२१॥ छागस्था
छागतोलाभंगजस्थागजदामता ॥ अश्वस्थाहयनाथत्वंव्याघ्रेशत्वंमृगस्थिता ॥२२॥
रोहितस्थाधनेशत्वंपातिवस्त्रगतासुखं ॥ पट्टवस्त्रेश्रियंदत्तेउजलाभंकंबलस्थिता ॥
२३॥ दत्तेरौद्रपदंव्याघ्रद्वीपिनोश्चर्मणिस्थिता ॥ मृगचर्मस्थिताशांतिच मेरराज्यलाभप्र
दा ॥२४॥ हस्तिदंतेजयंदत्तेशंखेलक्ष्मीप्रयच्छति ॥ शुक्तिस्थायोषितांलाभंद्रव्यलाभं
वपर्दके ॥२५॥ स्थितानाचनरसन्नाहेजयंदत्तेनराहवान् ॥ रायुंजोधातुजयंराज्यंहस्ती
रन्नाहसंस्थिता ॥२६॥ विजयंधाटिसंग्रामादससन्नाहसंस्थिता ॥ युद्धालंबेस्थितायु
नेसर्वसीमालसाधनं ॥२७॥ रणस्तभोमहाघोराक्रंग्रामाद्विजयंभवेत् ॥ पर्याणेगोग्र

स्वरोदय हालाभं शत्रुतफलका युधे॥२८॥धनुषि राज्यदा देवी चटायां विजयप्रदा॥गुरुजेमासनं
सौख्यं भेरिकायां महोत्सवं॥२९॥त्रांबके च कं वर्त्तिनादत्ते शत्रुवधाद्धणे॥काहलायां
२४७ फवेर्युद्धात्तु जयं दत्ते न संशयः॥३०॥टंकायां विजयं दत्ते गजाश्वे गजको पके॥सप्तांगरा
ज्यदा दुर्गो चोषविश्नगजांकुशे॥३१॥इति शुभाशुभस्थानानि॥शांतस्थानानि सर्वाणि प्रो
क्तानि सफलानि च दीप्तस्थानि यान्यत्र ताभ्य धूना प्रवच्म्य हं॥३२॥करंकशवचर्मास्थिकपालं
केशपिछकं॥खुरं शृंगं न खं दंष्ट्रा वसामं संच लोहितं॥३३॥विष्टा वा तिर्मलं भूत्रं लद्दिका शु राम
ष्कगोमयं॥सजीवं गर्द्दभो ष्ट्रं च श्वानसैरीभसूकरं॥३४॥भूर्दग्धा ध्वसिता निधा कर्करा ध्या २४७
सकंटका॥कुषरा विषमा वक्रा दुष्प्रवेशा सकर्द्दमा॥३५॥विवरं कौटरं गर्त्तं गुहा श्मशान खा
लकं॥वल्मिकं कर्द्दमं रज्जिपिक्का खंडाश्मकर्करा॥३६॥भस्मांगार चिता चूल्लि होमकुंडमहा

नसं॥उल्मुकं तपनी देवि चाग्निहोत्रद्विजालयं॥३७॥रिक्तभग्नानि भांडानि निद्यवस्तुयुता
नि च॥उछिष्टप्रेतभूमिष्टं कर्परं पादसौचकं॥३८॥चर्मजं जलभांडं च पादुकोपानहौ तथा॥
मूशलोलूखलः सूर्यवर्द्धनी लोष्टकः शिलाः॥३९॥वृक्षः सकंटकः शुष्को भग्नो न्मुल्लिन
छदितः॥शाशिल्पो द्घटितो जीर्णो दग्धपुष्पफलोज्झितः॥४०॥अश्वाद्यकटुकश्चोग्रसः वृक्षाः
शुषिरः छशाः॥अकालफलदो वंध्यो दुष्टपक्षिसमाकुलः॥४१॥शुष्कं पुष्पं फलं पत्रलतामुला
ग्रपल्लवाः॥कंदं वल्ली तृणं काष्टं निर्माल्यावष्करं तुषा४२॥कर्पासकर्परं जीर्णं गाणिखंडं
चितापटः॥वरत्रा वल्कलं चौर्णाकंबलं चौष्टरोमजं॥४३॥त्रिशूलं किलकं शूलि चितास्तं
भचिताध्वजः॥प्रेतभूस्थंडिलं छत्रं देवदेवाडयं गृहं॥४४॥गरुडयंकरवडं चैव मल्लाखडकस्त
तलं॥भटास्तं भानगायुञ्च दग्धं भग्नभयावहं॥४५॥प्ररग्धं कटकावासं चान्यदप्यस्तिरंत

स्वरोदय थाः ॥ सद्योविनासलिलं च स्थानं च क्षणिके तथा ॥४६॥ स्थानान्येतानि सर्वाणि दीप्तानि
कथितानि च ॥ शांते शांतं शुभं स्थानं दीप्ते प्रश्ने विपर्ययः ॥४७॥ करंके देशनाशाय सचेराज
२४८ क्षयंकरी ॥ रुक्चर्मण्यस्थिगा मृत्युः कपाले विद्रुरं वदेत् ॥४८॥ केशस्था कलहं दत्ते पिच्छ
स्था शत्रुतो भयं ॥ खुरि जिवानू खूरे हंति शृंगस्था शृंगिणस्तथा ॥४९॥ नखस्था नखिनो
हंति दंष्ट्रायां दंष्ट्रिणस्तथा ॥ वालायां रोगदा देवी मांसे भूर्निःस्वदा मता ॥५०॥ शोणिते
संगरा मृत्युं विष्टायां च विघातथा ॥ वांति स्थामस्करा ते यामलेमानस्यंकरी ॥५१॥ मूत्रे राम
हानिप्रदा देविलाद्दि कायां महद्भयं ॥ शुष्कगोमयगो रोगं खरस्था बंधनं वदेत् ॥५२॥ विदेश २४८
गमनं मुष्टाश्वस्था शुद्धा स्मृतिं रुजं ॥ महिषेकोडदग्धो वशोरवह्निभयंक्रमात् ॥५३॥ ध्वं
सितायां क्षयं दत्ते निंद्याते च क्षयंकरी ॥ कर्करा स्या क्षयं दत्ते कंरकाट्यां वियोगदा ॥५४॥ ऊ

MEMORIAL

खरायां फलं नास्ति विषमायां भयं वदेत् ॥ वक्रायां शत्रुतो हानिः राधद्दा दुम शगा ॥५५॥ कर्दमस्था
जलाद्भीतिं विवरस्था महद्भयं ॥ कोरस्था कुलोच्छेदं गर्त्तायां विग्रहं वदेत् ॥५६॥ गुहायां गुप्ति
वासं च प्रनाले प्रपलायनं ॥ खालस्थिता वदेद्रोगं वल्मीके प्राणसंशयं ॥५७॥ कर्दमे कुरु
ते रोगं रज्जुस्था बंधनं वदेत् ॥ इष्टका खंडके शंका पाषाणे कार्यनाशनं ॥५८॥ कर्करायां म
नोभ्रंशो भस्मस्था शोकदा मता ॥ अंगारस्था वदेन्मृत्युं चितायां गोत्रदाहदा ॥५९॥ चुल्लि-
स्था दीपनं गेहे होमकुंडे वधं वदेत् ॥ महासने महाहानिं मरणं चोल्मुके स्थिता ॥६०॥ तपति-
स्था वदेत् कष्टं दीपिकायां मसौख्यदा ॥ अग्निहोत्रीगृहे शोकं रिक्तभांडे तिदुष्टदा ॥६१॥ भग्नभां
डे फलं भ्रंशं निधवस्तु फलं रुजं ॥ उच्छिष्टभांडके भिति प्रेतभुजांडके मृतं ॥६२॥ ददातिकर्म रेक
ष्ट मसौख्यं पादशौचके चर्मणस्तोयभांडे तु कायक्लेशं भयं च ति ॥६३॥ वृथा मार्गाटनं त्रूते पा

स्वरोदय दुःकोपनहोस्थिता॥उखलस्थावदेत्तथातंमुसलेमानमर्दनं॥६४॥सूर्यस्थाबंधनंदत्तेदारिद्रं
मार्जनिस्थिता॥लोष्टकाश्मभ्रमणंदत्तेशिलायांसपदक्षयं॥६५॥वृक्षेसकंटकेसंस्थाशत्रुपक्षा
२४९ त्भयंकरी॥शुष्केशुषहराज्ञेयाभग्नस्थाकीर्तिभ्रंशदा॥६६॥उन्मूलितद्रुमेमृत्युंछिन्नेछेदकरी
नृणां॥सशल्येक्लेशदाज्ञेयाकरितास्थाफलोज्झिता॥६७॥जीर्णवृक्षस्थितादेवीचीरकालाल
भितिदा॥दग्धास्थावह्नितोहाविपुष्पेमध्यमंफलं॥६८॥विपुलेतुस्थलाभायःअखायेताद
र्शफलं॥कटकास्थाकलिभूतेउग्रेरौद्रफलप्रदा॥६९॥सव्रणेव्रणदादेवीशुषिराछ्येविघात राम
दा॥क्रूशेकिंचित्फलंदत्तेअकालफलदेभयं॥७०॥वंध्येवध्यफलाज्ञेयादुष्टपक्षारुजारुजं २४९
॥शुष्कपुष्पेस्थिताहानिंफलेपुष्पेफलक्षयं॥७१॥शुष्कपत्रेविपात्रत्वंशुष्कायांत्वचिरुक्रुजं॥
शुष्कमुलेतुनिर्मुलंशुष्काग्रपल्लवेक्षयं॥७२॥कंटस्थाकुरुतेकष्टंवल्लिस्थाबंधनप्रियां॥तृण=

स्थालाघवंदत्तेशुष्केकाष्ठेभयावहा॥७३॥निर्माल्येसंस्थितारोगंनिःश्रीलंवल्करेस्थिता॥दुर्भिक्षं
तुस्वसंस्थायांकर्पासस्थाभयावहा॥७४॥नग्नत्वंजीर्णवस्त्रेत्वागोणिखंडेतथैवच॥चितावस्त्रेकु
लेछेदंवरत्रायांचरंघनं॥७५॥वल्कलेकार्यनाशस्यात्सरज्वलत्तथोर्णगा॥उष्ट्रोर्णकंबलेरोगंनिभू
लेतस्कराद्भयं॥७६॥कीलकस्थारिवोमृत्युंशुल्पांराज्यकुलाद्भयं॥चितास्तंभेमहाव्याधंमहाशोकं
चिताध्वजे॥७७॥प्रेतभूस्थंडिलेमृत्युंसंतापंप्रेतछत्रगा॥चितालिंगेस्थिताहानिंचितादेवालयभयं
॥७८॥चितागेहेगृहभ्रंशंलोष्टकुटेक्षयंवदेत्॥अश्मकोटेफलाभावंवियोगेतृणसंचये॥७९॥का
ष्ठसंचयगाःक्लेशमस्थिसंचयगामृतिं॥रजाकालायकूटस्थामानभ्रंशंमहाभयं॥८०॥धापण
कस्थाकुलोछेदंवित्तनाशंवृतिस्थिता॥गरुडपंकखलेमल्लाखटकेसमरंवदेत्॥८१॥भरस्थं
भेस्थिताशोकंदग्धचैत्येसंस्थिताक्षयं॥भग्नोच्चस्थानगापातंभयंगेतुभयावहे॥८२॥संस्थि

स्वरोदय ताशिखिकावासेमहाविघ्नप्रदा खगी॥ अस्तस्पतारकीत्तियास्थानेष्वस्थायिषुस्थिता॥ ८३॥ सद्यो
विनाशिवस्तुस्थासद्योविघ्नकरीमता॥ क्षणिकं फलमाचष्टेस्थानेषु क्षणिकेषु च॥ ८४॥ दग्धाभूः
२५० शाद्वलाकिंचित्शाद्वलादग्धिकाथवा॥ वृक्षोनीलः शुष्कशाखः शुष्कशाखाग्रपल्लवः॥ ८५॥
एकत्रस्तंभवेत्तत्रस्थानद्वयंशुभाशुभं॥ अधऊर्ध्वस्थितं वा च्यपृष्टाग्रेसंस्थितं तु वा॥ ८६॥ एवं-
ध्यादीभवं मिश्रंस्थानं मिश्रं प्रजायते॥ तत्र ध्यादिफलं देयंस्थानमानानुमानतः॥ ८७॥ स्थानेद्वि
त्रिविमिश्रेपियत्रभागेस्थिता खगी॥ तत्फलमधिकंज्ञेयं हत्वा सर्वं विमिश्रकं॥ ८८॥ शांताशां राम
तविमिश्ररूपकतथास्थानानिचैवं त्रिधा प्रोक्तानि स्वफलानि तानि विधिनानान्यत्र शास्त्रे २५०
मया॥ प्रत्येकं विविधानि तानि विबुधाः स्पष्टानि जानंति येनेविंदंतिपरिस्फुटं स्थितिफलं स्या
मारूतेनिश्चितं॥ ८९॥ इति स्थानप्रकरणं॥ त्रिधाभावोरव्यातः शास्त्रे संप्रहृष्टेणमया॥ अधूनां

संप्रवक्ष्यामिभेदभिन्नाफलान्वितं॥ ९०॥ भावशांतस्तथादीप्तोमिश्रभावस्तृतीयकः॥ सत्वंरज-
तमश्चैवंविज्ञयापोतकीर्तिता॥ ९१॥ भावशांतस्तथादीप्तोभेदैरष्टादशोक्रमात्॥ एवंषट्त्रिंश
तान्भेदान्भावद्विल्वेवदाम्यहं॥ ९२॥ तद्वद्वंमिश्रकेज्ञातेमिश्रभावस्तृतीयके॥ योगजंकर्म
जंतच्चप्रवक्ष्यामिक्रमादहं॥ ९३॥ उत्साहः सन्मुखित्वं च सन्मुखित्वं शुभवीक्षणं॥ उत्फुल्ला-
स्यप्रसंनत्वंरोमांचोनर्तनंध्वतिः॥ ९४॥ उदार्यस्थिरताधैर्यप्रकटत्वंसकामता॥ उद्यमः खेलनं
प्राप्तिः उच्चाश्रयसुनादता॥ ९५॥ एभिरष्टादशोभेदैर्भावशांतोभिधीयते॥ शुभोसौशोभनः
कार्येदिष्टेदिष्टप्रदोमतः॥ ९६॥ पराङ्मुखत्वं संकोचोमुखबंधोऽधरक्षणं॥ वैकल्यंदैन्यतानि
द्रानासस्वासोविवेष्टता॥ ९७॥ वियोगोविस्वरत्वंचनीचस्थानाश्रयस्थिता॥ अधःपातोंगभंग-
श्च कंपनं धूननं भयं॥ ९८॥ एभिरष्टादशैर्भेदैर्भावोदीप्तोभिधीयते॥ दुष्टोसौशोभनः कार्येदि

स्वरोदय प्रेदिप्रविनाशकः॥९९॥कार्याच्च ध्यादिकं भावं भावमिश्रककोमतः॥सतुयोगक्रमाभ्यां हियोग
जक्रमजो द्विधा॥७००॥मित्रकेयोगजे मिश्रं फलं योगेन जायते॥ क्रमजे तु क्रमेणैव फलं
२५१ ज्ञेयं विचक्षणैः॥१॥येनयेनप्रकारेण गताद्यं कुरुते खगाः॥तेनतेन च भावेन फलदाना त्र सं
शयः॥२॥भावेऽष्टादशशोभने निगदिता भेदास्तथा शोभनेत ध्यादेरथ मिश्रक प्रकटितो=
भावो द्विभेदो मया॥शांताशांत विमिश्र भाववशगं यस्मात्फलं जायते तद्भावेषु विमर्शनं
फलविधौ कार्यं सदादेशकैः॥३॥इति भावप्रकरणं॥त्रिप्रकारसमाख्यातः शास्त्रारंभो राम
क्रमो मया॥सांप्रतं तं प्रवक्ष्यामि फलस्य क्रमबोधनं॥४॥आदिमध्यावसाने च त्रिप्रकारक्र २५१
मो भवेत्॥येन स्यात्सकलस्तेन क्रमेण फलमादिशेत्॥५॥दर्शने चेष्टने गत्यां रावे भावे दिशा
स्थितौ॥क्रमोयमादिमध्यांतेतं सर्वत्र विचिंतयेत्॥६॥येनयेन क्रमेणैक जयं दत्ते धऽनुद्धरि

तेनतेनप्रकारेण फलं ज्ञेयं विचक्षणैः॥७॥आदिमध्यावसानस्थैर्वर्गैर्पुत्राक्षैतैर्नयैः॥यथान
रबलं तेषां फलं तन्मात्रकं स्मृतं॥८॥कुरुते यत्र तत्रैच भूरिस्तेषां जयं खगी॥तन्मात्रे तत्र तत्रैव तत्क्रमे
ण फलं वदेत्॥९॥एकोन योभवेद्यत्र गत्यादि भूरिसंख्यया॥एकरूपं फलं तत्र तत्संख्येन क्रमेण
च॥१०॥एकरूपं नयं यत्र कुरुते च शुभाशुभं॥क्रमेण येन तेनैव फलं दत्ते शुभाशुभं॥११॥मि
श्ररूपो नयो यत्र यत्क्रमेण प्रजायते॥तत्क्रमेण फलं मिश्रं तत्र तन्मानकं वदेत्॥१२॥नयंत
तु निर्णयं चैव क्रमं क्रमफलं तथा॥सर्वं विमिश्रयत्नेन फलं वाच्यं विचक्षणैः॥१३॥आशादर्शी
यतः स्वरात्प्रुतिफलं चेष्टा भवेत्कार्यफलतु प्राप्तिः स्यादिति तत्तथा स्वरवशात्स्थैर्यं सुखं दि
ग्वशात्॥भावाभाववशात्क्रमः क्रमवशाद्दित्यष्टभेदा फले तन्मध्येन यतोस्ति विविरं फलावदेत
त्फलं॥१४॥गुर्वाद्यं गुणपंचकं प्रथमतः पृष्ठा चतुष्कं ततः कालाद्यं क्रमसप्तकं च विमलं क्षेत्रे

स्वरोदय गमाद्यधिकं॥गत्याद्येनयसप्तकंचकेचमितितंपंचाधिकाविंशतिः सर्वसाकुनतत्वबोधजनकं
प्रोक्तंपुरोक्तंमया॥१५॥इतिक्रमः॥मिश्रकंसंप्रवक्ष्यामीयातकीनयसंभवं॥येनविज्ञायतेस
२५२ म्यक्फलंमिश्रंशुभाशुभं॥१६॥स्वरंकृत्वायदातारावामाचाग्रेतुमौनिकीनी॥तत्रपूर्णफलंद
त्तेशुभंवायदिवाशुभं॥१७॥कृत्वारावंयदायातिपुनरग्रेतुसस्वरा॥तदापूर्वस्वरंहंतिगतिरेका
फलप्रदा॥१८॥गतिंकृत्वास्वरंकुर्यात्स्वरंकृत्वाग्रगामिनि॥सास्खलितंफलंदत्तेचिरकालेनमि
श्रितं॥१९॥निस्वराकुरुतेयानंगत्वाग्रेसाचसुस्वरा॥किंचिदूनंफलंदत्तेचिरकालेनमिश्रितं॥ राम
२०॥गमनानंतरंशब्दात्करोतियदिपक्षिणि॥स्वरंगतिफलेहंतिपंचविंशतिसंख्यया॥२१॥ २५२
व्रजंतिकुरुतेशब्दात्शांतोतारार्द्धलाभदा॥वामाविनाशयेत्सर्वंदीप्तेप्येवंविपर्यये॥२२॥वामे
नष्टस्वराशामाशांतेक्षेमकरीमता॥दक्षिणेभयदाप्रोक्तादीप्तेशांतादिविपर्ययः॥२३॥वेष्टन

नस्वरान्शांतान्कृत्वाताराभवेद्यदि॥स्थानेचेष्टेशुभेचागेकुरुतेसामहाफला॥२४॥दी
प्तेचेष्टास्वरस्थाशांतकृत्वाभवतिवामगा॥स्वरहीनाभवेच्चाग्नेश्यामादुष्टस्वदामता॥२५॥भ
क्ष्यमुखीयदातारामौनिनिचाग्रतोभवेत्॥समिहितफलंदत्तेयांडवीसविशेषकं॥२६॥यदाभ
क्ष्यमुखीवासाजल्पंताश्रयतेतरुं॥तदादुर्गाफलंदत्तेकिंचिच्चापायसंयुतं॥२७॥स्त्रीकार्येष्व
स्यपग्रास्यंगतिरावंदिकूर्थनं॥स्थानंचेष्टातथाभावंक्रमश्चेतियथास्थितं॥२८॥ताराद्यानं
शिशुनीउकार्येचेष्टादिवृत्तौनिनदोवसंते॥दिक्दीप्तशांतागमनेप्रवेशेस्थानेकभावान्स्थि
तिरप्रणम्य॥२९॥यथाप्रवर्त्तंताक्षेत्रेभव्यचेष्टादियांडवि॥तथायानेप्रवेशेचनिवृत्तिसदृशा
शुभा॥३०॥समासन्नेरणेदुर्गाभ्यांधोनयवगाहने॥भयादौपोतकिंभव्यायात्राभावाद्विपर्य
ये॥३१॥विवाहादिषुकार्येषुस्वस्वभावेषुनिर्णयं॥कर्तव्यंशकुनाचार्यैर्ज्ञात्वाप्रश्नंचशाकुनं॥
३२॥

स्वरोदय इति मिश्रकं फलं ॥ वर्गद्वयं प्रवक्ष्यामि तारावामाभिधानकं ॥ येन संमिलितं सर्वं ज्ञायते च शुभाशु
भं ॥ ३३ ॥ कालो दिक्दर्शनं चेष्टारावो भावो गतिस्थिति ॥ शांतान्येतानि तारायाः स्ववर्गेतं विदुर्बु
२५३ धाः ॥ ३४ ॥ वामगायाः स्ववर्गे स्युर्दीप्तेरेतेश्च जायते ॥ एवं वर्गद्वयं ज्ञेयं पोतकी शकुनेक्षकैः ॥ ३५
शांते प्रश्ने फलं शांतं तारावर्गे प्रयच्छति ॥ वामवर्गो विनाशाय दिप्ते प्रश्ने विपर्ययः ॥ ३६ ॥ सं
जातो मिश्रके वर्गे शांताशांतस्वरूपके ॥ तद्विचार्य फलं मिश्रं वाच्यं शकुनवेदिभिः ॥ ३७ ॥
आदौ वर्गे स्वकं कृत्वा पश्चाद्गमनमेव चेत् ॥ पुनश्चायेत्स्ववर्गस्था श्यामा स्वगतिपोषिका ॥ ३८ राम
पूर्वं कुर्यात् स्ववर्गेत्या गत्यंते परवर्गकं ॥ वर्गेण निहते वर्गे सा ददाति गते फलं ॥ ३९ ॥ परवर्गे पु २५३
रा कृत्वा कुर्यात्स्ववर्गगत्यनंतरं ॥ वर्गे वर्गेण हत्वा सा गतिरेव फलप्रदा ॥ ४० ॥ अकस्मादेव
याति या गत्वाप्रे परवर्गका ॥ वर्गे व्यंगां गतिं कुर्यात् सामान्यल्पफलं वदेत् ॥ ४१ ॥ वर्गे कृत्वा

स्ववर्गं याति गत्वा प्येन ए पक्षिणी ॥ हत्वा गतिफलं सर्वं पूर्ववर्गफलप्रदा ॥ ४२ ॥ तावर्गोधिपो या
मया गवेगं सुतोरणे ॥ निवृत्तिसमये चैवं श्यामा वर्गद्वयं मतं ॥ ४३ ॥ तारावर्गाधिपश्चंद्रो वामा
वर्गाधिपो रविः ॥ चंद्रसूर्यप्रवाहेन ज्ञेयं वर्गो बलाबलं ॥ ४४ ॥ चंद्रवारे समुत्पन्ने तावर्गो बला
धिपः ॥ भानुवारोदये वामावर्गो ज्ञेयो बलोत्कटः ॥ ४५ ॥ उड्डीवा मायतो यातः शकुनश्चंद्रभाग
गः ॥ अधस्थो दक्षिणः पृष्ठः सूर्य वामे स्थितो मतः ॥ ४६ ॥ तारावामाभिवर्गेण ये जानंति पश्चि
तः ॥ ते वराहरुतं सर्वं निश्चिन्वंति शुभाशुभं ॥ ४७ ॥ इति तारावामावर्गः ॥ बिलपदं प्रवक्ष्यामि
दुर्गाज्ञानप्रकाशकं ॥ तोरणानि विनाय त्र क्रियते तत्र निर्णयः ॥ ४८ ॥ पृष्टश्चरति कृत्वा
प्रश्नं मनसि चिंतयेत् ॥ यत्र तत्र स्थिता देवी दृष्ट्वा तामधिवासयेत् ॥ ४९ ॥ दृष्टस्थानात्तु यावा
राक्रूज्वदि गतिभेदतः ॥ फलं गत्य तु मानेन एकद्वित्रिक्रमो बुनैः ॥ ५० ॥ एकताराफलंश्चा

स्वरोदय यो द्विताराद्वितये मतं ॥ तृतीया तृतीयाज्ञाने वामा तत्र निवर्तने ॥ ५१ ॥ यथा ताराः तथा वामा साल
म्या वाम गा यदि ॥ वामा ताराफलं ज्ञेयं यथा पूर्वं च साधितं ॥ ५२ ॥ स्थानं च चेष्टा स्वराक्रांता अथा
२५४ पूर्वं शुभाशुभं ॥ कथितं येन भावेन तं तथा च फलनिर्णयः ॥ ५३ ॥ शिरः पृष्ठदरे आनुमानेन त्रय
था क्रमं ॥ आदिमध्यावसाने च कर्तव्या कालनिर्णयः ॥ इति पातिस्तते विलपदं ॥ यथा प्रव
र्तितां क्षेत्रे भव्यचेष्टादिपांडवी ॥ तथा याने प्रवेशे च निवृत्तिस्सदृशी शुभा ॥ ५५ ॥ समासमैर
णे दुर्गे व्याधौ न धाव गाहने ॥ भयादौ पोतकी भव्या यात्राभावद्विपर्यये ॥ ५६ ॥ तिष्ठतां प्र राम
जतां वाथ विना प्रवेशनिर्गमौ ॥ अन्यचिंता भवेद्यासा दुर्गोकस्मिकसंज्ञका ॥ ५७ ॥ फलं त २५१
स्याः प्रवक्ष्यामि दिशा याम क्रमेण तु ॥ स्वरचेष्टा मुखस्थान याने ह्कत्वा शुभाशुभं ॥ ५८
स्याशायां सुस्वरा सर्वं फलं यच्छति शोभनं ॥ तत्रार्द्धे विस्वरादन्नेदीप्ते सर्वं विवर्जयेत् ॥ ५९ ॥

